# BHĀRATA SAṄGRAHA

OF

Mahāmahopādhyāya
M. LAKSHMANA SURI

*Published by*

T. V. BALAKRISHNAN, M.A., B.L.
ADVOCATE, 'SRI VIDYA', MADRAS-18.

*Copies can be had of*

**The Kuppuswami Sastri Research Institute,**
**Madras-4.**

**1956**

**Price Rs. 2/4**

# BHĀRATA SAṄGRAHA

OF

V. S. S. MANI.
First
KARPAGA
SANTHOME, MADRAS

Mahāmahopādhyāya
M. LAKSHMANA SURI

*Published by*
T. V. BALAKRISHNAN, M.A., B.L.
ADVOCATE, 'SRI VIDYA', MADRAS-18.

**1956**

**Price Rs. 2/4**

*Copies can be had of*
**The Kuppuswami Sastri Research Institute,
Madras-4.**

Printed at Sri Ramachandra Printing Works,
177, Royapettah High Road, Madras-14.—C. 3000.—3-'56.

# PREFACE

It has been my long-cherished desire to publish all the works of my late lamented father, Mahamahopadhyaya M. Lakshmana Suri, and the long delay in the carrying out of this desire has been weighing heavily upon me as neglect of a sacred duty. I confess to a feeling akin to what was expressed by the great poet in the following verse:

असह्यपीडं भगवन्नृणमन्त्यमवेहि मे ।
अरुन्तुदमिवालानमनिर्वाणस्य दन्तिनः ॥

(*Raghuvamsa 1. 71*)

My regret has been all the keener for the great interest which the reading public has been taking in my father's works. Many were the enquiries received from quarters, known and unknown to me, concerning them and numerous requests for copies thereof. But I could not respond, as the publications were most of them out of print. And latterly, as a result of the general cultural awakening and an increasing desire on the part of the public to study Sanskrit, there has been a steady rise in the demand for those works, and I accordingly consider that their publication should no longer be delayed.

It is hardly necessary for me to write anything about the important place which my father's works occupy in modern Sanskrit literature, a place which has obtained international recognition. Sri K. Balasubramania Iyer, who has written a Foreword to this publication, was one of his beloved and devoted *Śiṣyas*, and he can speak about him with a knowledge and authority which few persons

shads based on the Bhashya of Sri Sankaracharya. At the Vidvat Sadas held in the year 1903 on the occasion of the visit of Sir K. Seshadri Iyer, Dewan of Mysore, to Tanjore, the karikas were read and in recognition of their merit the Dewan of Mysore was pleased to confer the title of 'SURI' on him. Ever since, he was known to the scholar-world as Lakshmana Suri. The Government of India conferred on him the title of Mahamahopadhyaya.

Realising the importance of prose works in simple Sanskrit to be read by students of Sanskrit, Pandit Lakshmana Suri wrote the present work, Bharata Samgraha and later the Nalopakhyana and the Ramayana Samgraha. His prose style was simple and lucid and at the same time vigorous and grammatical. Even in the years 1907 and 1908, the Board of Studies in Sanskrit of the Madras University, the Chairman of which at that time was Sir P. S. Sivaswami Iyer, and one of the members, Sri V. Krishnaswami Iyer, prescribed these prose works for the then Matriculation Examination. Even before the year 1900, while my uncle the late V. Swaminatha Iyer was District Munsif at Sattur he came into contact with him. His scholarship in Vedanta was very much appreciated by my uncle. He then gave a letter of introduction to his brother Sri V. Krishnaswami Iyer, at Madras. It was from that time that his association with Sri V. Krishnaswami Iyer began. This grew into a great intimacy. Mr. Krishnaswami Iyer became an ardent admirer of the poetic genius of Pandit Lakshmana Suri. Mr. Krishnaswami Iyer gave great encouragement to him and encouraged him to write other poems and prose works.

When Dr. Hultzsch, the great German scholar, was the Government Epigraphist here, he discovered the first two acts of an unknown drama called 'Parijata Manjari' inscribed on granite slabs. He sought the assistance of Pandit Lakshmana Suri to reconstruct the text which was in part mutilated and also asked him to write a commentary on the work. Even after Dr. Hultzsch retired from his post and went to Germany, he was having correspondence with Pandit Lakshmana Suri in Samskrit. I have had the privilege of seeing many of the letters which Dr. Hultzsch wrote in genuine appreciation of the scholarship of Pandit Lakshmana Suri.

Pandit Lakshmana Suri was also the author of many poems and dramas. The first of his poems was 'Viprasandesa' based on the well-known story of the Bhagavatam of Rukmini sending a message to Lord Sri Krishna. He wrote also the Mahakavya called 'Krishnalilamrita' giving an account of the early life of Lord Sri Krishna. Parts of the work were read by the late Sri V. Krishnaswami Iyer, who very much admired the beauty of the poem.

He wrote many other works. The last of his poems was the 'Bhagavatpadabhyudayam' which gives an account of the life of Adi Sankaracharya. It may be regarded as one of the standard works on the life of the great Acharya.

Soon after the founding of the Ranade Library the late Mr. V. Krishnaswami Iyer had outlined a plan for the publication of a series of books resembling the "English Men

of letters" on some of the great ancient characters of our country. A series of lectures also were delivered under the auspices of the Ranade Library on Bhishma, Yajnavalkya and others by eminent pandits. In pursuance of this plan, he requested Pandit Lakshmana Suri to write a short prose work giving an account of the life of Bhishma in Samskrit. In 1909 this work was published and was dedicated by him to the Hon. Justice late V. Krishnaswami Iyer. It was prescribed as a Text-book in the University for B.A. Degree examination for the year 1912.

During the time of the Coronation of George V in 1911 the Govt. of Madras requested him to write an ode on the Coronation of King George V. It was called the "George Deva Satakam." This poem was also translated into English and it was read on the occasion of the celebration of the Coronation at Delhi and in various centres at Madras. The Government of Madras was pleased to give him an honorarium and in recognition of the merit of his poem they awarded also a certificate of honour to him.

Many and varied have been the scholarly activities of this renowned Pandit. He had a wonderful grasp of the Samskrit language, vocabulary and grammar. He commanded a very good Samskrit style. His prose works filled really the deficiency of good prose in Samskrit literature during recent times. By writing the book Bharata Samgraha he did really a great service to Samskrit and to the propagation of epic literature in our country. In private life, he was of a gentle and amiable disposition.

He led an austere and pure life. He was poor and had a large family to support; but he always maintained the standard of plain living and high thinking.

I had the good fortune of being a pupil of his and I hold him in veneration as my 'Guru'. He was deeply attached to my father V. Krishnaswami Iyer and he used to spend a lot of his time in my house. The conversation between the two was itself an education to the hearers. They spoke on many aspects of Samskrit literature. The late Sri V. Krishnaswami Iyer gave unstinted support and encouragement to the Pandit's scholarly activities. So great was his affection for my father that on the occasion of his death, his sorrow took the form of an Elegy, Karuṇaka.

The Bharata Samgraha is a valuable prose work of his and I am happy that his dutiful son, the Hon. Mr. Justice T. L. Venkatarama Iyer, has brought out this new edition of the work.

*Madras,*
*14—1—1956.*

K. BALASUBRAHMANYA IYER.

# WORKS OF MM. M. LAKSHMANA SURI

## MAHAKAVYA :

*Bhagavatpādābhyudaya
Kṛṣṇalīlāmṛta

## LAGHUKAVYA :

Viprasandeśa
Manassandeśa
Veṅkaṭeśastava
*Gurustavamālā
Karuṇaka—An Elegy
Prapanna-Vibhīṣaṇa
George-Deva-Śataka

## PROSE :

*Bhāratasaṅgraha
Rāmāyaṇasaṅgraha
*Nalopākhyānasaṅgraha
Bhīṣmavijaya

## DRAMA :

Delhi-sāmrājya
Paulastyavadha
*Ghoṣayātrā

## PHILOSOPHY :

Kārikās on the Daśopaniṣads

## COMMENTARIES :

On Anargharāghava
" Uttararāmacarita
" Mahāvīracarita
" Bālarāmāyaṇa
On Veṇīsaṁhāra
" Ratnāvalī
" Pārijātamañjarī of Madana

---

* Those marked with asterisk can be had of K. S. R. Institute, Mylapore, Madras.

# CONTENTS


| | | | |
|---|---|---|---|
| (१) | आदिपर्व | ... | १-१८ |
| (२) | सभापर्व | ... | १९-२९ |
| (३) | वनपर्व | ... | ३०-४१ |
| (४) | विराटपर्व | ... | ४२-५३ |
| (५) | उद्योगपर्व | ... | ५४-६९ |
| (६) | भीष्मपर्व | ... | ७०-७८ |
| (७) | द्रोणपर्व | ... | ७९-९४ |
| (८) | कर्णपर्व | ... | ९५-१०३ |
| (९) | शल्यपर्व | ... | १०४-१०९ |
| (१०) | सौप्तिकपर्व | ... | ११२-११० |
| (११) | स्त्रीपर्व | ... | ११३-११७ |
| (१२) | शान्तिपर्व | ... | ११८-१२३ |
| (१३) | अनुशासनपर्व | ... | १२४-१२५ |
| (१४) | अश्वमेधपर्व | ... | १२६-१२९ |
| (१५) | आश्रमवासपर्व | ... | १३०-१३२ |
| (१६) | मौसलपर्व | ... | १३३-१३५ |
| (१७) | महाप्रस्थानपर्व | ... | १३६-१३८ |
| (१८) | स्वर्गारोहणपर्व | ... | १३९-१४१ |
| (१९) | भगवद्दण्डकः | ... | १४२-१४३ |

श्रीः

॥ श्रीलक्ष्मणसूरिविरचितः

# भारतसंग्रहः ॥

---

अनुग्रहाय लोकानामवतीर्णाय विष्णवे ।
क्लेशापहाय कृष्णायाः पार्थसारथये नमः ॥

## आदिपर्व ।

अस्ति कुरुषु हस्तिनाख्यं नगरम् । तत्र चन्द्रवंशप्रदीपस्य प्रतीपस्य तनुजः शंतनुर्नाम राजासीत् । तस्य गङ्गायां देवव्रतो नाम पुत्रो जज्ञे । स प्राप्तयौवनोऽपि पितुरपेक्षया यावज्जीवं ब्रह्मचर्य एवात्मनोऽवस्थानं प्रतिजज्ञे । ततः स भीष्मोऽभवत् । तेन तुष्टः पिता तस्मै स्वच्छन्दमरणं वरं दत्वा स्वयं सत्यवतीं नाम दाशकन्यां परिणीय, तस्यां विचित्रवीर्याभिधमात्मजमुत्पाद्य स्वयं कालधर्मेणा-युज्यत । भीष्मस्तु बालस्य भ्रातू राज्यं स्वयं दधत्तदनु यौवनारूढं तं राजानं कृत्वा काशीराजसुताभ्यां गृहमेधिनं च चकार । तस्मिन्नपि नातिचिरेण कालेनोपरते, कुलवृद्धिमिच्छुः सत्यवती शान्तनवानुमत्या पाराशर्यमात्मनः कानीनं पुत्रं व्यासं ज्येष्ठायां स्नुषायामम्बिकायां सन्तानार्थं नियोजयामास । सा तु तस्यासौम्येन रूपेण बीभत्समाना स्वचक्षुषी पिधाय तमुपजगाम । तदनुरूप एव च तस्यां पुत्रो जज्ञे । तं धृतराष्ट्रमाहुः । तेन पौत्रेणापरितुष्टा सा दाशेयी कनिष्ठायां स्नुषाया-मम्बालिकायां पुनरपि तं नियोजयामास । सा तु तत्समागमे हरिणी-भूतेवाभवत् । तत्सरूप एव तस्यां पुत्रो बभूव । सोऽपि पाण्डुरित्ये-

वाभ्यधायि। पुनश्चानभिमते तत्संगे श्वश्वा नियुक्ता सा द्वितीया आत्मनो भुजिष्यां शूद्रामलंकृत्य प्राहिणोत्। सुतरां दुर्लभेन तत्समागमेन कुतूहलिन्यां तस्यां विदुरनामा सर्वगुणसंपन्नः सुतो जातः।

ज्येष्ठस्य जात्यन्धतया कनिष्ठस्य पारशवतया च मध्यमः पाण्डुरेवा राजा बभूव। आम्बिकेयस्तु सुबलकन्यां गान्धारीं भार्यां लेभे। सापि तादृशाय वरायात्मानं पितृभ्यां दित्सितं यदा शुश्राव, तदैव 'पत्यौ ममासूया मा भूत्' इति स्वे अक्षिणी अपि पटैः सम्यग्बध्वा स्वयमप्यन्धेव भूत्वा पतिव्रतात्वमन्वर्थयामास। पाण्डोस्तु कुन्ती माद्री चेति द्वे भार्ये बभूवतुः।

एकदा स नृपो महता बलेन मृगयार्थी सभार्यो वनमगच्छत्। स तत्र तत्र मृगान्वराहान्महिषानन्यांश्च वन्याञ्श्वापदान्घ्नन् यदृच्छया क्रीडतो हरिणमिथुनस्य पुमांसं स्वशरस्य शरव्यमकरोत्। स च तेन बलवन्मर्मणि ताडितस्तन्मृगरूपं विहाय तापसवेषेण सव्यथमिदमाह—'भो राजन्! अहं किल किंदमो नाम महर्षिः। स्वच्छन्दभोगकाम्यया इन्द्रधर्माहमेवमचरम्। ईदृशे मयि कमपराधलवमुत्प्रेक्ष्य प्रहृतवानसि। न हि निरपराधो विशेषतो माननीयो मादृशो जनो वा अहिंसयैव प्राणयात्रां वर्तयन्मृगो वा पीडयितुं ते साम्प्रतम्। हिंस्रस्य दमनाय हि राज्ञां शस्त्रम्। न तु कृपणजनक्लेशाय। यदेवमनाकलय्य मामवधीस्तस्मात्स्त्रीव्यतिकरनिमित्त एव तवापि मृत्युरस्तु' इति शप्त्वा विरतासुरभूत्।

तच्छ्रुत्वा राजा व्यचिन्तयत्— 'किमिदमन्यदाचरतो मेऽन्यदापतितम्। न हि निरङ्कुशः कार्यमकार्यं वा विमृशति। ईश्वरो हि पुरुषः

परस्य सुखदुःखे न संवेदयते, नाप्यात्मनो हिताहिते पश्यति। मदान्धो गज इव परिभ्रमन्नन्यत्र कुत्रापि व्यसनमहागर्ते निपत्य सीदति। मदस्य मूलं प्रभुत्वं न तु मद्यम्। अतस्तत्क्षपणेन तपसैवायुषः शेषो मे यापयितव्यो, न तु भोगेन' इति व्यवसितमतिरतीव दुःखितं स्वं परिवारं कथंकथमपि नगराय निवर्तयामास। ततश्च नागरैरभ्यर्थितो धृतराष्ट्रः स्वपित्रा गाङ्गेयेन कनीयसा भ्रात्रा विदुरेण चानुमतः स्वयं राज्यमकरोत्।

पाण्डुस्तु तादृशे व्यसनेऽप्यनुवर्तमानाभ्यां ताभ्यां सह मुनिजनोचितया वृत्त्या तत्रैव नियमपरः कालं गमयन् राज्यादपि परां निर्वृतिमवाप। स कदाचित्सौरभेयेण प्रजावतीं रमणीयां रमणीं च दृष्ट्वा अभिनन्दते स्वयमपि पुत्रीयन्रहसि ज्येष्ठां भार्यां कुन्तीमिदमवोचत्—'अयि, श्रूयते हि बहवो दुश्चरेण तपसाप्यसाध्यं लोकं प्रजया साधितवन्त इति। पितरोऽपि पुत्रवतैव न्युप्ते जलाञ्जलौ कृतार्थिनो भवन्ति। उत्सङ्गगतमर्भकमुपलालयंस्तदालिङ्गनकलभाषिताद्यभिज्ञो यो न भवति तस्यैवान्यदन्यद्रम्यं भवति न तु तत्स्वादं विदुषः। अहं त्वेवमुभयलोकसुखसाधारणेऽप्यपत्ये स्वदोषेण निराशस्त्रिशङ्कुरिव निरालम्बः संवृत्तोऽस्मि। धारयस्व माम्। पुंसः कल्पलता खलु त्रिवर्गफलप्रसूतिर्गृहिणी। स्त्रीणां निसर्गसिद्धा हि निपुणता, दक्षता, उपायज्ञता च। तद्भद्रे! अनन्यगतिकं मां पुन्नाम्नो नरकात्त्रायस्व' इत्यश्रूणि मुञ्चंस्तयोचे—"नाथ श्रूयतां किंचित्। पुरा पितुर्गृहे वर्तमानायां मयि, तपसेवाक्षमया च ज्वलन इव ज्वलन्नात्रेयो दुर्वासा नाम महर्षिः यदृच्छयागतः सत्कृतो मम पितरमपृच्छत्—'अत्रैव चिरं स्वच्छन्देन

वस्तुमागतोऽस्मि। तदनुमन्यतां भवान्' इति। तेन तथेत्यभ्युपेत्य तस्य शुश्रूषार्थमहं नियोजिता। तस्य मुनेर्दुराराध्यतया भृशमुद्विग्ना महता नियमेनासिधाराव्रतमिव चरन्ती तं चिरं पर्यचरम्। स कदाचिद्भगवान्मामिदमभाषत—'वत्से पृथे! मया बहुतरं क्लेशितापि स्वयमखिन्नैव मामुपास्से। न किंचिदपि तव वैमनस्यं लक्षये। तव शौचेनानालस्येन चातितरां प्रीये। न हि मादृशस्य कोपः प्रसादो वा निष्फलो भवितुमर्हति। अतः प्रतीच्छेमं मन्त्रम्। अनेन यां देवतामाह्वयसि सा सद्य एव तव मनोरथं पूरयिष्यति' इति प्रसन्नस्तं मन्त्रं मयि संक्रामयामास। यदि मन्यसे तमधुनोपयोक्ष्ये, कां वा देवतामुपस्थास्ये" इति निवेदयन्ती सा तदनुमत्या वैवस्वतं धर्मराजमुपास्य तदनुग्रहेण युधिष्ठिराख्यं पुत्रमसूत। स च स्वगुणेन पश्चादजातशत्रुरिति च पप्रथे। वायोः प्रसादाद्भीमसेनाख्यं पुत्रमविन्दत। यं वृकोदर इति भीम इति च वदन्ति। इन्द्रप्रसादादर्जुनाख्यं लेभे। स ह्युत्तरफल्गुन्योर्जात इति फल्गुन इति चोच्यते। तस्यापरा भार्या माद्र्यपि तन्मन्त्रेणैवाश्विप्रसादाद्यमलौ नकुलसहदेवाख्यौ सुतावसूत। एवं पञ्च पाण्डवा अजायन्त।

गान्धारी तु संवत्सरत्रयं गर्भं धारयमाणा, कुन्त्या ज्येष्ठं पुत्रं जातं यदा शुश्राव, तदैवामर्षेण स्वोदरमश्मना घ्नती मांसपेशीमसूयत। तत्क्षणमागतस्य भगवतो द्वैपायनस्याज्ञया तां पेशीमेकोत्तरशतधा विभज्य, घृतपूर्णेषु कुण्डेषु पृथक्पृथङ्निधाय, शीतेन जलेन प्रतिदिनं च निषिच्य रक्षितवती सा कालेन दुर्योधनप्रमुखान् शतमात्मजान् दुःशलाख्यामवरजां कन्यां चाविन्दत। धृतराष्ट्रस्तु स्वभार्यायामासन्न-

प्रसवायां युयुत्सुं नामात्मजं वेश्यायामुत्पादयामास । एवं धार्तराष्ट्रा एकोत्तरशतमासन् ।

अथ कदाचिद्दैवस्य दुर्निवारतया बलान्माद्रीमुपगम्यायुषोऽन्तमुपगतवति पाण्डौ, तस्यां च तन्मार्गमेवानुसृतवत्यां, विदितवृत्तान्ता कुन्ती चिरं विलप्य तौ दम्पती विधिना संस्कार्य, मुनिजनसहाया बालकैः सह शनैः शनैः कतिपयैर्दिवसैः स्वपुरमेव प्रपेदे। तत्रामानुषरूपांस्तानवलोक्य नागरास्तर्कयन्ति स्म। "केयं सुन्दरी शोभनापि शोच्यतमा दृश्यते । कोऽयमस्याः पृष्ठतो मूर्तो धर्म इव क्षमासारश्चक्रवर्तिलक्षणोपेतश्च लक्ष्यते । अथ कोऽयमपर आकृत्या महागजेन्द्रगामी, अहो शौर्यराशिरयम् । कश्चायमुदात्तस्वभावो भाति । नूनमयं युवा भवन्साक्षान्मघवतापि च प्रतियोद्धा स्यात् , तथा ह्यस्य धैर्यलक्ष्मीर्लक्ष्यते । कौ चैतावश्विनाविव रूपवन्तौ । किमेनयोर्निमग्ना दृष्टिः पुनरुद्धर्तुमपि न पार्यते । नूनमेते देवताप्रसादाल्लब्धाः पाण्डुपुत्राः" इति निश्चयान्तेन तर्केण कुतूहलिता महता कोलाहलेन तानेवान्वधावन् । तत्रैवान्तर्हितेषु तपस्विषु, तदागमेन मुदितो राजा वैचित्रवीर्यस्तान्स्वगृहमानीयानुजस्य विपत्त्या दुःखितोऽपि तल्लाभेन निर्वृतस्तान्स्वपुत्रनिर्विशेषं पोषयामास ।

अथ यथाकालमुपनीतेषु वर्धमानेषु सर्वेषु च कुमारेषु युधिष्ठिरस्य सत्येन शौचेन दमेन विनयेन अन्यैश्च गुणैर्बाह्या आभ्यन्तराश्च जनाः शारद इव राकाचन्द्रे तस्मिन्ननुरागं दधुः । तदसहमानो दुर्योधनः स्वयं राज्यलोभाद्दुष्टामेव मतिं तस्मिंश्चकार । तद्भ्रातरो

दुःशासनादयोऽपि तमेवान्ववर्तन्त। अजातशत्रुस्तु जानन्नपि तेषां हृदयं सहजया क्षमया स्वयं तेषु वत्सल एव बभूव।

वृकोदरस्तु तेषां दुराशयममृष्यमाणस्तानाहारविहारादिके सर्वस्मिन्नप्यवसरे हेलयैव मृद्नन्नतिप्रगल्भतया तैरनभिभूतश्च सन् हृदि निखातः शङ्कुरिव तेषां संजज्ञे। तस्य निभृतवधोपायं चिन्तयन्स पापः सुयोधनो जलक्रीडाच्छलेन भागीरथीं नीत्वा तत्र विषसंसृष्टमन्नं तस्मै प्रदाप्य तेन मूर्च्छितं तं दृढं बद्ध्वा स्रोतसि प्रक्षिप्य, कृतकृत्य इव स्ववर्ग्यैः समं पुरमवाप। तदविद्वांसो युधिष्ठिरादयस्तु भ्रातुरदर्शनेन परेभ्यः पापमाशङ्कमानास्तत्र तत्र विचित्य मात्रा सह विषीदन्तो विदुरेणाश्वासिता अपि भृशमार्तिमभजन्त।

भीमस्तु देहस्य गौरवेण स्रोतःपथेन रसातलं प्रापितस्तत्र दशद्भिर्नागैर्निवर्तितविषमूर्च्छः सपदि सुप्तोत्थित इवोत्तिष्ठन् स्वमातामहस्य मातामहेन वासुकिनानुमतः कुण्डाष्टकगतान्दिव्यान् रसान्पीत्वा तत्रैव सुखं सुष्वाप। ततश्चाष्टमेऽहनि प्रबुद्धस्तत्परिजनैरूर्ध्वं नीतो रसपानोपचितनागायुतबलः स्वभवनं प्राप्य सर्वं स्वमात्रादिभ्यो यथावृत्तमकथयत्। ततः प्रभृति ते सर्वेऽपि महोरगाक्रान्त इव गृहे सर्वदा च सातङ्का एव न्यवसन्।

अत्रान्तरे पूर्वं तु दुर्वाससो मन्त्रं परीक्षितुमाहूतेनादित्येन कुन्त्यां सद्य एवोत्पादितः कवची कुण्डली च कर्णो नाम, पुनरपि कन्यात्वं प्रपन्नयापि तया तदात्मनो दूषणं मन्यमानया मञ्जूषायां पिधाय जले प्रक्षिप्तो यदृच्छया स्नातुमागतेन सूतेन गृहीतो वसुषेण इति कृत-

नामधेयो वर्धमानः सन् कालेन प्राप्तयौवनो भूत्वा धार्तराष्ट्राणां परायणं बभूव। सः, सौबलो मातुलः शकुनिः, भ्राता दुःशासनश्चैते त्रयो दुरात्मानो दुर्योधनस्य सर्वस्मिन्नपि समये दुर्नयबीजोपक्षेपहेतवो बभूवुः।

अथोभये च ते कुमाराः शारद्वतात्कृपाद्वेदानधीयानाः कदाचिदाक्रीडे क्रीडन्तः कस्मिंश्चिन्निरुदके दुरवतरे च कूपे पतितां वीटामाहर्तुमशक्नुवन्तो यदा पश्यन्ति, तदा यादृच्छिकः कश्चिद्ब्राह्मणस्तत्रैत्य, 'भोः कुमाराः, पश्यत मे कौशलम्' इत्युक्त्वा, तेषां समक्षं स्वां मुद्रां च तत्र प्रास्य, तद्द्वयं च लघुनेषीकास्त्रेणोद्दधार। ततो विस्मितैस्तै र्निवेदितो भीष्मस्तमाहूय पृच्छंस्तेनोचे, 'अहं नाम भारद्वाजो द्रोणः तत्रभवतोऽग्निवेश्यस्यान्तेवासी, भगवतो जामदग्न्यादधिगतनिखिलास्त्रशस्त्रकलापः शारद्वतस्य कृपस्य भगिनीपतिश्चास्मि। सर्वशास्त्रेषु विशेषतो धनुर्वेदे पारदृश्वानं मामाहुः। सोऽहमिदानीं वृत्तिकाम आगतोऽस्मि' इति। तेन तुष्टः शान्तनवो विशेषज्ञानार्थितया पौत्राणां, तस्याचार्यकं दत्त्वा, सर्वानपि तांस्तस्मिन्नर्पयामास।

तस्माद्गुरोरधीयन्नर्जुनः सर्वानपि सब्रह्मचारिणो मेधया प्रतिभया चातिशिश्ये। विद्याविरोधिनी निद्रालस्ये सर्वथापि विजित्य अहर्निशं शिक्षयोत्सुकोऽभूत्। ततश्च तं गुडाकेशं वदन्ति। गुरुवद्गुरुपुत्रेऽश्वत्थाम्न्यपि वृत्तिं दधान ऐदंपर्येण तौ शुश्रूषते स्म। ततश्च समानवृत्तेरपि गुरोः कृपा कुलवधूरिवाव्यभिचारिणी तमेव शिश्रिये। गुरुणानुक्तमप्यर्थमूहेन निश्चिन्वन्स्वयमेव शिक्षमाणो दक्षिणेनेव सव्येन बाहुनाप्यस्त्रप्रयोगे लघुहस्ततामवाप। ततः सव्यसाचीति

प्रथितोऽभूत्। एकदा गाङ्गे जले ग्राहेण गृहीतं गुरुं झटिति मोचयंस्ततो ब्राह्ममस्त्रं पारितोषिकं जग्राह। भीमस्तु पार्थेषु द्वितीयोऽपि गदायुद्धेऽद्वितीयो बभूव। अथ सदसि माणवकेषु स्वस्वशिक्षापाटवं दर्शयत्सु सव्यसाची स्वकौशलदर्शनेन सर्वानपि प्राश्निकान्विस्माययामास। कर्णस्तु तदसहमानस्तेन यत्प्रयत्नकृतं तल्लाघवेन कुर्वन् पस्पर्धे। 'कथमराज्ञस्तव राजपुत्रेण सह सङ्घर्षः' इति तमधिक्षिपति भीमसेने, स्वपक्षधुर्यतया तस्मिन्कृतव्यपाश्रयो दुर्योधनस्तत्क्षणं तं सूतपुत्रमङ्गराज्येऽभ्यषिञ्चत्।

अथ प्राप्तेऽवसरे भारताचार्यः सर्वानेव शिष्यांश्चोदयामास— 'वत्साः, साङ्गे सरहस्ये धनुर्वेदेऽधीतिनां भवतां गुर्वर्थकाल उपस्थितः। स च पाञ्चालानां राज्ञो जीवग्राहं गृहीत्वात्रानयनेन भवति' इति। तच्छ्रुत्वा तथेत्यहमहमिकया संप्रस्थिता धार्तराष्ट्राः पथि विलम्बितान्पाण्डवान्कर्णावष्टम्भेनानादृत्य महता बलेन द्रुपदपुरीं रुन्धन्तस्तस्य पार्षतस्य प्रतापं सोढुमशक्ताः सर्वतः कान्दिशीकतां गुरुदक्षिणयामासुः। भग्नेषु तु तेषु, भीमेन सहार्जुनः शत्रोः सैन्यं प्रमथ्य, तं च संयम्य गुरोः सकाशं निनाय।

सुहृद्वत्सलः सोऽपि तथाविधमवाङ्मुखं तं विलोक्याह—'ननु राजन् यज्ञसेन! सहाध्यायिनाप्यराज्ञा मया तव सख्यं नाभिरुचितं किल। तदविच्छेदकामेनैव मयैवं यतितं, न तु राज्यलोभेन। अत उत्तराः पाञ्चाला मम पर्याप्ताः। दक्षिणांस्तु त्वमेव प्रतिपद्यस्व। अभ्युपपद्यस्वाधुनापि मम मैत्रीम्' इत्युक्त्वा तमर्धराज्येन मोचयामास। ततः प्रभृति स पार्थः विजयः, जिष्णुः इति च प्रख्यातः।

अनन्तरं यौवराज्याभिषिक्ते युधिष्ठिरे, तस्मिन्प्रजानामनुरागेण भीमार्जुनयोर्विक्रमेण चोद्विग्नो दुरात्मा दुर्योधनस्तेषां वधोपायं रहसि मन्त्रयित्वा, तदर्थं पितरं चोदयामास। पूर्वमेव कणिकोपदेशेन बहिरिवान्तरप्यन्धीभूतः सोऽन्धो राजा युवराजमजातशत्रुमादिदेश—'वत्स! वारणावताख्यं स्थानं जलस्थलरामणीयकविशिष्टं श्रूयते। तत्राद्य पशुपतेरुत्सवो वर्तते। तत्रैव सुहृद्भिः सह कञ्चित्कालं विहृत्य पश्चादिहागच्छे'ति। निपुणमतिः स तस्य हृदयमवगत्यापि गुरुप्रतिपत्त्या तथेत्यभ्युपैति स्म।

तेन तुष्टः स दुष्टो धार्तराष्ट्रः कञ्चित्पुरुषं रहसि ससान्त्वमिदमभाषत—'सखे पुरोचन, यथा बहवो भ्रमराः संहत्यैकं क्षौद्रपटलं निर्वर्तयन्ति, यथाकालमनुभवन्ति च, तद्राजस्तु नाममात्रेण विशिष्टः। एवं प्रणिधानचतुरैर्बहुभिः प्रणिधिभिस्तन्त्रितं हि राज्यम्। राज्ञस्तु परिच्छद एव विशेषः। तस्मान्मम यद्वसु तद्भवतामेवेति तु पुनरुक्तिरियम्। किंतु सपत्नसंकुलमिदं मशकाक्रान्तं शयनमिव न मां सुखयति। अतस्तन्निःसरणे भवता सहायेन भाव्यम्' इत्युक्त्वा कर्तव्यं चोपदिश्य सबहुमानं विससर्ज। स च खलस्तथेति वारणावतं गत्वा यथावत्सर्वमनुष्ठाय पाण्डवागमनं प्रतिपालयति स्म।

युधिष्ठिरस्तु तथेत्यात्मनाषष्ठः प्रतिष्ठमानः सूक्ष्मज्ञेन क्षत्रा महत्यां जनतायां म्लेच्छभाषया बोधितस्तमर्थं बाढमित्युक्त्वा गच्छन्विविक्ते मात्रे व्याचचक्षे-'अम्ब, तत्र युष्मद्वासगृहं शत्रुप्रयुक्तेन पुरुषेण धक्ष्यते, तदर्थं वर्तमन्तरं विधत्स्व। मृगयाव्याजेन बाह्लीकान् प्रदेशांश्च

नित्यं परिचिनु। दाहकाले तेन पथा निष्क्रम्य पलायस्वेति विदुरेणोक्तम्' इति वदन्नेव वारणावतं गतवान्। गच्छंश्च स तेनाभिगम्यात्मवत्स्वजनवद्भृत्यवच्चोपचरता 'भवदर्थं महाराजेन निर्मितमिदं अभिनवं निवेशनं, तदत्रैव सुखं वसत। अहं भवतां साहाय्य नियुक्तः' इति वदता पुरोचनहतकेन दर्शितं जातुषमाग्नेयैर्द्रव्यैरन्तराचितं च गृहं प्रविश्य, निपुणं निरूप्य, सर्वं यथावन्निश्चिन्वन्धर्मपुत्रो भीमादिभ्यस्सर्वमुपपाद्य, साशङ्कोऽपि बहिरतिविस्रम्भवानिव भावयन्नवर्तत। विदुरस्तु स्वभृत्येन गूढं प्रयुक्तेनान्यैरविदितमेव सुरङ्गां निर्मापयामास। तथा तत्र कञ्चित्कालमुषितैस्तैर्जातुचित्केनचिदपदेशेन ब्राह्मणादिषु भोजितेषु, पञ्चपुत्रा कापि निषादी सुरां पीत्वा तत्रैव पुत्रैः सह सुष्वाप। अथ निशीथसमये तं पापं पुरोचनं गाढप्रसुप्तमाज्ञाय ते तज्जतुगृहं सर्वतोऽग्निनोद्दीप्य तेन बिलमार्गेणापसृत्य भागीरथ्यास्तीरमासाद्य, तत्र विदुरसज्जीकृतया नावा तामुत्तीर्य सुदूरमपसरन्ति स्म।

नागरास्तु तद्गृहमग्निसात्कृतं दृष्ट्वा, तत्र पुरोचनेन सह षडपरान्दग्धानुपलभ्य, पाण्डवान्मात्रा सह व्यापादितान्मत्वा चुक्रुशुः। मन्दात्मा दुर्योधनस्तत्तथ्यं मन्वानो मनोरथस्य परां काष्ठामारूढ इव जहर्ष।

अथ वृकोदरो निद्रया श्रान्त्या चावसन्नगतीन्पञ्चापि स्वगात्रेणादाय पुष्पमालभारीवाविश्रान्त एवातिदूरमध्वानं शीघ्रं प्रधाव्य, कस्यचिद्वटवृक्षस्य तले तान्सुखं शाययन्स्वयं जागरांबभूव।

अत्रान्तरे हिडिम्बा नाम राक्षसी स्वनाम्ना भ्रात्रा तत्प्रमापणाय प्रेषिता भीमस्य रूपेण तस्मिन्कामुकी सती सौम्येन वेषेणैत्य तस्मिन्

स्वाशयं प्रकटयामास। तावत्स निशाचरः स्वयमेव द्रुतमभिपत्य भीमेन सह युध्द्वा तेन पशुमारं मारितः। सा तु तच्छब्देन प्रबुद्धान् युधिष्ठिरादीन् प्रणिपातपूर्वमभ्यर्थ्य तदनुमत्या वृकोदरं पतिं लब्ध्वा सद्य एव घटोत्कचाख्यं पुत्रमलभत। जातमात्रः स प्राप्तयौवनो हैडिम्बेयः पितॄन् प्रणम्य कृत्योपस्थानीयत्वसंविदा मात्रा सह प्रयातवान्।

ततः प्रस्थितास्ते पथि समागतेन भगवता बादरायणेन कृताश्वासा ब्राह्मणब्रह्मचारिवेषेणैकचक्राख्यं नगरं प्रविश्य, तत्र कस्यचिद्विप्रस्य गृहे कृतनिवेशना भैक्षेण वृत्तिं कुर्वाणाः कञ्चित्कालं गमयामासुः।

एकदा पूर्वरात्रेऽन्तर्गृहे जायापत्योः परिदेवितमाकर्ण्य संभ्रान्ता कुन्ती सरभसमेत्य, तस्य निदानमपृच्छत्। स द्विजः प्राह—'अयि! किमनेन मम दौर्भाग्यविलसितश्रवणेन। न ह्यशक्यप्रतीकारेऽत्र अत्रभवत्या अन्तरमुपपद्यते। तदलमाग्रहेण। अथ यदि मन्यसे स्त्रीचापलाच्छ्रोतव्यमेव, तर्हि सज्जा भव कुलिशप्रहारं कुसुमाञ्जलिनादातुम्। अस्य पुरस्य नातिदूरे बकनामा कश्चिन्मृत्युः प्रतिवसति। सर्वोच्छेदोद्यतं तं पौराः समयेनानुनीय प्रतिदिनमेकैकपुरुषबलिना महतान्नराशिना च नियमेनाराधयन्ति। श्वस्तावत्स वारो मम गृहे प्रत्युपस्थितः। तस्मै कथमिमां परस्वभूतां दारिकां शारिकामिव क्रव्यादायार्पयन्न्यासापलोपेनात्मानं मोचयेयम्। कथं वेमं पित्र्यमंशं कुमारं परिहाप्य, अनिर्यातितर्ण इवाधमर्णः पुनरप्यात्मानं निरयमहार्णवे निमज्जयेयम्। कथं वा त्रिवर्गसाम्राज्यलक्ष्मीमिमां जायामुपहारयन्कृतघ्नः स्याम्। आत्मापहारे च निरालम्बस्यास्य जनस्य कर्णधारध्वंस इव

नावाश्रयस्य का गतिरिति मुहुर्मुहुश्चिन्तयतोऽपि मम न प्रतिपत्तिर्जायते' इत्युक्त्वा विललाप। सा पुनस्तदाकर्ण्य दयार्द्रभावा तत्र चिरनिवासाय निष्कृतिं चिकीर्षुर्हिडिम्बे दृष्टवीर्येण सूनुना तद्दुःखमपाकरिष्यन्ती तमिदमभिदधे—'भो ब्रह्मन्, अलं संतापेन। अहं हि मम पुत्रेष्वन्यतमेन तवार्थं साधयितुमिच्छामि। न च तवैव स्वभूतोऽयमर्थः। सामुदायिके ह्यर्थे सर्वेऽप्यंशिनः। मा च मे पुत्रस्य तेन पापमाशङ्किष्ठाः। सर्वं हीदमधुना मृत्युभयान्मोक्ष्यते। तद्विस्रब्धो भव' इति तमाश्वास्य ज्येष्ठपुत्रानुमत्या कल्यमेव वृकोदरं बकवनाय प्राहिणोत्। स च महतोत्साहेन गत्वा द्वन्द्वयुद्धे तमिक्षुकाण्डभङ्गं भङ्क्त्वा, गोपुरद्वारि प्रास्य, जनैरलक्षित एवागत्य, सर्वं यथावृत्तं मात्रे न्यवेदयत्। ततः प्रभृति स देशो निरातङ्को बभूव।

अथ कतिपयथेऽवसरे यदृच्छयागतः कश्चिद्विप्रः पाण्डवैः सह नाना कथाः संकथयन्प्रसङ्गादिदमुवाच—'द्रुपदो नाम पाञ्चालः कस्मिंश्चिन्निमित्ते भारताचार्यादवज्ञामवाप्य, तत्प्रतिचिकीर्षुर्याजयाजकः सन्नाभिचारिकीमिष्टिं चकार। तत्र निरुते चरौ तस्माद्वैतानिकाद्वेदिमध्यान्मिथुनमुदपद्यत। प्रत्यपद्यत च सद्य एव यौवनम्। तत्र यः पुमान् स धृष्टद्युम्नो नाम तं भारद्वाजमेव विद्यार्थमुपससाद। विद्वानपि तत्संभवं स तत्रभवान्द्रोणः दैवमपरिहार्यं मन्वानस्तं द्रौपदं साङ्गं धनुर्वेदमध्यापयामास। अथ या कन्या, सा कृष्णा नाम वरवर्णिनी। तस्याः शरीरमिन्दीवरसवर्णवर्णमुत्पलसगन्धगन्धमाहार्यशोभानपेक्षिलावण्यमनभ्यन्तरं च यौवनप्रतियोगिनोऽवस्थान्तरस्य किं बहुना। यस्य सा गृहिणी स उर्वशीमपि तृणाय मन्येत।

संप्रति तस्याः स्वयंवर इति द्रुपदेनाहूताः सर्वेऽपि क्षत्रिया अहंपूर्विकया तत्पुरीमावृण्वन्ति । विवृण्वन्ति चाशयं तां स्वहस्तगतामिव । तत्पणस्तु पार्थादन्येनानिर्वाह्य इति मे वितर्कः' इत्युपरराम ।

तेनोत्कण्ठितास्ते मात्रा सह तदर्थं प्रस्थिता अहोरात्रैर्यान्तः सोमाख्यं गङ्गायास्तीर्थं रजन्यां यावत्पश्यन्ति, तावत्तत्र स्त्रीभिः सह जलक्रीडामाचरंश्चित्ररथो नाम गन्धर्वस्तत्समागमेन कुपितोऽभिदुद्राव । अर्जुनस्तु तद्रथमाग्नेयास्त्रेण भस्मसात्कृत्वा, तं च निगृह्णन् शरणापन्नायास्तद्भार्यायाः कृते स्त्रीनाथोऽयमिति मोचयामास । एवं युद्धे बीभत्सकर्मवर्जनाद्बीभत्सुरिति च प्रथामवाप । अथ प्रीतात्तस्माद्गन्धर्वाच्चाक्षुषीं नाम विद्यामाग्नेयास्त्रविनिमयेन लब्ध्वा, पुनश्च पारितोषिकतया दत्तानश्वांस्तस्मिन्नेव न्यासीकृत्य तद्वाक्येन धौम्यं नाम ब्राह्मणमाचार्यं विधाय तेन सवैश्च द्रुपदराजधानीमियाय । तस्याः स्कन्धावार एव कस्यचित्कुलालस्य गृहे कृतप्रतिश्रयास्ते सर्वैरपि क्षत्रियैः संकुलां स्वयंवरसभां प्राप्य ब्राह्मणमण्डलमध्यमध्यासामासुः ।

तदानीं धृष्टद्युम्नः सर्वलोकसमक्षमतिगम्भीरमिदमाचचक्षे-'शृणुत समवेताः सर्वे पार्थिवाः! यः कश्चन युष्माकमिमां पतिंवरां मे स्वसारमात्मनः पाणिगृहीतीमिच्छति, सोऽनेन धनुषास्य लक्ष्यस्य भेदनं पणीकृत्यैनां प्रतीच्छतु ।'

तदनु युगपदुत्थितान्बहून्वीरान्निवार्य स्वयमग्रेसरे गिरिराजसारस्य तस्य शरासनस्य दर्शनेनैव मुकुलितानुरागे तुरगब्रह्मचर्यधुरंधरे गान्धारे, तद्दण्डगौरवेणैव कृतशासने दुःशासने, तद्वेगाक्षिप्तात्मन्यव-

हसिते च मानधने दुर्योधने, अजात्यतया दूषिते सूतसुते, श्लथमनोरथे बार्हद्रथे, विगलितधैर्यमुद्रे मद्रराजे, अवघोषमे चैद्ये, भावितार्थतया तूष्णीके वृष्णिकेतौ, मूकीभूते चान्यस्मिन्राजन्यके ब्राह्मणसमाजादुत्थाय पार्थः सपदि तद्धनुरारोप्य यन्त्रच्छिद्रेण तल्लक्ष्यं परेषां मानेन सह सहसा पातयामास। तत्क्षणं कृष्णा मन्दमन्दमुपकण्ठमुपगम्य जिष्णोरधिकण्ठं सोत्कण्ठं वरणस्रजमर्पयामास। तदक्षममाणाः सुयोधनादयः क्षितिपतयो यशसो विनिमयेन विजयशरप्रहारमादाय पलायाञ्चक्रिरे। अथ तया वीर्यशुल्कया सह स्वावासं प्रविशता पार्थेन 'अम्ब, भिक्षेयमाहृता' इत्युक्ते, 'भ्रातृभिर्भुङ्क्ष्व' इति ब्रुवत्येवागता माता तां स्वयंवरवधूं निशाम्य साध्वसादवचनातिष्ठत्। युधिष्ठिरस्तु जनन्या अनृताद्भयं, भ्रातृणां भावं चाज्ञाय, 'एषां पार्षती योषितां रत्नम्। यद्यद्रत्नमस्माभिर्लभ्यते तत्सर्वैरप्यस्माभिरविभज्यानुभोक्तव्यम्। अन्यथा कदाचिदस्मास्वपि कलिरन्तरं लभेत। तदियं पञ्चानामपि भोग्यास्तु' इति समयं कृतवान्। तथेति सर्वैरपि प्रतिपन्ने, तेषां मातुलेयो भगवान्कृष्णः संकर्षणेन सहोपगम्य शुभोदर्कैर्वाक्यैस्तान्समाश्वासयामास।

द्रुपदस्तु बहुभिर्लिङ्गैर्निश्चिततदाभिजात्यः प्रमनास्तान्गृहमानीय यथावत्पूजयित्वा, युधिष्ठिरमुखेन सविशेषं विदन् सुतरां निर्ववार। ववार च सुतापाणिग्रहणाय पार्थम्। तदनु श्रुततत्संश्रवे 'विषममिदं यदेका बहूनां भार्या' इति संशयाने यज्ञसेने, भगवान्बादरायणस्तां सभामवततार। वितितार च कृतसपर्याय तस्मै राज्ञे दिव्यं चक्षुः। तेन तानमानुषान्वीक्ष्य विस्मिताकारं कन्यापितरं पाराशर्यो रहसीदम-

बोधयत्—'पुरा किल स्वर्गलक्ष्मीरतिशयितरूपा कस्यचिदृषेः कन्या सती अनुरूपवरालाभेन महेश्वरं तपसा तोषयामास। प्रसन्ने तु तस्मिन्नुन्मनीभूता सा 'पतिं देहि' इति पञ्चकृत्वोऽयाचत। 'अनन्तरे जन्मनि तव पञ्च पतयो भविष्यन्ती'ति वरं दत्त्वा तस्मिंस्तिरोहिते, विष्णुपद्याः स्रोतसि रुदती सा सुदती यदृच्छयागच्छता शक्रेण पृष्टा तमादाय गिरेः शिखरे क्रीडतस्तस्य महादेवस्यान्तिकं जगाम। तद्दर्शनेन संजातमन्युः सर्वैश्वर्यंमन्यः शतमन्युः स्तम्भितोऽभूत्। तत्र दरीशयानात्मनः सरूपांश्चतुरोऽन्यान्दर्शयित्वा तैः सहान्तः प्रवेष्टुं तेन देवेनादिष्टो मरुत्वानश्वत्थदलवन्मुहुर्मुहुरुद्विविजे। ततः कृपालुः स महेश्वरः केनचिदपदेशेन तेषामिन्द्राणां मनुष्यलोकेऽवतरणं, तां च तेषां भार्यां कल्पयामास। सैवेयं कृष्णा, ते चेमे पाण्डवाः संजाताः। एषामस्याश्चायमागमः। तदलं विचार्य' इति। विमर्शच्छेदिना मुनेर्वचनेन प्रत्यायितो राजा तेभ्यः पञ्चभ्योऽपि स्वां दुहितरं कृष्णां प्रतिपादयामास। निर्वृत्ते तु पाणिग्रहे स्वाहयेव तया वेदिसंभवया सधर्मिण्यालंकृतैः अग्निभिरिव तैः पञ्चभिर्भ्रातृभिर्भ्राजमानां सभां महता वसुनिधानेनोपयान्तौ रामकृष्णौ, इमं लोकं तैजसं विधातुमवतरन्तौ पुष्पवन्ताविव चकासामासतुः।

धृतराष्ट्रस्तु श्रुतवृत्तान्तः पङ्किल इव जलाशयोऽन्तःकलुषो बहिः प्रसन्नश्च सन्, तान्भ्रातृपुत्रान्वध्वा सहानेतुं क्षत्तारं प्रेषयामास। द्रुपदस्तु तं कुरुराजसंदेशं मानयन्, दुहितृवात्सल्यस्य, वरेण्यवरसंपदः, श्लाघ्यसंबन्धस्य, पुरुषोत्तमसमागमस्य, आधिराज्यस्य, मन-

स्विताायाश्चानुरूपेण यौतकेन सदारान्जामातॄन् स्वावासाय प्रस्थापयामास। तेऽपि भगवता सहाभिजनं स्थानं प्राप्य, अतिमनोरथेन स्वोदयेन प्रहृष्यद्भिर्नागरैरभिगम्यमानाः, पित्रादिभिश्च सादरं लालिताः, विस्मृतपुरावृत्ताः परां प्रीतिमभजन्त। पुनश्च स्वपुत्रेभ्यः शङ्कितेन तेन राज्ञा वितीर्णं खाण्डवप्रस्थं स्वांशतया लब्ध्वा ते कृष्णसाहाय्येन तद्वने निर्मितायाममरावतीमप्यतिशयानायां राजधान्यां सुखमूषुः। ततः प्रभृति स प्रदेश इन्द्रप्रस्थ इत्यभ्यधायि।

अथैकस्य वस्तुनो युगपद्बहुभोग्यत्वे विवादस्य नियतत्वमुद्भाव्य कालभेदेनानुभवनीयत्वं व्यवस्थापयतो दूरदर्शिनो नारदस्य वचनेन द्रौपदीमानुपूर्व्या प्रतिवत्सरमेकैकभोग्याम्, तल्पान्तरस्थामवलोकयतो द्वादशवार्षिकप्रवासं चाश्रुत्य समयं परिपालयन्तस्ते पश्चापि वज्रलेपा इव परेषामभेद्यतमा बभूवुः। जातुचिच्चौरैर्ह्रियमाणं कस्यचिद्विप्रस्य गोधनं प्रत्याहारकः शस्त्रागारं प्रविशंस्तत्र सभार्यमेकासनस्थं ज्येष्ठं पश्यन्निवृत्तोऽर्जुनो गवानयनानन्तरं यथासन्धं प्रायश्चित्तीयन् भ्रातृभिः कृच्छ्रेण विमुक्तो गृहात्प्रवव्राज। प्रव्रजंश्च स गङ्गाद्वारे तीर्थमवगाहमानो बलात्स्वपदं नयन्त्या कामयमानया नागकन्ययोलूप्या सह तां रात्रिमुषित्वा, ततो जलचरादभयवरं लब्ध्वा पुनर्निवृत्तो नानादेशान्क्षेत्राणि च निषेवमाणश्चित्रसेनस्य राज्ञो दुहितरं चित्राङ्गदां तदात्मजप्रत्यर्पणशुल्केनोपयेमे। तत्र तया सह संवत्सरत्रयं विहरंस्तस्यां बभ्रुवाहननामानं पुत्रमुत्पादयामास। ताननुज्ञाप्य समुद्रे स्नास्यंस्तत्र मुनिशापेन ग्राहतां गताः पञ्चाप्सरसो मोचयन्क्रमेण प्रभासतीर्थं प्राप्य, तत्र संगतेन कृष्णेन सह रैवतगिरिं प्रातस्तद्भगिन्यां सुभद्रायां मनो

बबन्ध। सोऽपि स्वसुरुद्वाहकालप्राप्तिमुभयोरानुरूप्यं च पश्यन्नन्तरायभूतं ज्येष्ठं वञ्चयितुं तस्य यतित्वं कल्पयित्वा स्वयमुदासीन इवास्त। उत्तानस्वभावो रामस्तु तत्र तत्र चरन्तं तं कपटसंन्यासिनं स्वगृहमानीय पूजयञ्श्रद्धालुतया तत्रैव कंचित्कालं वासयामास। तथा वसन्स पार्थस्तीर्थयात्राच्छलेन भगवता सर्वेष्वपवाहितेषु, सुभद्रामादाय स्वपुरमाजगाम। पश्चाद्विदितवृत्तान्तेन कृष्णानुनीत्या विनीतक्रोधेन बलदेवेन पारिबर्हप्रेषणेन तयोर्वधूवरभावोऽनुमेने। सुभद्रायामभिमन्युर्नाम पुत्रो जज्ञे। द्रौपद्यां तु प्रतिविन्ध्यसुतसोमश्रुतकर्मशतानीकश्रुतसेनाख्याः पञ्च पुत्राः क्रमात्पञ्चभ्योऽपि जाताः। मनोजवसास्ते कुमाराः पार्थादेव सर्वामस्त्रविद्यामशिक्षन्त।

अथ निदाघसमये स्त्रीभिः सह यमुनातीरे विहरन्तौ कृष्णार्जुनौ बभ्रुकेशो हिरण्यवर्णः कश्चिद्ब्राह्मण उपेत्य 'क्षुधितोऽस्मि, ममाभीष्टमन्नं दत्त'मिति ययाचे। 'कस्त्वं, कीदृशं वान्नं तवाभीष्ट'मिति पृष्टः स पुनर्बभाषे 'अहं किल हुतभुक् राज्ञः श्वेतकेतोर्द्वादशवार्षिके सत्रेऽविच्छिन्नयाऽऽज्यधारया मन्दशक्तिर्भवंस्तत्रभवतः परमेष्ठिनः शासनेनागदंकारैः सत्त्वैरोषधिभिश्च संपन्नमिदं खाण्डववनं भक्षयितुं घटमानः सख्युस्तक्षकस्य रक्षणोद्यतेन मघोना शमितोऽस्मि। एवं सप्तकृत्वो वितथप्रयत्नः पुनर्धातुरादेशेन भवन्तौ शोकापनुदौ प्रतीक्ष्य स्थितोऽस्मि' इति। 'आवयोः सांग्रामिकमुपकरणं संपादय, तेन तवार्थं साधयावः' इत्यर्जुनेनोक्तः सः, श्वेताश्वं कपिलक्षणं दिव्यं रथं, अक्षय्यौ निषङ्गौ, गाण्डीवाख्यं महत्कार्मुकं च वरुणादादाय तस्मै प्रायच्छत्। तथा भगवते दिव्यं चक्रं, कौमोदकीति गदां च। तदनु स्वानुमत्या तदरण्यं

दहतो धूमकेतोर्निर्वापणायोद्यतस्य मेघवाहनस्य व्यवसायं शरपञ्जरेण मोघयन्स श्वेतवाहनस्ततो बहिरपसरतोऽपि जन्तूंस्तस्मिन्नेव जुहवामास। तक्षकस्य त्वसन्निधानेन तत्स्त्री पुत्रमश्वसेनं ग्रसित्वोत्पतन्ती, पार्थेन ग्रीवायां खण्डिता व्यापद्यत। तत्पुत्रस्तु च्छिन्नवालः कथंचिन्मोचितः। वृत्रहा तु सव्यसाचिना सह चिरं युद्ध्वा, तमजय्यं मन्वानः पुत्रात्पराभवं बहुमन्यमानोऽपाक्रामत्। ततः स्वतेजसा गुप्तांश्चतुरो मन्दपालमुनिपुत्रान्विना सर्वं तद्वनं पञ्चदशाहमविश्रान्ततया सतृणमश्नन्ननलस्तत उत्पतन्तं मयासुरं जिघत्सुरर्थयामास। तथेत्युद्धृतारिणि दैत्यारौ सुतरां भीतः स सुरारिविश्वकर्मा 'बीभत्सो! मां पाहि' इत्याक्रन्दति स्म। 'मा भैषीः' इति तेन दत्ताभयः सन्नमरत्वलाभनिर्विशेषां प्रीतिं प्राप्य मुमुदे।

॥ इत्यादिपर्व ॥

## सभापर्व ।

ततस्तथा मुदितः स शिल्पी सानुनयं पार्थमाबभाषे—'भो व्यसनबान्धव, अकारणवत्सलस्य भवतः प्रीतिभाजनेन सभाजनेनात्मनः कृतकृत्यतां गन्तुमिच्छामि। तदादिशतु भवान्' इति। स तु 'नन्वनेन तव सूनृतेन वचसैव सत्कृतोऽस्मि। न हि कार्यान्तरं पणित्वा कृच्छ्रान्मोचनं धर्मः' इति बहुवारं ब्रुवन्नपि यदा तदभ्यर्थनां कदर्थयितुं समर्थो न बभूव, तदा सख्युः कृष्णस्याभिमताचरणमनुमेने। तस्मिन् राज्ञि सभानिर्माणमादिश्य द्वारकां गते, मयो मनसाप्यचिन्त्यवैभवां सभां निर्माय युधिष्ठिराय निवेद्य गुर्वीं गदां भीमाय, देवदत्तं नाम शङ्खमर्जुनाय च प्रतिपाद्य तेषां बहुमतो यथागतं गतः।

तामध्यासीनो राजाभ्यागतं नारदमर्चयन्पप्रच्छ—'अप्यस्ति काचिदीदृशी सभा। यदि ततो विशेषं जिज्ञासे' इति। तथेति तेन प्रजापतिपञ्चमानां दिक्पालानां सभासु वर्णितासु किंचिदिव कुतुकितोऽब्रवीत्—'देवर्षे, किंप्रभावः स राजर्षिर्हरिश्चन्द्रः, यदितः प्रयातेषु बहुषु राजसु, तमेकमिन्द्रसभायामितरांश्च यमसभायां वर्तमानान्कीर्तयसि' इति। स च पुनः प्रत्याह—'पाण्डव राजसूयमेकमेवेन्द्रसभां प्रति राज्ञां सोपानम्। तं क्रतुं स आजहार, न त्वन्ये। क्रियानुरूपा हि सिद्धिः। तव पिता पाण्डुर्मन्मुखेन त्वामनुशास्ति—'आयुष्मन् युधिष्ठिर, आहर राजसूयम्। बलवती मे सुधर्मारोहणाशंसे'त्युक्त्वा पुनरपि साभ्यर्थनं मामिदमाह 'भगवन्, नह्ययं काल-

हरणक्षमोऽर्थः। तदनेनैव पथा पुत्रमुद्योजयितुमर्हसि' इति। एष ते गुरोः संदेश' इति ब्रुवन्नेव प्रस्थितः। तथा व्यवसितमतिः स राजा शौरिमानाय्य तेन सह मन्त्रयामास। स आह—'राजन्! सर्वं राजकं वशीकुर्वता हि राजसूय आहर्तव्यः। अत एव प्रायेण खिलीभूतोऽयं पन्थाः। तं यदि नूतनयितुमभिलषसि, तदा प्रथमं मागधस्य निग्रहोपायं प्रतिपद्यस्व। स चण्डकौशिकप्रसादलब्धमाम्रफलं विभज्य भुक्तवत्योर्जनन्योः शकलद्वयात्मना जातस्ताभ्यामुज्झितो जराख्यया राक्षस्या संहितो जरासंधो बभूव। पुनश्च तस्मान्मुनेर्बहून्वराल्लँब्ध्वोत्सिक्तः। स नरपशुना पशुपतिं यष्टुं षडशीतिं राज्ञोऽजनिरोधं गिरिव्रजे निरुध्यन्नास्ते। तन्निग्रहे च तव साम्राज्यं तदुपयोगिनी पुरुषद्रव्यसंपत् महाजनरक्षणफलं च भवति। तस्मादसुकरमप्यमुमर्थं कथमपि साधयितुं यतिष्ये' इति भीमार्जुनाभ्यां सह गिरिव्रजं वव्राज। जरासंधस्तु स्नातकवेषेणातिथ्यसमये प्राप्तांस्तांस्त्रीनर्चयंस्तेषां लिङ्गेन शङ्कितः, तान्दृष्टपूर्वांश्च मन्वानः पप्रच्छ—'ननु वेषविसंवादीदं ज्याकिणादि भवतां क्षत्रबन्धुत्वमूहयति। कृत्रिमेणाप्यनेन ब्राह्मण्येन नियन्त्रितोऽस्मि भवतामीप्सितं वितरीतुम्। तदलं छद्मना। तथ्येनैव सर्वं कथ्यताम्' इति। भगवान् प्रत्यवोचत्—'अहं सः, यः कुलाङ्गारस्य तव जामातुः कंसस्य हन्ता। अयं पुनर्बकहिडिम्बयोः संहर्ता भीमो नाम द्वितीयः कौन्तेयः। एष किलास्यावरजः, पश्यतामेव भवतां वीर्यशुल्कायाः पाञ्चाल्या जेता जिष्णुः। एते वयं त्वया निरुद्धान् राज्ञो मुमोचयिषवो द्वन्द्वभिक्षामर्थयामः' इति। तच्छ्रुत्वैव स जहास, परिजहास च कृष्णम्—'एह्येहि मातुलघातिन्, मन्ये

मागधं कुहकेन विजेष्यसे पतङ्ग इव पावकम्। असकृत्पलायितेन त्वया सह पुनरपि द्वन्द्वकथापि ह्रेपयति माम्। अर्जुनस्त्वक्षम एव मम प्रहारं सोढुम्। तदनेन योत्स्ये' इति भीमेन युद्ध्वा, तेन वीरणदारं दारितः। अथ कृष्णस्तान्सर्वान्क्षत्रियान्विमोच्य, 'यक्ष्यमाणस्य राज्ञो युधिष्ठिरस्य राजसूये भवद्भिः सर्वैरपि सर्वात्मना सहायैर्भाव्यम्' इति तान्विससर्ज। भयाच्छरणागतं जारासन्धिं सहदेवं तत्पितुः पदे प्रतिष्ठाप्य सर्वैरनुज्ञातः स्वपुरमाजगाम।

अथ द्रव्यसाध्यत्वाद्यागस्य, तदर्थं राज्ञा प्रेषितेषु चतुर्ष्वपि भ्रातृषु भीमः प्राच्यान्बहून्देशान्विजित्य, मातृष्वस्रीयेण शिशुपालेन सादरमभ्यर्हितः सन्मागधकर्णपौण्ड्रकादीन्करदीकृत्य, महता स्वापतेयेन निववृते। अवाच्यां तु सहदेवः शूरसेनादीन्विषयान्स्वविषयीकृत्य, माहिष्मतीं प्रविशंस्तदीशस्य नीलस्य राज्ञो जामातृत्वमुपगतेन वीतिहोत्रेण परीते स्वसैन्ये, 'भगवन्हव्यवाह, युक्तं नामेदं भवतः स्वार्थभूतं मिष्टान्नदातुरर्थं विहन्तुम्' इत्युपस्थाय प्रीतेन तेन करे दापिते सर्वमेव दक्षिणापथमनायासेनैव वशीकृत्य, लङ्केश्वरं विभीषणं दूतमुखेनोपहारं हारयन्प्रत्याययौ। प्रतीच्यां तु नकुलः पूर्वमेव दाशार्हेण वशीकृतेभ्यो दशार्णादिभ्यो दायमादाय दूतमुखेन यदुभ्यश्च निवेद्य, स्वमातुलेन शल्येन च बल्यर्पणेन तर्पितः पुनरेयिवान्। उदीच्यां त्वर्जुन आनर्तादीनि बहून्युपवर्तनानि प्रवर्तनेनैव स्ववशे वर्तयन्, दिवस्पतिकल्पं प्राग्ज्योतिषपतिं भगदत्तं च भागधेयदयन्, सर्वानपि पर्वतीयान्खर्वितगर्वान्कुर्वन्, हिमगिरिद्वारा मानससरः सरन्, तत्र गन्धर्वेभ्यो मण्डूकाख्यान्गान्धर्वानाहरन्, अमानुषगोचरेभ्य उत्तर-

कुरुभ्योऽप्यर्थराशिं समर्थयमानः पुनराजगाम। ततः स धनंजय इति च कथ्यते।

तदनु महान्तं रत्नराशिमुपायनीकुर्वता दाशार्हेण संभृतक्रतुसंभारो राजा सर्वांल्लोकानाह्वातुं तत्र तत्र दूतान्प्रहित्य, नकुलमुखेन धृतराष्ट्रादीन्स्ववर्गीणान्सबहुमानमानाययामास। अनतिलङ्घ्यशासनतया तस्य भूपतेः, अद्भुताकारतया विश्वकर्मसभायाः, अदृष्टपूर्वतया च महाक्रतोश्चातुर्वर्ण्यमन्यद्वा मानुष्यकमितरद्वा कृत्स्नं युगपदेव तत्राजगाम च यथार्हसपर्याम्। तथा समवेतानामपि संमर्दखेदानभिज्ञानां तेषां जनानामन्नपानादिनोपचाराय भीष्मादिष्वधिकृतेषु पैलादीनृत्विजो हौत्रादौ नियुज्य, स्वयं ब्रह्मत्वधुरां दधाने सर्ववेदे भगवति कृष्णद्वैपायने, यक्ष्यमाणो राजा याज्ञसेन्या सह दीक्षां चकार। अथ यथाविधि यथासवनं चानुष्ठीयमाने क्रियाकलापे, दीप्यमाने त्रेताग्नौ, उद्घुष्यमाणायां त्रिवेद्याम्, उत्तरोत्तरमुपचीयमानवाचोयुक्तिप्रपञ्चे सदस्यवर्गे, सा सभा द्वितीया ब्रह्मसभेव बभासे।

प्राप्ते तु सुत्याहे गृहीतार्घ्यो यजमानः सर्वां सभां समीक्षमाणः शान्तनवमिदमप्राक्षीत्—'पितामह, अत्र हि सर्वेऽपि महाप्रभावा अन्योन्यविशिष्टाश्च लक्ष्यन्ते। अतो न पारयामि विवेक्तुम्। भवत एव हि वायोरिव सूक्ष्मतमेऽप्यर्थेऽप्रतिहता गतिः। राजहंसमन्तरेण कोऽन्यो नीरक्षीरविवेकाय कल्पते। तदादिश सर्वेषामभ्यर्हिततमम्'। सोऽपि व्याचष्ट—'आयुष्मन् युधिष्ठिर, योऽयमस्यां संसदि भास्कर इव, परमया श्रिया दीप्यते स एवास्य जगद्वृक्षस्य मूलम्। एतस्मिंस्तर्पिते हि शाखास्थानीयस्य सकलस्य च चराचरवर्गस्य तृप्तिर्भवति।

नास्त्यस्मान्महनीयं किंचिदपि। तदेनं पुरुषोत्तममुत्तमया पूजया पूजये'ति। तथा तस्मिन्सहदेवेनार्चिते, तदसूयकः पूर्ववैरी शिशुपालस्तानुपालपते स्म–'अहो मन्दाः, महत्यस्मिन्समाजे ब्रह्मकल्पान्ब्रह्मर्षीन्, महेन्द्रकल्पान् राजर्षींश्चातीत्य कथमयं गोपालः प्रशस्यतमो भवताम्। प्रलपतु नामायं जरापस्मारगृहीतोऽजागलस्तन इव वृथा वृद्धो गाङ्गेयः। कथं भवतामपि मतिविप्लवः। महाभुजङ्गस्य पाटच्चरवृत्तेः कूटधर्मणोऽस्य पुरुषाधमस्य कथं वा पुरुषोत्तमता। नेयमर्हणा, किंतु भवतामेव गर्हणा। धिग्धिक्प्राज्ञमानिनोऽनभिज्ञान्' इति परिभाषमाणो बहुभिः क्षत्रियैः सहोदतिष्ठत्। तत्सान्त्वनाय घटमाने ज्येष्ठे—'वत्स, नायमनुनयार्ह' इति पितामहेन निषिद्धे, 'माधवद्विषो मूर्धानेन क्षिप्यत' इति वामचरणमुत्क्षिप्य दर्शयति सहदेवे, पुनः पुनरधिक्षिपतस्तस्य दुरात्मनः परुषाक्षरपरंपराविदीर्णकर्णो वृकोदरो दण्डाहतो महोरग इवोत्पपात। तमपि पितामहो झटिति निवारयन्निदमाचख्यौ—'आयुष्मन्भीम, येनायमोजायते तच्छृणु। अयं पुरुषपाशस्त्र्यक्षश्चतुर्भुजश्च जातो रासभवद्ररास। तेन हृणीयमानौ जिघांसू मातरपितरावशरीरिणी वाणीत्थमभाणीत्—'यस्याङ्कस्थोऽयं विकृतिं हास्यति, तेनैवास्य संस्था, तदलमायासेने'ति। अथ तत्र तत्र परीक्ष्यमाणोऽयं वासुदेवस्योत्सङ्गसङ्गमात्रेण प्रकृतिं प्रापद्यत; अस्य जननी तु विकृतिं प्रापद्यत 'कथमात्मनो भ्रातृव्य एवात्मजस्यापि भ्रातृव्यः' इति। याचमानायै तस्यै भगवान्—'पितृष्वसः तव पुत्रस्य शतमपराधान्मर्षयामी'ति वरमदात्। अतो भषत्येष भषकः। हरिरेनं साधयिष्यति' इत्युपरराम। पुनरपि परीवादमुखरस्य तस्य शिरसि चक्रधारापथं प्रापिते, तत्कले-

बरोत्थममानुषं तेजस्तमेव कारणमानुषं विवेश। तत्क्षणं राज्ञः शासनेन निर्वर्तितपितृकृत्यं शैशुपालिं धृष्टकेतुं पार्थश्चेदीनामीश्वरं व्यदधात्।

अनन्तरं वासुदेवो व्यासादिभिः सह यज्वानं युधिष्ठिरं पत्न्या सह साम्राज्येऽभ्यषिञ्चत्। अभिषिक्तेन तेन सम्राजा यथार्हमुत्तमेनैव कल्पेन ऋत्विगादयो ब्राह्मणा अन्ये क्षत्रियादयश्च पूजिताः सन्तस्तमनुज्ञाप्य तत्क्रतुवैभवमेवासकृत्प्रशंसन्तो यथाभिलषितमगमन्।

दुर्योधनस्तु तत्रैव कतिपयान्दिवसान्निवसंस्तथाविधेन तदुदयेनानातपोपयुक्त इवार्ककान्तः संततमन्तराहितसंतापस्तैरलंकृतां तां सभां प्रविशति स्म। आन्तरेण मात्सर्येण बाह्येन तत्प्रभाप्राचुर्येण चान्धंभविष्णुः सोऽन्धसूनुः प्रसन्नसलिलायां पद्मिन्यां स्थलभ्रमेण पतन्, पश्यतां सर्वेषां, विशेषतः कृष्णाभीमकृष्णानां प्रहसनास्पदं बभूव। सपदि कशाघातेनेव प्रतिनिवृत्तः स मानी द्वारबुद्ध्या बहिरद्वारेण निर्गच्छन्फाले निहतो भीमेन बहिर्गमितः पुरं गच्छन् शकुनिसमीपे विललाप—'मातुल मातुल, यद्यदस्माभिरपध्यातं तत्तदन्यथैव वृत्तम्। भीमस्य मारणोपायस्तु वारणायुतबलप्राप्त्युपायो बभूव। कृष्णवर्त्मप्रयोगस्तु कृष्णालाभवर्त्मासीत्। खाण्डववनविलम्भस्तु गाण्डीवोपलम्भहेतुरभूत्। अधुना तु युधिष्ठिरे दिवाकर इव दीप्यमानेऽहं दिवान्धः संवृत्तोऽस्मि। महान्तमर्थराशिमुपदीकृत्य 'अयमहम्, अयमहम्' इति राज्ञः समयं प्रतिपालयतां भूपानामेकतमेनापि नाहं गणितः, गजेन्द्रसंनिधौ मार्जारवदितश्चेतश्च धावन्। रत्नव्यये नियुक्तेन च मया सर्वं युगपत्क्षपयितुं प्रवृत्तेनाप्यक्षय्यतया तद्राशेः

तस्यैव राज्ञो वादान्यकगुणः पूरितो नात्मनो मनोरथः। चरमं सभावृत्तं, तत्र 'धृतराष्ट्रज' इति भीमसंबोधनस्याकूतं च त्वमेव जानासि। पार्थिवसार्वभौमादिशब्दाश्च निरुपचरितास्तस्मिन्नेव रूढाः। मम पुनर्गेहेनर्दिनः किमनया बलिभुग्जीविकया' इति प्रायमुपविवेश। 'भोः किमित्यस्थाने निर्वेदः। सदा व्युत्तिष्ठमानेन हि पुरुषेण भाव्यम्। यदि परेषामृद्धिं न सहसे, तर्हि देवनेन तामपहरामि। धनबलाभ्यां पक्षाभ्यामुद्यच्छमानोऽपि पुरुष उपायरज्जुना पार्यते शकुनिरिवाधः पातयितुम्। तदलं विषद्य' इति सान्त्वयता सौबलेन दत्तहस्तः स दुर्मतिः पितरं कथंचिदभ्युपगमय्य तेन देवनसभां कारयामास।

ततः प्रहितात्क्षत्तुराकर्णिततदीयदुर्मन्त्रः स सम्राट् "महद्धि व्यसनमिदं द्यूतं नाम। विकत्थिनः सुकृतमिव कितवस्य स्वं सद्य एव भोगेन विना विनश्यति। किमित्यशिष्टसेवितं वर्त्म गच्छेयम्। किमिति वा 'आहूतो न निवर्ते' इत्यात्मनो व्रतं जह्याम्" इति तयोर्गुरुलाघवं विमृशन्, सर्वनाशेनापि व्रतपरिपालनं वरमिति निश्चिन्वानो भ्रातृभिर्भार्यया च तां सभामयासीत्। आगच्छन्नेव स शकुनिनाहूतस्तथेति तेन देवितुमारेभे। तत्र सभिके लग्नके च दुर्योधने, स धूर्तैकधुरो गान्धारः अयं धनराशिः, इयं रत्नराजिः, इयं रथकड्या, इदं पादातम्, इयं ग्रामता इति युधिष्ठिरेण यो यो ग्लहः पणितस्तं सर्वं घर्मांशुरिव रसाया रसं क्षणेन चुचूष। अथ क्रमेण सहदेवादीन्भ्रातृनात्मानं च पणीकृत्य पराजितः सन् 'द्रौपद्या दीव्य' इति तेन कीर्तिते तथेति तां पणयामास। तस्यां च जितायां

'जितोऽस्मि' इति वदन् स पार्थिवो निस्तरङ्ग इव तरङ्गमाली स्वयं तूष्णीमुपरराम।

तावदेव जितकाशी सुयोधनहतकः कृष्णां सभामानेतुं क्षत्तारमुद्धतमादिशस्तेनाधिक्षिप्तः संस्तद्वचनमसत्कृत्य प्रातिकामिनं प्रजिघाय। तेन निवेदितार्था सा देवी वज्रपातेनेव विदीर्णहृदया तमाह—'भद्र सूत, पृच्छ तं कितवं राजानं, प्रथमतरं किमहं पराजिता, उत भवान्। तज्ज्ञात्वाहमागच्छामि' इति। तेन तथा पृष्टे तस्मिन्वाचंयमवत्तूष्णींभूते, 'इहैव सा चासौ च विवदेतां, शीघ्रमानय' इति पुनर्दुर्योधनप्रेरितः स तथा गत्वा पुनश्च तस्या उक्तिमादाय सभ्यानिदमाह—'शृणुत सर्वे राज्ञ्या विज्ञप्तिं यदत्र धर्म्यं तदादिशत, सज्जास्मि तथानुष्ठातु'मिति। तेषु भयेनानेडमूकवत्स्थितेषु दुर्योधनस्यानन्तरजो भ्राता दुःशासनो ज्येष्ठस्य शासनेन तां केशपाशेषु गृहीत्वा सभायामाचकर्ष। तेन बहुतरं क्लिश्यमाना सा कृशाङ्गी—'पापात्मन्, कथमन्यदारान्स्पृशसि, कथं वा मलवद्वाससं गुरुजनसंकुलं सदो नयसि। ननु मन्दात्मन्, आत्मनस्तपो भर्तॄणां मतं च रक्षन्त्या हि मयोपेक्षितो जीवसि। भोः सदस्याः, किं सर्वेऽपि भवन्तः पश्यन्त एव न पश्यन्ति। किमहं कुरूणां दासीभूता वा न वा। विविच्य ब्रूत। ननु भवन्तोऽपि कलत्रदुहित्रादिमन्त एव। परस्य संकटेष्वात्मानमुपमिमानो हि साधुर्भवति। किमिदमरण्यरुदितं, येन न कश्चिदपि प्रतिपद्यते' इति विललाप। भीष्मस्त्वाह—'शृणु भद्रे, कथमात्मनोऽप्यनीशस्यान्यत्र स्वाम्यम्, कथं वा धर्मनित्यो युधिष्ठिरोऽस्वाम्यकं

ग्लहयेदिति विप्रतिपत्त्या विविच्य वक्तुं न पारयामि’ इति। ‘ननु किं स्वयं दिदेविषुणा राज्ञा पणितम्। अनक्षज्ञताम्, आह्वानेऽप्रत्याख्यानव्रतं चास्य राज्ञश्छिद्रं पश्यद्भिः परैर्बलात्प्रतारितस्य चेष्टितमपि कथं प्रमाणयन्ति भवन्तः’ इति विक्रोशन्त्यास्तेन दुरात्मना दोधूयमानायास्तस्या राजपुत्र्याः कटाक्षाङ्कुशताडितो वृकोदरः क्षुभितमतिरिदमुज्जगार—‘आहराहर सहदेव वह्निं, अपण्यां सुकेशीं पणितवन्तौ राज्ञः करौ दिधक्षुरस्मी’ति। तत्क्षणमर्जुनः—‘भीमसेन, कथमेवमभूतपूर्वमसमीचीनं च प्रलपन्परेषामन्तरं प्रयच्छसि। सर्वात्मना प्रभुर्ह्ययमस्माकम्। नियच्छ जिह्वाम्। इदं हि यशस्यं संपत्स्यते’ इति तं शमयामास। अथ दुर्योधनस्यावरजो भ्राता विकर्णस्तस्याः क्लेशमसहिष्णुरिदं व्याजहार —‘भो भोः सभ्याः, किमिति सर्वे जोषमाध्वे। शृणुत मे मतम्—कथमिमां पञ्चसाधारणीमेकस्य पणायितुमधिकारः। कथं च वा पराधीनीकृतात्मनः स्वांशे च प्रभुता। न चायमिमामात्मना पणयामास। सर्वमुपधिना हरतानेन सौबलेन पणनाय कीर्तितामिमां मोहविवशोऽयं तथेत्याह। न हि व्यसनपतितस्य चेष्टितं व्यवहारसहम्। अतो मन्ये सर्वथेयं पाञ्चाली न जितैवे’ति। तदनु युगपदेव साधुवादे समुद्भूते, तं निवारयन् कर्णो विकर्णं परिभाषते स्म—‘रे रे प्राज्ञमानिन्ननात्मज्ञ, कथमियमदासी। पश्य रे मूर्ख। सामुदायिकं द्रव्यमेकदेशिना पणितं सदितरैरंशिभिरनाक्षिप्तं यदि, तस्य सर्वैरेव पणितत्वमार्थिकं हि। अर्धं ह्यात्मनः पत्नी। पराजितं पौंस्नमंशमजितेन स्त्रैणांशेन प्रत्याहर्तुं राज्ञा यतितं यदि, कोऽत्र मोहः, कश्च वा

गान्धारस्यापत्याय:। अहो कोमलप्रज्ञोऽसि। अथ वा दुःशासन, अस्या दास्या एषां च वासांस्यपहर' इत्यादिदेश।

तत्क्षणं तेषु स्वमुत्तरीयमपास्य भूमिष्ठेषु दुःशासनेनाकृष्यमाणवसना सा बाला तस्मिन्महाजनसमवाये कञ्चिदप्यात्मनस्त्राणायापश्यन्ती दीनबन्धुं देवं हृषीकेशं कृष्णं मनसा शरणं ययौ। सद्य एव तदाज्ञया धर्मदेवता तामद्भुतैर्वस्त्रैरावृणोत्। स नीचो दुःशासनस्तस्या बहूनि वसनान्याकृष्य स्वयं श्रान्तो व्यरंसीत्। भीमस्तु युधि तद्वक्षोरुधिरपानमातस्थे। अनन्तरं च 'अत्रास्व' इति वस्त्रमाकृष्य तस्यै दुर्योधनेन वामोरौ दर्शिते, तं गदया समरे भिनद्मीति द्वितीयां प्रतिज्ञां चक्रे। अथानिमित्तदर्शनेन शङ्कितो धृतराष्ट्रो द्रौपद्यै वरदानव्याजेन तेषां सर्वस्वमपि प्रत्यर्प्य, तानिन्द्रप्रस्थाय प्रस्थापयामास।

दुर्योधनस्तु दुःखितः पित्रे न्यवेदयत्—'तात, भीमादयोऽतिमात्रं संरम्भिणो यान्ति। मन्ये संप्रहार आसन्नतरः। अतः प्रागेव ते निग्राह्याः। तदाकारय तान्पुनर्द्यूताये'ति। तेन तथाहूतो युधिष्ठिरो दैवमपरिहार्यं मन्वानो निववृते। पराजितस्य स्ववर्गीयैः सह द्वादशवार्षिकं वनवासम्, पश्चादेकं संवत्सरमज्ञातवासं, तदा यदि तेषु कश्चिदपि ज्ञायेत, ततः सर्वेषामेव पुनर्वनवासादि, तावत्तदीयधनं जेतुर्वशगमिति चैकं ग्लहं विधाय पुनर्द्यूते प्रवृत्ते, प्राग्वद्युधिष्ठिरः पराजितः सन् वनाय प्रतस्थे। तदा 'गौर्गौः' इति पुरो नृत्यति दुःशासने कटुकभाषिषु च कर्णादिषु, कुपितो भीमः सर्वेषां धार्तराष्ट्राणां वधाय तृतीयां प्रतिज्ञां चक्रे। तथा पार्थः सानुबन्धस्य

कर्णस्य, सहदेवः शकुनेः, नकुलो धार्तराष्ट्रानुयायिनां च वधाय प्रत्येकं प्रतिज्ञां कृतवन्तः। अथ ते मातरं विदुरे न्यासीकृत्य सभार्या-सपुरोहिताश्च नगरात्प्रवव्रजुः।

॥ इति सभापर्व ॥

# वनपर्व ।

एवं प्रव्रजन्तस्तेऽनुव्रजतः पौराननुनयेन निवर्त्य, आनुयात्रिकैरिन्द्रसेनादिभिः, कैश्चिद्ब्राह्मणैश्च सह गङ्गातीरे तां निशामनैषुः। परेद्यवि कृताञ्जलिको राजा तान्द्विजानिदमाह—'विप्रर्षभाः प्रतिज्ञासरितमुत्तीर्य, पुनर्भवतां गोष्ठीं प्रवेष्टुमभिलषामि' इति। 'गुणसिन्धो पौरव, दानावर्जिता हि द्विजा मदान्धमपि न वर्जयन्ति, किं पुनर्भवन्तम्। वैखानसवृत्तयो वयं भवतः क्लेशं लघयितुमाशंसामहे' इति। तैः प्रत्युक्तः स पुरोहितमपृच्छत्—'भगवन्, एवमेते निर्बध्नन्ति, न युक्ता ह्यमीषां मदग्रे स्वव्यापारेण देहयात्रा। न चाधुना भ्रातॄनुपरोद्धुं धृष्णोमि। तदेषां भरणोपायं विमृशतु भवान्' इति। अथ तदुपदिष्टेन मन्त्रेणार्यमणमुपस्थाय स तस्मात्ताम्रपात्रमविन्दत्। तत्र पक्वमन्नादि मितमप्याद्रौपदीभोजनमक्षय्यं भवति। तेन ब्राह्मणादीन्संतर्पयन् वनेऽपि स राजा दानपतिर्बभूव। ततः काम्यकं यान्तस्ते मार्गमुपरुन्धति किर्मीराख्ये बकासुरभ्रातरि भीमेन तद्भ्रातुः सस्थानं प्रापिते, तद्वनमेत्य तत्र न्यूषुः।

स्वपुत्रनिन्दया पाण्डवप्रशंसया च कुपितेन धृतराष्ट्रेण निरस्ते क्षत्तरि युधिष्ठिरसमीपगते तेनैव पुनश्च प्रत्याहृते च सति, तं संध्यर्थं घटमानं मत्वा, ततः प्रागेव वनस्थानपि तानभियोक्तुमुद्युक्तो दुर्योधनो व्यासेन निषिद्धो विरराम। अथ तदाज्ञया 'ज्ञातीनां मिथो भेदो न युक्तः' इत्युपदिशन्मैत्रेयः स्ववाक्यमनादृत्य, स्वोरौ ताडयन्तं तं धार्तराष्ट्रहतकं, 'तवोरुं भीमो भेत्स्यति' इति शप्त्वा जगाम।

तदनु वनस्थांस्तान्द्रष्टुमागतो हरिस्तेषां तथाविधया दशया कुपितः सन् 'तदानीं साल्ववधव्यग्रतयास्माभिरागन्तुं न पारितम्। अधुना तान्हन्मि' इत्युत्तिष्ठन् 'चतुर्दशे वर्षे सर्वं करिष्यसि' इत्यर्जुनेन सान्त्वितः स्वसारं तत्पुत्रं चादाय द्वारकामाप। तथा धृष्टद्युम्नादयो द्रोणादीनां वधं प्रतिज्ञाय, प्रतिविन्ध्यादिभिर्भागिनेयैः सह स्वमावासमगमन्।

अथ द्वैतवने वसन्स एकान्ते जातुचित्कृष्णयाभ्यधायि 'आर्यपुत्र, जाने कुरुसदसि भवता सहजं तेजोऽपि पणीकृतम्। अन्यथा अत्युत्कटो व्यतिक्रमो दुर्बलमपि विक्रमयति' इति लोकोक्तिर्महाक्षत्रिये त्वयि कथं व्यभिचरिता। आततायिनि क्षान्तिरिति विप्रतिषिद्धमिदम्' इति। 'अयि कल्याणि, नियतितन्त्रो ह्ययं लोको, न पुनः स्वतन्त्रः। स्वतन्त्रे तु क्षान्तिरक्षान्तिश्च। अक्षान्तो हि पशुरेव न पुरुषः। क्षान्तिर्बलवतां भूषा, दुर्बलानां तु परायणम्। तद्भद्रे, प्रतीक्षस्वावामं दैवम्' इत्याश्वासयन्तं तं ज्येष्ठं वृकोदरोऽवादीत् 'आर्य, त्रयोदशे वर्षे कथमज्ञातचर्यां पारयिष्यामः। न ह्यादित्यः प्रतलेन पिधातुं शक्यः। ततश्च पुरुषायुषव्रतं भविष्यति। यो यद्धर्मा तं तद्धर्मोपचरेदिति हि नीतिवादः। संवत्सरप्रतिनिधित्वेन क्वचिन्मासोऽपि गण्यते। अतीताश्च त्रयोदश मासाः। तं न्यायमत्रातिदिश। व्यपदिश प्रतिज्ञां पारिताम्। आदिशास्मान्परेषामवरोधकबरीर्विकारयितुम्। कारयितुं चास्यास्तपस्विन्याः कबरीसंयमनम्' इति। तत्प्रसङ्गाद्भीष्मादीनामतिरथानां दुर्जयत्वमाकलय्य दुर्मनायमाने राजनि, भगवान्बादरायणः स्वयमागत्य तस्मै प्रतिस्मृतिं

नाम विद्यामुपदिदेश। आदिदेश च तया विद्यया दिव्यास्त्रसंग्रहायार्जुनं प्रेषयितुम् ।

तेन तथा नियुक्तो गुडाकेशस्तद्विद्याबलेनाविश्रान्त एव गच्छन् पथि संगतेन विप्रवेषेण शक्रेणानुमतः सन्, शैशिरगिरौ महेश्वरप्रसादाय तपश्चचार । क्रमेणाब्भक्षे वायुभक्षे च तस्मिन्धनंजये निश्चलया मनोवृत्त्या काष्ठमुनिवत्तिष्ठति, हृदि वास्तव्यस्य कृशानुरेतसः समुज्ज्वलनादिव तन्मूर्धोत्थो धूमो निखिलमपि विष्टपं तापयति स्म । वराहरूपेण मूकाख्येन दानवेन विहतनियमः स यावद्गाण्डीवे शरं संधत्ते, तावत् 'मा प्रहर मा प्रहर मया परिगृहीतपूर्वोऽस्मिन्' इत्युदात्तं वदन् स्त्रीमण्डलपरिवृतः किरातसंस्थानः कश्चिदपूर्वः पुरुषः समदृश्यत । तमनादृत्य पार्थप्रयुक्तेन, तथा तत्प्रयुक्तेन च द्वाभ्यां शराभ्यां युगपत्पार्श्वद्वये च विद्धः सोऽसुरो घरट्टयन्त्रान्तर्गत इव निष्पिष्टो ममार । ततस्तेन किरातेन प्रवृद्धसंप्रहारो गाण्डीवी सर्वैरस्त्रशस्त्रैरपि प्रहृत्य क्षीणायुधो धनुर्दण्डेन तं मूर्ध्नि जघान । तदपि ग्रसमानेन तेन द्वंद्वेऽपध्वस्तः स मृण्मय्यां मूर्तौ पुरहरमावाह्य, विजयार्थी विजयो भक्त्या पूजयामास । अथ मूर्तौ स्वेनार्चितं पुष्पं तस्य किरातस्य शिरसि पश्यन्नर्जुनः किरातवेषेण महेश्वरमागतं निश्चित्य तमसकृत्प्रणम्य तुष्टाव । भगवानपि स्वरूपेणाविर्भवन् 'वत्स पार्थ, तुष्टोऽस्मि, गृहाणेदं पाशुपतास्त्रम् । इदं कृच्छ्रादन्यत्र मानुषेषु च न प्रयोज्य'मिति समयेन स्वमस्त्रं वितीर्य तदस्त्राणि च प्रत्यर्प्य स्वयमगोचरो बभूव ।

अथ यथाप्रदेशमाविर्भूतेभ्यो यमादिभ्यस्त्रिभ्यो दिक्पतिभ्यो गृहीतास्त्रमात्मजमिन्द्रः 'वत्स कौन्तेय, मल्लोकमागतस्य ते सर्वं साधयामि

इत्युक्त्वा तैः सह तिरोदधे। तत्क्षणमागतेन दिव्यरथेन स्वर्गं प्राप्तः स तत्र स्वपितुः सकाशात्सर्वामस्त्रविद्यामवाप्य, गन्धर्वराजाच्चित्रसेनाद् गान्धर्वं च सामस्त्येन जग्राह। कदाचिदुर्वशी विविक्ते पार्थमाह—'कुमार, बह्वीष्वप्सरस्सु नृत्यन्तीषु मय्येव तव दृष्टिः ससञ्ज। तदिङ्गितज्ञेन तव पित्रा त्वयि नियुक्तां स्वयं चानुरक्तां मां विजानीहि' इति। 'नन्वस्मदन्वये पूर्वतमस्य पुरूरवसः प्रियतमेयमिति प्रपितामहीप्रतिपत्त्या हि मया त्वमीक्षिता। कथं नतरि मयि तवानुरागः। मुञ्च मुञ्चेममसदाग्रहम्' इत्यर्जुनेन विगर्हिता सा 'त्वं षण्ढः सन् नर्तको भविष्यसि' इति क्रुधा तं शशाप। सहस्राक्षस्तु भाविन्यामज्ञातचर्यायां तच्छापस्योपयोगं तदन्तेन तदन्तं च व्यवस्थापयामास।

'आर्य, चतुर्दशे वर्षे पुनरपि तैर्देवनायाहूतः किं वक्ष्यसि। अयमेव हि न्यायस्तदापि भविष्यति। नह्ययं परेषामगोचरोऽर्थः। एवं च यावज्जीवं व्यसनमहोदधौ प्लाविताः स्मः' इति भीमेनोक्ते, तस्यापरिहार्यतामाकलय्य राजा निशश्वास। अत्रान्तरे बृहदश्वो नाम महर्षिः प्रोवाच—'शृणु सम्राट्, निषधेषु नलो नाम राजासीत्, यं पुण्यश्लोकमाहुः। स ह्यनक्षज्ञोऽपि दमयन्त्याः कृते कलिना प्रवर्तितः पुष्करेण द्यूते पराजितः स्वपरायणां भार्यामर्धवाससं वने परित्यज्य परिभ्रमन्नृतुपर्णाद्राजर्षेरश्वहृदयविनिमयेनाक्षहृदयमवाप्य, ततः कलिं निर्धूय कलत्रपुत्रादिभिः सहितः पुनरपि स्वं राज्यं यथापुरं शशास। न ह्यक्षज्ञो द्यूते पराजीयते। यथा भवानपि परान्विजित्य पित्र्यं भागमवाप्स्यसि' इत्युक्त्वा तस्मा अक्षहृदयमुपदिदेश।

तावत्पुरंदरप्रहितो लोमशो नाम महर्षिरर्जुनस्य योगक्षेमवर्णनेन युधिष्ठिरमाश्वासयन्सपरिवारं तं तीर्थयात्रायां प्रवर्तयंस्तत्र तत्र तत्तन्माहात्म्यं व्याचक्षाण इदमाह—'अत्र सिन्धोः पाता, नहुषस्य पातयिता, वातापेर्जरयिता, लोपामुद्राकमिता मुनिस्तपस्तेपे। इदमङ्गदेशावग्रहनिग्राहकस्य लोमपादजामातुर्विभण्डकसुतस्यर्श्यशृङ्गमुनेरायतनम्। अत्र गिरौ त्रिः सप्तकृत्वो विशसितक्षत्राङ्कुरस्य जामदग्न्यस्याश्रमः' इति निर्दिशन्प्रभासतीर्थं प्राप्य तत्र वासुदेवादिभिः सान्त्वितमजातशत्रुं सगणमन्यत्र नयन्नाह—'इयमश्विनौ सोमपीथिनौ कृतवतः स्तम्भितवज्रहस्तहस्तस्य सुकन्याजानेर्भार्गवच्यवनस्य सिद्धिभूमिः। एषा पुत्रशोकेन निर्विण्णस्यात्मानं पाशैर्बद्ध्वा पतितवतो वसिष्ठस्य विपाशीकरणाद्विपाशा नाम नदी। इदं श्येनकपोतात्मनागताभ्यामिन्द्राग्निभ्यां परीक्षितस्य शिबेः स्थानम्। इयं वादे पितृजेतारं वन्दिनं विजित्य स्नातवतोऽष्टावक्रमुनेरङ्गानां समीकरणात्समङ्गा नाम सरित्। एतद्रैभ्यापराधेन मारितस्य यवक्रीतस्य देवताप्रसादेन पुनरुज्जीवनस्थानम्' इति दर्शयन्कुलिन्देश्वरस्य सुबाहोर्विषयं प्रापयामास। तत्रेन्द्रसेनादीन्निक्षिप्य सितपरिवारः पार्थिवो गन्धमादनं गच्छन्गन्तुमशक्तां द्रौपदीं वोढुं स्मृतेन सपद्यागतेन सपरिवारेण घटोत्कचेन सर्वानिवात्मना सह वाहयन्बदरिकामभजत।

तत्र गन्धवहानीतेन सौगन्धिकेन पुनस्तादृशाय कुसुमाय स्पृहयन्त्यां प्रेयस्यां, तन्मनोरथं पिपूरयिषुर्गन्धवाहनन्दनस्तल्लक्ष्येण प्रागुदीचीं दिशं गच्छन्पथि शयानेन महता वानरेण निरुद्धगतिस्तं यदा स्वयं चलयितुमपि न शशाक, तदा 'नायं प्राकृतः कपिः' इति

मत्वा तं प्रणम्य तस्य तत्त्वमपृच्छत् । सोऽपि स्वां कथां कथयामास—'तात मारुते, तव भ्रातरं श्रीरामदासमाञ्जनेयं मां विद्धि । वत्सस्य तव दिदृक्षयात्र स्थितोऽस्मि । तद्भद्र, भाविनि युद्धे तवानुजस्य रथे तिष्ठन्साह्यं कर्तास्मि' इत्युक्त्वा तदभ्यर्थनया विश्वरूपं च दर्शयित्वा स्वयमन्तरदधात् । भीमोऽपि भ्रातुर्हनुमतो विश्वरूपं मनसा भावयंस्तां नलिनीं प्रविश्य प्रहर्तुमुद्यतानि तद्रक्षीणि रक्षांसि च निहत्य स्वैरं पुष्पाण्यवचिकाय । वैश्रवणस्तु तदाहरणमनुमन्यते स्म । युधिष्ठिरस्तु शङ्कितस्तत्रैत्य तेनानुजस्य चेष्टितेन व्यथितस्तं विनयंस्तेन सह पुनर्बदरिकामगात् । तत्र जटासुरो नाम निशिचरो विप्रच्छन्ना राज्ञा सत्कृतो वसन्, भीमे बहिर्गते सर्वांस्तान्हरन्पथि यदृच्छया संगतेन तेन चूर्णपेषं पिपिषे । ततस्ते गन्धमादनस्योपत्यकायामार्ष्टिषेणाश्रममासाद्य तेनादृतास्तत्रैव कञ्चित्कालं निन्युः ।

महाह्रदादुड्डयमानस्य नागाशनस्य पक्षवातेनाधो विक्षिप्तैः पञ्चवर्णैः पुष्पैराक्षिप्तचित्तायाः कृष्णायाः कृतेऽधित्यकामारुह्य तान्यवचिन्वन्वृकोदरस्तत्र विघ्नमाचरतो राक्षसान्मणिमन्नाम्ना तदध्यक्षेण सह क्षपयामास । तच्छब्देन शङ्कितः सर्वैः सह तं देशमभिपत्य तत्कर्मणा हृणीभूतोऽजातशत्रुः 'भद्र, किं पुनः पुनरुक्तेन । मम प्रियमिच्छसि चेदेवं साहसिको मा भूः' इति तं व्यनैषीत् । अथागतः कुबेरो भयेन प्रणतांस्तानाह—'पाण्डव, निष्ठीवनकुपितेन कुम्भसंभवेन शप्तोऽयं सपरिवारो मम सखा मणिमान् । अत एव तव सोदर्येण हन्यमानोऽयं मयोपेक्षितः । शीघ्रमेव फल्गुनोऽत्र समागमिष्यति । तावदत्रैव सुखं वसत' इत्यादिश्य प्रययौ ।

अर्जुनस्तु तानि तानि दिव्यास्त्राण्यवाप्य निदाघचण्डांशुरिव दुराधर्षतेजाः सहस्रधुर्येण रथेन संवत्सरपञ्चकस्यान्ते भ्रातॄणामक्षिपथमवततार। द्राघीयसा विरहेणाक्षिण निरूढमन्धतमसं, तमोऽपह इवापगमयन्, उत्कण्ठाजनितं तापं सुधांशुरिव नुदन्, गाण्डीवी सबहुमानं मातलिं प्रत्यावर्त्य, भ्रातृभ्यः प्रस्थानादिकमुर्वशीसंवादान्तमात्मवृत्तान्तमुक्त्वा, पुनर्बभाषे—'कृतास्त्रं मां भगवान्दिवस्पतिः सांग्रासिकाणि सर्वोपकरणानि कल्पयन्निवातकवचवधाय प्राहिणोत्। सोऽहं तथेति मातलिद्वितीयो गच्छन्सर्वानपि तान्निहत्य प्रतिनिवृत्तः पथि कामगे हिरण्यपुरे वास्तव्यान्कालकेयान्पौलोमांश्चासुरान्सुरैरवध्यान्विदित्वा, तान्पाशुपतास्त्रेण न्यवधिषम्। ततो भृशं तुष्टस्त्रिविष्टपेश्वरस्तानीमानि सांग्रासिकोपकरणानि मदीयानि कृत्वा, इदं किरीटं मम मूर्ध्नि स्वय निधाय 'वत्स किरीटिन्, स्वेषां रणरणकमपाकुरु' इति विससर्ज" इति। परेद्यवि हरिवाहने स्वयमागत्य तान्सान्त्वयित्वा गते, भ्रातृभ्यो दिव्यास्त्रदर्शनोद्यतं किरीटिनं नारदः प्राप्य 'एते तवास्त्राणि समरसमये द्रक्ष्यन्ति। अलक्ष्ये प्रयुक्तानि त्वेतानि जगत्क्षोभयेयुः। तदधुना मास्तु' इति निवारयामास।

एकादशे वर्षे प्राप्ते तु हिमगिरौ वसतां तेषां क्वचिन्महाजगरगृहीतो भीमः सद्य एवावसन्नबलो विषसाद। तेन पृष्टः स सर्पः प्राह—'अहं नहुषो नाम राजर्षिरगस्त्येनेमां गतिं गमितोऽस्मि। मत्प्रश्नप्रवचनीयदर्शनावधिको मे शाप इति। तावदागतो युधिष्ठिरस्तत्प्रश्नव्याख्यानेन तं शापाद्भ्रातरं संकटाच्च मोचयामास।

द्वादशे वर्षे तु काम्यकवनं प्राप्तास्ते कृष्णसंनिधौ मार्कण्डेयेन वर्ण्यमाना नाना कथाः शृण्वन्तो मुमुदिरे। 'एकस्य पत्युर्वशीकरणमस्मादृशीनामतिकृच्छ्रं भवति। केनौषधेन त्वं पञ्चानां वल्लभासि। तद्ब्रूही' त्युपह्वरे सत्यभामया पृष्टा द्रौपदी प्राह—'सखि सत्ये, इदम सतीनां चेष्टितं यत्प्राणेशेऽपि क्षुद्राचरणम्। मां तथाविधां मा मंस्थाः। निर्व्याजया मम सेवया हि प्रीयन्ते। सर्वात्मना सर्वास्ववस्थास्वपि समनुवर्तनं हि संवननं, नौषधम्। तादृश्या गृहिण्या महोरग्या इव बिभेति हि भर्ता। तदलमनया धिया माधवपत्न्यास्तव' इत्यनुशिष्टया भार्यया सह हरिर्द्वारकामवाप।

अथ साद्यस्के यज्ञे दीक्षितो राजा घोषयात्रामिषेण तत्रागतं गन्धर्वैर्निगृहीतं दुर्योधनमनुजैर्मोचयामास। मोचितश्च स क्वचित्संनिविष्टः पूर्वमेव विद्रुतेनाङ्गराजेनागत्य 'दिष्ट्या भ्राजते सुरलोकेऽपि स्वां विजयलक्ष्मीं नीराजयन्महाराजकुरुराजः' इति स्तुतः सन् दीर्घमुष्णं च विनिश्वस्येदमाह—'सखे, भवांस्तदा संनिहितो नासीत्। अतो वर्ण्यते, शृणु। असद्व्यवसितं सर्वमन्यथा हि वृत्तम्। विषमो हि विधेर्विपरिणामः। पश्य—सर्वाभिसारेणापि गन्धर्वानभियोक्तुमात्मानं मोचयितुं चापारयन्नहं दुर्वादीव स्वयं निग्रहमन्वभूवम्। ततः सर्वान्कुरुराजस्य कुमारान्वधूभिः सहैकवाससा संयम्य नीयमानान् वीक्ष्य, आत्मनो दुश्चरितं सर्वात्मना फलितं मत्वान्वतप्ये। दुर्जातानभिज्ञया तव सख्या कातरं वीक्षितो यूपपशुरिव समवृतम्। एतस्मिन्नन्तरे 'मुञ्चत, मुञ्चत, कुरुराजे युधिष्ठिरे साम्राज्यधुरंधरे, कः कुरून् पराभवितुमीष्टे' इति वीरवादेन सह समापतता शरवर्षेण निरुद्धोर्ध्व-

गतिषु गन्धर्वेषु, सिंहविक्रान्तगतिना गदापाणिना भीमेनानुगम्यमानो मूर्त इव वीरो रसः सव्यसाची व्यदृश्यत। तावत्सरभसं मलिम्लुचमिव मामाकर्षंश्चित्रसेनो नाम गन्धर्वराजोऽर्जुनसमीपमेत्येदमाह—'सखे किरीटिन्, 'शीर्षच्छेद्योऽयं दुरात्मा सदापि पाण्डवद्विट्' इति तव पितुः पाकशासनस्य शासनेन वयमेनं निगृह्णीमः। त्वया त्वेवमादिश्यते। एवं पितापुत्रयोः संदेशविप्रतिषेधे, वयं किं कुर्मः' इति वदन् 'वयमपि महाराजयुधिष्ठिरस्य नियोगभृत्या एव। निग्रहानुग्रहयोस्तु स एव प्रभुः। तस्मात्तत्रैव नेष्यामः' इति तेनोक्तः सन्, तथेति सर्वानेवास्मान्सवनस्थस्य सपत्नीकस्य तस्य सकाशं नीत्वोच्चैर्जगाद—'भोः सम्राट्, अयं धार्तराष्ट्रापशदः स्वयं सुखस्थः सन्विषमस्थानां भवतां दर्शनेनात्मानं कृतार्थयितुं, भवतः कदर्थयितुं च सदारः सपरिवारश्चागतः। तदभिज्ञेन मघवता नियुक्ता वयं न्यगृह्णीम। किमत्र प्रतिपत्तव्यं, तत्र भवान्प्रमाणम्' इति। महात्मा स तु तं प्रत्याह—'महार्हा भवन्तः, तदभ्यर्थये। ममायमनुजोऽतो मदपेक्षयास्यायमपराधो मर्षयितव्यः। यथा च भगवान्देवराजः प्रसीदति तदपि भवद्भिरेव कर्तव्यम्' इति ताननुज्ञाप्य मामिदमाह—'तात दुर्योधन, इतः परं मान्येषु विमाननां मा कार्षीः।' इत्युक्त्वा मां स्वयं विमोच्य विससर्ज। एवं स्त्रीसमक्षं पराभूतस्य शत्रुणा मोचितस्य च मे किमनया मृतजीविकया। वत्स युवराज दुःशासन, परिजनैः समं पुरं प्राप्य राज्यधुरां बिभृहि। अहं तु प्रायोपवेशेन संस्थास्ये' इति महीतलमधिशिश्ये। तदनु 'ननु राजन्, सर्वात्मनापि प्रकृतिभिः सेव्यो हि नृपः। पाण्डवैस्तदाचरितं यदि कस्त-

वात्र परिभवः' इति कर्णेन समर्थितार्थोऽपि, 'वत्सलैः शूरैश्च पाण्डवैः संधाय राज्यं शाधि' इति शकुनिना नीतिमुपदिष्टोऽपि, 'आर्य, पालयास्मानन्धौ पितरौ च' इति दुःशासनेनानुनीतोऽप्यनपनीतदुराग्रहः स खलो निशि रसातलं नयद्भिर्दैत्यैः 'समरे वयं तव साहाय्यं कुर्मः। त्वं परान् जेष्यसि। वृथा निर्विण्णो मा भूः' इति प्रोत्साहितः सपरिवारः पुरमियाय।

'पात्रसमितोऽयं विकत्थनः। कथमन्यथा स्वपरायणान्कुरून्समरशिरसि विहाय स्वयमपाक्रामदिति भीष्मेणाधिक्षिप्तः कर्णः सर्वा अपि दिशः स्वयमेकरथो विजित्य, तत्रानीतेन धनेन दुर्योधनं वैष्णवनाम्ना क्रतुना याजितवान्। तदवभृथे च 'ज्येष्ठं युधिष्ठिरं युधि निहत्य राजसूयेन च याजयामि' इति प्रतिजज्ञे। पाण्डवास्तु तस्य तेन विक्रमेण, अभेद्येन कवचेन च सातङ्का बभूवुः। धार्तराष्ट्रस्य वरिवस्यया प्रीणिते तत्प्रियचिकीर्षयातीतकालमातिथ्यार्थमागते दुर्वाससि शिष्याणामयुतेन स्नातुं गते सति, स्वभोजननिःशेषितान्नतयाक्षय्यपात्रस्य, अनुपायज्ञा तस्मात्परमकोपनाद्भीता पाञ्चाली, आपन्नगतिं यदुपतिं मनसा जगाम। तत्समकालं प्रादुर्भूतो भगवान् 'बलवद्बुभुक्षितोऽस्मि, तदविलम्बेन यत्किंचिद्देहि' इति ब्रुवन्, भृशं ह्रीणां तां 'सखि, नायं नर्मकालः, तत्पात्रमानय, पश्यामी'ति निर्बन्धेन तदानीय, तत्कण्ठलग्नं शाकान्नं गृह्णन् 'अनेन सर्वाकारो भगवाञ्श्रीजनार्दनः प्रीयताम्' इति भक्षयामास। तत्क्षणं शान्ताशनायः स मुनिरम्बरीषं स्मृत्वा वृथा पाचनादपराद्धमानी स्वयं भीतोऽनुक्त्वैव सशिष्यः परागतः।

अथ सिन्धुराजो दुःशलापतिर्जयद्रथः स्यालपत्नीं द्रौपदीमेकाकिनीं दृष्ट्वाश्रमादपहरन्नर्जुनसहायेन भीमेन पञ्चशिखः कृतो, घृणिना राज्ञा मोचितः, पशुपतिमाराध्य, ततोऽर्जुनवर्जं पाण्डवानेकाहं जेतुं वरं लेभे। अथ भार्यापहरणविषण्णं राजानं मार्कण्डेय आचचक्षे—'ननु श्रूयते ह्यैक्ष्वाकस्य रामस्य चरितम्। स हि पितृवचनेन दण्डकास्वनुजमात्रसहायो वसन्, विजने स्वभार्यां जानकीं रक्षसापहृतां विचिन्वन् कपिकुलानुकूलो महता परिकरबन्धेन पारेसिन्धु संवत्सरान्ते पुनर्लब्धवान्। त्वं तु मुहूर्तात्क्रोशमात्रादाहार्षीः। न हि धीरा विपदि धैर्यं जहति। तदलं संतापेन' इति सान्त्वितः पुनः प्राह—'मुने, इयं व्यसनमहार्णवमग्नानामस्माकं प्लवभूता। क्वेदृशी भर्त्रवलम्बनभूता स्त्री स्यात्। तदस्या दुःखं मां दुःखाकरोति' इति। मुनिरपि तं प्रत्यूचे—'ननु निसर्ग एवैष पतिव्रतानाम्। तथाहि—किं नाश्रौषीः सावित्रीम्। सा हि भर्तारं सत्यवन्तं, अन्धौ श्वशुरौ च वने नियमेन परिचरन्ती, भर्तुरायुरल्पावशेषं विदित्वा, तदभिवृद्धये व्रतं चरन्ती, प्राप्ते तु तद्दिने फलाय वनान्तरं गच्छन्तं पतिमनुगच्छन्ती, स्वतपसा प्रसन्नान्मृत्योः पत्युर्दीर्घमायुः, आत्मनः स्वमातुश्च बहुपुत्रतां, श्वशुरयोर्नेत्रराष्ट्रयोः प्राप्तिं च वरांल्लब्ध्वा, कुलद्वयमुद्धरन्ती लोके च महनीया बभूवे'ति समाश्वासयामास।

जातुचिदातिथेयो वैकर्तन आतिथ्यकाले प्राप्तेन केनचिद्विप्रेण सहजं कवचं कुण्डले चार्थ्यमानः स्वप्नेऽर्कोणोक्तमर्थं स्मरन्नाह—'भगवंस्त्रिदशेश्वर, ज्ञातोऽसि मया। यदि पुत्रार्थमर्थी भवांस्तर्हि स्वशक्तिविनिमयेन प्रतीच्छत्वभीष्टम्' इति। तथा प्रतिगृह्णन्निन्द्रः

'सहजमङ्गवेष्टनादि कृत्तवतोऽपि तव शरीरे विकृतिर्मा भूत् । एषा च मम शक्तिः कृच्छ्रगतस्य तवैकं शत्रुं क्षपयित्वा मामुपैष्यति । अकृच्छ्रे प्रयुक्ता तु त्वामेव हन्यात्' इत्याश्रुत्यान्तर्धिमगात् । सोऽप्येवं कर्तनात्कर्ण इति प्रख्यातः ।

अथ द्वैतवने कस्यचिदाहिताग्नेररणीमन्थं शृङ्गेणादाय धावन्तं मृगमनुधावमानेषु, उदन्यया कस्मिंश्चित्सरस्युदकं पीत्वा पतितेषु चतुर्ष्वपि भ्रातृषु, स्वयमपिताननुगन्तुकामो धर्मपुत्रो यक्षरूपेण स्वपित्रा निषिद्धस्तत्प्रश्नान्व्याचचक्षे । तेन चैकस्यानुजस्योज्जीवनवरे दत्ते, माद्र्या अपि पुत्रवत्त्वाभावं परिजिहीर्षुः स नकुलस्य जैवातृकत्वमयाचत । तया तस्य समत्वबुद्ध्या तुष्टः समवर्ती चतुरश्च तानुत्थाप्य, अरणीमन्थं च प्रत्यर्प्य आसन्ने त्रयोदशे वर्षे परैरज्ञास्यमानत्ववरं च दत्त्वा चक्षुरविषयो बभूव । ते तु श्वोभाविन्यज्ञातवासे सर्वाननुयायिवर्गानभीष्टदेशगमनायानुज्ञाप्य, विविक्ते पत्न्या पुरोधसा च सह मन्त्रयांचक्रिरे ।

इति वनपर्व ।

# विराटपर्व ।

अथ निश्चितानन्तरकरणीयांस्तान्धौम्यः प्राह—'सर्वेऽपि यूयं कृतबुद्धयः समुपासितवृद्धाश्च । तथापि वार्धकं पुरस्कृत्य मयेदमुच्यते । छेकानां तिरश्चामिव कृच्छ्रो दशाविपाकोऽद्य भवतामुपस्थितः । तथा हि—परगृहवासे परेच्छया वृत्तिः, अज्ञातचर्यायामन्तश्चैतन्यमात्रं, सेवास्वीकृतावात्मन्यप्यनीश्वरता । किं च । परिभवैकपदं राजकुलं, तेजस्वि च क्षत्रं, छिद्रान्वेषिणः परे, दीर्घश्च कालो गूढं गमयितव्यः, इति च मिथो वैषम्यम् । किं बहुना । अयमत्र संग्रहः—चक्षुर्निमील्य संवत्सरं गोव्रता भवत । शिवाः सन्तु पन्थानः' इत्याशास्य तेषामग्नीनादाय पाञ्चालान्ययौ । ततस्ते मत्स्यराजे तं संवत्सरं विवत्सवस्तत्पुरमेत्य, तस्य नातिदूरे श्मशानसंनिहिते शमीपादपे स्वायुधानि कुणपेन सहाबद्ध्य, स्तवेन प्रसन्नाया दुर्गायाः परेषामज्ञातवासवरं लब्ध्वा, पृथग्वर्त्मानो ययुः । जनास्तु मृतकसंबन्धेन तं वृक्षं दूरादेव परिहरन्ति स्म । युधिष्ठिरस्तु विराटमुपेत्य 'राजन्, गोत्रेण वैयाघ्रपद्यं, नाम्ना कङ्कं, जात्या द्विजातिं, अक्षेषु कुशलं, वृत्त्यर्थं त्वामुपस्थितं च मां विजानीहि' इति वदंस्तेन प्रीत्या सभास्तारो विदधे । भीमस्तु वल्लवनामानं सूदमात्मानं ब्रुवंस्तेन महानसाध्यक्षोऽध्यकारि । ऐन्द्रिस्तु 'बृहन्नलाख्यः षण्डस्तौर्यत्रिककुशलश्चास्मी'ति राज्ञे निवेदयंस्तेन स्त्रीभिः परीक्षितः सन्दुहितुरुत्तराया नर्तनशिक्षणाय न्ययोजि । माद्रेयौ तु ग्रन्थिकारिष्टनेमिनाम्नात्मानं व्यवहरन्तौ, क्रमेणाश्वानां गवां चाध्यक्षावध्यकारिषाताम् । कृष्णा तु राजपत्नीं सुदेष्णां प्राप्य 'स्वामिनि,

मालिनीं नाम सैरन्ध्रीं गन्धर्वगुप्तां केशप्रसाधनेनात्रभवतीं शुश्रूषितुमुपतस्थुषीं च मां विद्धि। किं तु परस्योच्छिष्टादौ नाहं नियोज्या। एतदेव मे महाव्रतम्' इत्युदारमुदाहरन्ती, तथेत्यभ्युपगच्छन्त्या तया सादरं पर्यग्राहि। सर्वेऽपि ते राज्यभ्रष्टेभ्यः पाण्डवेभ्यः परागतमात्मानमावेदयामासुः। अथ चतुर्थे मासि तत्र ब्रह्मोत्सवे प्रवृत्ते समागतो जीमूतो नाम महामल्लो राज्ञा भीमेन सह क्रीडार्थं द्वन्द्वयुद्धं कारितस्तेन मारितश्च। ततः स्वविक्रमं दिदृक्षुभिरन्तःपुरस्त्रीभिः प्रवर्तितः प्रभञ्जनात्मजः स्वयमकामेनापि सिंहव्याघ्रादिभिश्चिक्रीड।

एवं गर्भवासनिर्विशेषामज्ञातवसतिं वसतां तेषां दशसु मासेष्वतीतेषु, राज्ञः सेनापतिः कीचको नाम नीचः कृष्णां निशाम्य कामान्धोऽसभ्यमिदं प्रलपति स्म—'अयि सुन्दरि, अनुचितं हि त्वया प्रतिपन्नम्। या त्वमतितरामुपचरणीयैरङ्गैरितरां परिचरसि। मम स्वसारं सुदेष्णामपि तव कृतेऽसम्यग्दर्शिनीमवगच्छामि, या कुसुममालां पादघातेन ग्लपयति। अथवा किमतीतोपालम्भेन। गृहाण सर्वेश्वरीभावम्। न हि कीचकं विराध्यन्मरुत्वानपि स्थातुमीष्टे, किं पुनर्वल्वजभूतो मत्स्यराजः। तदलमाशङ्कया। भवत्याः कृते जीवितेऽपि निराशमिमं जनं संस्थापय' इति। सा तु कर्णारुंतुदेन तत्प्रलपितेन विदीर्णहृदयाप्यकातरमित्थं विनिनाय—'ननु सूतपुत्र, कथमपथेन प्रवर्तितुमीहसे। सर्वात्मना विगीतं हि पारदारिकत्वम्। स्वकलत्रमुपमीकृत्य परकलत्रान्निवर्तय दृष्टिम्। न चाहं या काचिदस्मि। तदलममानुषपरिग्रहे मय्यविनयेन' इत्युक्त्वा द्रुततरं सुदूरमपससार। तत्क्षणं स खलः स्वस्रे निवेद्य, तया कृतमन्त्रः स्वभवन-

मुपेयाय। अथ कस्मिंश्चिद्दिवसरे 'सैरन्ध्रि, मम भ्रातुर्गृहात्सुरामाहर, तृषितास्मि' इति सुदेष्णयोक्ता सा 'अयि राज्ञि, जानास्येव तस्य दुराशयस्य हृदयम्। स्वभावदुष्टस्यापि स्वजनस्योत्पथाद्बलान्निवर्तने हि स्वामित्वमर्थ्यम्। सत्येवं स्वयमेव कथं प्रवर्तयित्री भवसि। सन्त्यन्या बह्व्यः परिचारिकाः। तास्वन्यतमा नियुज्यताम्' इति याचमाना सती 'तत्र कामयोग्यतां वीक्ष्य बिभेषि। जानामि ते भीरुत्वम्। गम्यतामनुत्तरम्' इति तया निर्बन्धेन प्रहिता भगवन्तमादित्यं मनसा शरणं व्रजन्ती, चकितचकितं तद्गृहं प्रविवेश। तत्क्षणं 'सुदिनं, सुप्रभातम्' इत्युपसृत्य, स्वोत्तरीयाञ्चले परामृशन्तं तं पापं वेगेनाक्षिप्य राज्ञः सभामभिदुद्राव। पतितोत्थितः स पतितश्च स्वयं तामनुधाव्य केशपक्षे गृहीत्वा पश्यत एव राज्ञो निपात्य पदा ताडयन्सवितृप्रहितेनादृश्येन रक्षसा दूरमुत्क्षिप्तो निपपात। तावत्संरब्धो भीमस्तद्वधाय महान्तं वृक्षं प्रहरणीकर्तुमवलोकयंस्तदिङ्गितज्ञेन निवारणायाङ्गुष्ठेनाङ्गुष्ठमवमृद्नता युधिष्ठिरेण संज्ञां ग्राहितः—'वल्लव, नूनमिन्धनार्थी भवानेतं वृक्षं पश्यति, किंत्वशुष्कोऽयमधुना। अतः प्रतीक्ष्यताम्। अलं संभ्रमेण' इति। तया सूचनया वेलयेव महोदधौ तस्मिन्विनीतरभसे, द्रौपदी राज्ञः सदसि बहु विलप्य कीचकाद्भीतेन मत्स्येनाप्रतिरूपं प्रत्युक्ता युधिष्ठिरेण च समयप्रतिपालनाय संज्ञां ग्राहिता सती पुनरन्तःपुरमाविवेश। अथ विषादकारणं पृच्छन्तीं सुदेष्णां 'अयि सुजनपरिभाविनि, किं स्वयमेव शाखामाकृष्य पतनकारणं पृच्छसि। यो हि बलदृप्तो धर्ममतिक्रामति, तं धर्मबन्धना धरित्री क्षणमपि वोढुं न सहते। तदचिरेण

मुमूर्षोस्तस्य तव भ्रातुर्विपत्तिं द्रक्ष्यसि' इत्युक्त्वा सा निशीथे भीमस्य शय्यां प्राप्य, 'कथं नाथ, वारं वारं परिभूयमानां दयितां पश्यतोऽपि तेऽक्षिण निद्रावतरति। का नाम राजपुत्री वीरपत्नी वीरसूश्च सती अहमिव परैराक्रम्याक्रम्य क्लिश्यते। यदि तं पुनरपि सूताधमं जीवन्तं पश्येयं, तर्हीदमेव मम चरमसंभावनमवधारय' इति विलपन्ती तस्योरसि निपत्य रुरोद। स च तद्वधमास्थाय, तदुपायं च संविधाय, तां ससान्त्वं विसर्जयामास। परेद्युरपि समागत्य साभ्यर्थनं पूर्ववदसकृत्कदर्दं तं कापुरुषं सा भीमवाक्यं मनसिकृत्याह— 'सूतपुत्र, नूनं क्षेत्रियस्ते मान्मथो व्याधिः। अतस्त्वं मत्तः शमनाकाङ्क्षी। तदियं नर्तनशाला, नक्तं निःशलाकायां तत्र सज्जीभव। अनुभव चाननुभूतपूर्वमभिप्रेतसुखं, येन पुनः स्वदारेष्वपि रतिं न लभसे। गन्धर्वेभ्यो विपत्तिमाकलय्यैवं ब्रवीमि। स्त्रीणां भर्तृवश्यता हि लोकसमुदाचारः। न ह्यपार्थप्रयुक्तां वाचं मादृशी वक्तुमर्हति। तदलमन्यथा गृहीत्वा। षट्कर्णो मास्तु' इति। तच्छ्रवणेनैवाभीष्टसंपत्तिं मन्वानः स सूढः, स्वयमेवान्त्यमण्डनं विधाय, निशि तां शालां प्रविशन्, 'अयि मालिनि, आगतस्तव पादताडनार्होऽयं जनः। विगमय मेऽङ्गजपीडाम्' इत्यनुललाप। पूर्वमेवोपस्थितो वृकोदरस्तं मुष्टिघातं संपिण्डीकृत्य, द्रौपद्यै दर्शयन्स्वमेव स्थानमुपेयिवान्। अथ तयाहूय दर्शितैः सभापालैर्विज्ञापिते मत्स्ये, तद्भ्रातरः स्थलकूर्ममिवान्तर्गतावयवं तं ज्येष्ठं संस्कुर्वन्तस्तां तत्र दृष्ट्वा 'यक्षानुरूपो हि बलिः। तदस्यां कामेन परासोरस्यानया सह संस्करणं पारलौकिकं स्यात्' इति मन्त्रयमाणास्तेन सह संयम्य, तां पितृवनं निन्युः। 'हा जय, हा

जयन्त, हा विजय, हा जयत्सेन, हा जयद्बल, आगच्छत, मोचयत मां परहस्तगताम्' इति सांकेतिकेन नाम्ना भर्तॄन्व्यपदिश्याक्रोशन्त्यां तस्यां, भीमो विकृतेन भीमेन च वेषेण तरुप्रहरण एव वर्त्मान्तरेण तत्स्थानं प्रधाव्य पञ्चोत्तरशतसंख्याकांस्तान्निहत्य, तां च विमोच्य, जनैरलक्षित एव पुनरागात्। ततो मन्दमन्दमागच्छन्ती सा भयात्स्वदृष्टिपथं वर्जयद्भिर्जनैर्मुक्तमार्गान्तःपुरं निविशमाना भृशं वेपमानया सुदेष्णयाभ्ययाचि—'अयि गन्धर्वसुन्दरि, भवत्याः कृते त्रस्तमिदं सर्वं राजकुलम्। देहि मे सपतिपुत्रायाः प्राणभिक्षाम्। क्रियतामन्यत्र वासे मनः' इति। सा तु 'राज्ञि, त्रयोदशाहमात्रं प्रतीक्षस्व। सर्वं शुभोदर्कं संपत्स्यते' इति तामाश्वासयति स्म।

अत्रान्तरे पाण्डवजिज्ञासायै दुर्योधनप्रहिताः प्रणिधयः पुनरागत्य व्यजिज्ञपन्—'कुरुराज, अहो तव भागधेयम्। यदल्पेनैव कालेन परेषां नामधेयमपि विनष्टं, किमु रूपधेयम्। किं चान्यत्। देवपादसुहृदस्त्रिगर्तान्द्विषन्कीचकः सवर्ग एव गन्धर्वैर्मारितः। शेषप्रतिपत्तौ महाराजः प्रमाणम्' इति। अथ यथाश्रुतमेव मत्वा प्रहृष्यत्सु कर्णादिषु, नैतदेवमित्यधिक्षिपति द्रोणे, दुर्योधनेनानुयुक्तः पितामहः प्राह—'तात, न ह्यस्मादृशैरीदृशेऽर्थेऽन्तरदायिभिर्भाव्यम्। तथापि पृष्टेन तत्त्वमेव वाच्यमित्युच्यते—आचार्यमतमेवानुमन्तव्यम्। न हि तादृशाः सत्पुरुषा आकस्मिकीं दुर्गतिं कथमपि प्रपद्येरन्। यत्र सर्वं सुभिक्षतरं तत्र धर्मनित्यस्य पाण्डवस्य वासं निश्चिनु' इति। तावत्त्रिगर्तराजः सुशर्मा प्राह—'कुरुपते, गोमान्संपन्नश्च विराटः कीचकबलेनाप्रधर्ष्यश्च सन्नसकृन्मम विप्रियमचारी। अद्यत्वीषज्जयोऽयम्।

अतस्तदभियोगे तव कोशवृद्धिर्मित्रार्थसिद्धिश्चेत्युभयार्थता भवति। तथा रोचतां भवते' इति। सोऽपि तथेति तद्वचनमभ्युपगम्य, प्रथमं दक्षिणभागे तद्गोग्रहणार्थं तं नियुज्य, पश्चात्स्वयमपि दण्डयात्रामादिदेश। अथ त्रिगर्तैर्गाः काल्यमाना आज्ञाय, तत्प्रत्याजिहीर्षया महत्या सेनया सह प्रस्थितो विराटः 'ननु कङ्कादयोऽपि सांयुगीना भान्ति। ततस्ते च समराय संनद्धा भवन्तु' इत्यादिश्य तैः सहितोऽपराह्णे परस्यानीकमरुधत्। तदानीं पूर्णप्रतिज्ञतया, तस्य प्रियं चिकीर्षुर्युधिष्ठिरोऽर्जुनवर्जं भ्रातृभिः संग्रामभुवं प्राप्तस्तत्र रात्रियुद्धे शत्रुभिर्गृहीतं मत्स्यं विमोचयता भीमेन संयतं सुशर्माणं कृपया विसर्जयामास। तान्मानयन्विराटस्तत्र तैः सह रात्रिशेषं गमयित्वा, प्रातर्नगराय प्रतस्थिवान्।

तावदुदीच्यां सर्वं गोधनं कुरुभिरपह्रियमाणमाकर्ण्य वैराटिरुत्तरः 'यदि कश्चित्कुशलं यन्तारमाप्नुयां तदा सव्यसाचिनमपि ममाजिमुखे क्लैब्यभाजं पश्येयं, किमुतापरान्' इति स्त्रीसमक्षमुद्घोषयन्सन्, मदान्धं दुर्योधनं दमयितुकामेन पार्थेन प्रयुक्तया स्वयमपि तथा स्वभर्तुरधिक्षेपवचनमसहमानया कृष्णयोचे—'राजपुत्र, एषा बृहन्नला खाण्डववनं दिधक्षोः पाण्डवस्य सारथ्यं कृतवती सती तन्निर्विशेषं मया दृष्टा। तदेनां रथ्यानां प्रग्रहान्ग्राहय' इति। 'ननु सैरन्ध्रि, वयं कथं षण्डं साक्षान्नियोजयाम' इति वदन्नुत्तरः स्वस्रोत्तरयानीतं पार्थं सूतकर्मणि प्रेरयंस्तस्मै कवचं प्रायच्छत्। तद्धारणेऽप्यकृतहस्ततामभिनयन्सव्यसाची तेन संनाहितो हयान्संगृह्णन्नुत्तरया चोदि—'सखे बृहन्नले, पाञ्चालिकार्थं कुरुवासांस्याहर' इति। 'तव

भ्रातरि परेषां जेतरि, को मम भारो वस्त्राहरणे' इति सोल्लुण्ठमुत्तरं प्रत्युत्तरयन्नर्जुनस्तद्रथं श्मशानस्य नातिदूरे कृतसंनिवेशस्य कुरुसैन्यस्य सदेशं निनाय। तत्र गजानां बृंहितेन, हयानां हेषितेन पत्तीनां सिंहनादेन, रथानां क्रेंकारेण, धनुषां टंकारेण च बधिरीकृतकर्णः संजातवेपथुर्वैराटिः स्यन्दनादवप्लुत्य, गृहाभिमुखं विद्रवन्ननुद्रवता पार्थेन बलान्निवर्तितो भूमौ निपत्य मुक्तकण्ठं विललाप—'अयि बृहन्नले, शस्त्रेष्वकृतपरिश्रमं स्त्रीनिर्विशेषं च मां मृत्युमुखे प्रक्षिप्य किमात्मनः श्रेयः पश्यसि। जीवन्हि भद्रे, भद्राणि पश्यति। तदलं व्यायामबहुलेन साहसेन। कामं हरन्तु गोधनमन्यद्वा वसु। मामके हते प्रत्याहते वा तव किमायातम्। महार्हा हि कुरवः। तदेभ्यो नमोवाकं प्रयुज्य निवर्तय रथम्। अथ यदि ते युद्धश्रद्धा हृदयतो नापैति, तर्हि मां विसृज्य स्वैरं विहर' इति। अर्जुनस्तु 'कथं स्त्रीमध्ये तथा गर्जित्वा शत्रुमध्ये एवं कातरोऽसि। यो हि युद्धे प्राणभयात्स्वपृष्ठं शत्रवे दर्शयति, स मा जीवन्हि। गा अनिवर्त्य परानविजित्य च न रथं निवर्तयेयम्। एष मे सर्गः। यदि त्वं स्वयं योद्धुं नोत्सहसे, तर्हि हयान्मे यच्छ। अहं प्रहरामि' इति तं कथंचित्सान्त्वयन् पुनरपि रथमारोपयामास।

तथाविधं तं दृष्ट्वा बहुधा विकल्पयत्सु सैन्येषु, भारद्वाजः प्राह—'पश्य पश्य गाङ्गेय, क्लीबरूपमप्युदात्तदर्शनं सारथिमात्रद्वितीयमपि तेजःपुञ्जपरिवारपरिवृतमभ्यमित्रीणं पुरुषम्। नूनमयं भस्मनेव वेषेण प्रच्छन्नो धनञ्जयः। कोऽन्यः पन्नगेश्वरमन्तरेण महाविषधरमण्डलमभिवीक्षितुमपि क्रमेत। मोक्ष्यत्यस्मासु चिरसंभृतं

क्रोधाग्निं नियन्त्रणोन्मुक्त इव कण्ठीरवः । को हि नामास्मास्वेनं प्रतियुद्धयते । अद्य सर्वात्मना फलितो हि धार्तराष्ट्रोपक्रमं दुर्नयः ।' तदसहमानो दुर्योधनस्तं प्रत्यधिचिक्षेप—'अङ्गराज, अनवसरे प्रकाशीभवन्नर्जुनोऽस्माकं समीहितं पूरयति यदि, तदा किमित्यस्थाने आचार्यस्येत्थं परिदेवितम् । रणमुखे विपक्षप्रशंसया युयुत्सूनामुत्साहो हि भज्यते । कथं दुर्वादिसमय इवोपक्रमोपसंहारयोर्वैरूप्यम् । अथवा न वर्षीयसां वचनं विमर्शक्षमम् । तस्मात्तान्पृष्ठतः कृत्वा भवन्तो यत्ता भवन्तु' इति । तदनु कर्णोऽप्याह—'अहो कथमयं भवतां वेपथुः । युष्माकं भीतिर्हि परं सिंहीकरोति न तस्य विक्रान्तिः । नेदं भीरुस्थानम् । अथवा सर्वेऽपि यूयं गोभिः समं हस्तिनां प्रत्यपसरत । पार्थमपार्थं वा वयं वारयाम' इति । ततो गौतमः प्रोवाच—'सूतपुत्र, कथं महेश्वरसहयुद्धना महेन्द्रसहकृत्वना किरीटिना सहैक एव योद्धुमाशंससे । कीदृशी गन्धहस्तिनोऽपि मृगेन्द्रेण स्पर्धा । तदलमतिसाहसेन । यदि योद्धव्यमेव, तर्हि सर्वे च संभूय योत्स्यामहे' इति । द्रौणिस्तु गुरोर्न्यक्कारेण कुपितः प्राह—'अहो कुरुराजस्य परिच्छेदवैदग्धी, यद्वृथा वाचाटोऽसमीक्ष्यकारी कार्येषु विमुखो विशेषज्ञानशून्यश्च राधेयोऽस्य पूजास्थानम्, आप्तवाचः परीक्ष्यकर्तारः कर्मठा गुणदोषविवेचकाश्च वयं पुरोभागिनश्च संवृत्ताः । स्वभावदुष्टस्य हि सर्वं दुष्टमेव भवति, यथा पित्तोपहतस्य मधुरमपि तिक्तभूतम् । अनुरूपश्चानयोः स्वाम्यामात्यभावः । अथवा किमुक्तिप्रत्युक्तिकया । कुरुराजार्थेऽङ्गराजो युद्धयतां, वयं भीताः स्मः' इति । एवं मिथः कलहायमानेषु तेषु पितामहः प्राह—'क्षाम्यत्वाचार्यः ।

पथ्यं तथ्यं च भवतां वचनम् । कर्णस्तु क्षत्रधर्मं पुरस्कृत्य समुत्ते-जनार्थमेवमाह । न ह्ययं भेदकालः’ इति वदन्सर्वानेव क्षमयामास ।

अर्जुनस्तु शम्याः स्वायुधानि संगृह्य स्मरणमात्रेण संनिहितं कपिलक्षणं स्वं केतनं तद्रथे युयुजे । नियुयुजे वैराटिं सूतकर्मणि । अभियुयुजे स्वयमेकरथ एव षड्रथान् । प्रयुयुजे च मान्येभ्यः प्रति-योद्धृभ्यो नमस्कारबाणान् । उत्तरस्तु पार्थस्य योगेन हृष्यन्मुहुर्मुहुरा-पूर्यमाणस्य तच्छङ्खस्य घोषेण विषीदंश्च सन् , गङ्गायमुनयोः संभेद इव द्विरूपो बभूव । पुनरपि क्षुभितेषु सैनिकेषु, प्रतिज्ञाकालज्ञानाय चोदितः पितामहः प्राह—‘ज्योतिषामतिचारादिना पञ्चमे पञ्चमे वर्षे द्वौ द्वावतिमासौ भवतः । ततश्च त्रयोदश वर्षाणि, अधिकपञ्चा मासाश्च व्यतीताः । अन्यथा कथं धर्मपुत्रविनेयोऽप्यनवसरे स्वात्मानं प्रकाशयेत् । न चार्जुनो जयेन विना निवर्तेत । अतस्तद्दंशप्रतिपादनेन संभावनमुचितम्’ इति । न्याय्यमपि स्वोक्तं लोभेनानभ्युपगच्छन्तं तं दुरात्मानमनुरुध्यमानः स बलैकदेशेन गोभिः सह स्वनगराय तं प्रस्था-पयामास ।

‘सेनाग्रे योऽयं गजकक्षाकेतुर्दृश्यते, एष कर्णस्य रथः, यो मध्ये वेदिध्वजः स आचार्यस्य, योऽसौ तं दक्षिणेन धनुर्ध्वजः सोऽश्वत्था-म्नः, य उत्तरेण नीलपताकः स कृपस्य, योऽसौ सर्वपश्चात्तालध्वजः सोऽस्मत्पितामहस्य स्यन्दन’ इत्युत्तराय दर्शयन्कपिध्वजः परितो व्या-पारितदृष्टिः ससंभ्रममाह—‘भूमिंजय भूमिंजय, दक्षिणेन हस्तं योऽसौ सर्पकेतनो धावन्दृश्यते, सोऽस्माकमरातेः कुलपांसनस्य धार्तराष्ट्रस्य

रथः। स हि मन्ये भीतोऽस्मान्वञ्चयन्गोभिः सह चोरधर्मापसरति। न हि निरामिषं युद्धं भवति। तच्चोदयाश्वान्यत्र स दुरात्मे'ति त्वरयन्नर्धपथ एव तं परिपन्थिनं न्यरौत्सीत्। गावस्तु प्रतिरुद्धातपरबलात्प्रत्यावृत्ताः स्वयमुत्पुच्छयमाना महता हुम्भारवेण स्वमेव पदमपद्यन्त।

अथ कुरुपतेरत्याहितमाशङ्क्य युगपदेव तमावृत्य संनद्धेषु बलप्रधानेषु पाण्डवप्रधानः प्रवर्धमान इव वार्षिको धाराधरोऽविच्छिन्नया शरधारया छिन्नभिन्नाङ्गान् शताङ्गान्, ध्वस्तमस्तकान्हस्तिनः, दारिताङ्गांस्तुरङ्गान्, कृत्तक्षिताश्च पत्तीस्तन्वन्, वितन्वंश्च सर्वासु दिक्षु कङ्कगोमायुकुलविष्वणनकलकलप्रवर्तितभोगावलीकं स्वं यशः, वातूल इवेषीकतूलजालं दुःशासनादिकुलं पलाययन्, पश्यत एव कर्णस्य तद्भ्रातरं मारयन्, भीष्मादीन्गौरवेण नातिपीडितानप्यपगमयन्, क्षणार्धेन दुर्योधनमभिदुद्राव। तद्दर्शनेनैव स्मृतसभावृत्ते साज्यधारे हव्यवाह इव ज्वलिते श्वेतवाहे, पुङ्खानुपुङ्खप्रवर्तितं तच्छरसंपातं सोढुमक्षमो धार्तराष्ट्रो विमुखीबभूव। 'रे रे सभिकशौण्डीर, नायमक्षावापः, नाहं पाञ्चाली, इमानि दिक्पालोपज्ञानि दिव्यास्त्राणि, तव द्यूतदासो गन्धर्वराजस्य चित्रसेनस्य जेता गाण्डीवधन्वास्मि। न युक्तं हि तव दुर्योधनस्य युद्धात्पलायनम्' इति परिहसन्नर्जुनो मोहनास्त्रेण सर्वानेव तान्मोहयन्नुत्तरमाबभाषे—'भद्र, प्रतिघातशं भीष्मं वर्जयित्वान्येषां वासांस्याहर स्वसुः पाञ्चालिकार्थं' इति। तेन तथा कृते लब्धसंज्ञो दुर्योधनः 'किमिति सर्वैरपि भवद्भिः समरमध्य उदासित'मिति वदन्, 'त्वया कुत्र गत'मिति परिहसता पितामहेनाधिक्षिप्तो

नगराय प्रतस्थे। तत्क्षणं तस्य मकुटं विपाठेन पाटयन् किरीटी, यथावच्छम्यां न्यस्तशस्त्रः सन्, पूर्ववद्बृहन्नलावेषो वैराटिना नगरमभिजगाम।

विराटस्तु पुरं प्रविशन्संग्रामस्थं पुत्रं श्रुत्वा, तत्साह्याय वाहिनीं प्रेषयंस्तावदागतैर्दूतैः सविजयमागच्छन्तं तं विदित्वा, प्रमनाः सर्वं पुरमपि महोत्सवयन्, युधिष्ठिरेण सहाक्षैर्दीव्यन्नन्यादृशमात्मजस्य रणकर्म प्रशशंस। 'नेदमद्भुतं बृहन्नलागुप्तस्ये'ति तेन प्रत्युक्तः, 'आः कितव ब्रह्मबन्धो, कथं मम पुत्रमतीत्य षण्डं प्रशंससि' इति क्रुद्धो विराटस्तस्य मुखे पाशकेन ताडयामास। ततस्तस्य नासास्रोतसो निःसृतं रुधिरं द्रौपदी पात्रेऽगृह्णात्। तावत्स सारथिमुत्तरं द्वाःस्थं निवेदयन्दौवारिको मात्स्येन तत्प्रवेशनायादिष्टोऽपि 'शोणितविरामानन्तरं बृहन्नला प्रवेश्यतां, अन्यथा महाननर्थः स्यात्' इत्यजातशत्रुणोपांश्वावेदितः सन् क्षणं विलम्ब्य तं प्रवेशयामास। तत्समक्षं 'वत्स, कथमतिरथान्कुरूनेकरथो व्यजेष्ठा' इति पित्रा पृष्ट उत्तरोऽर्जुनमतमनुसंरस्तद्गोपनायाह—'तात, न मया किमपि तत्र वीरोचितमाचरितम्। कश्चिद्देवपुत्रस्तथा चिक्रीड। स च मन्ये श्वः परश्वो वा स्वयमायास्यति' इत्युक्त्वार्जुनेन सहान्तःपुरं प्रविश्योत्तरायै वासांसि प्रायच्छत्।

अथ तृतीयेऽहनि सभां प्रविशन्मत्स्यराजः पूर्वमेव वरार्हासनस्थान्पराध्र्यवेषांश्च तान्दृष्ट्वा, नातिनिपुणतया किंचित्कुपितः प्राह—'अहो वाल्लभ्यस्मयो हि भवतामुन्मस्तको येनानर्हमपि स्थानं स्वयमारूढा' इति। तथापवदमानं तमर्जुनः प्रत्याह—'ननु राजन् विराट, समीचीनमुक्तं भवता। वासवार्धासनार्हस्यास्यानर्हमेवेदमासनम्' इति।

तावदुत्तरः सानुनयमाह—'तात, अलमलं कारणेन प्रच्छन्नरूपेषु कल्पपादपेषु गृहपटोलिकोपपन्नत्वबुद्ध्या। अलं च वा चिन्तामणौ द्वारशिलात्वचिन्तया। मर्षयन्तु भवन्तो वाक्कर्मकृतानस्मदपचारान्। न ह्यज्ञानाचरितं साध्वसाधु वा गुणदोषकल्पनामर्हति' इति ससान्त्वं तान्यथावद्व्याख्याय, पुनरप्यर्जुनं निर्दिशन्पितरमाह—'तात, अयमेव स यमहं देवपुत्रं व्यपादिक्षम्। तुमुले तत्र संग्रामे निरन्तरया शरधारया युगपदेवास्यतो भीष्मद्रोणादीन्वीरान्वारयतोऽस्य पदे पदे ज्याघोषादिना मूर्च्छितस्य ममाश्वासनं च कार्यान्तरमभूत्। एतदेव मयास्य समरकृतं साह्यम्' इति। सोऽप्याह—'अहो ज्योतिरिङ्गणबुद्ध्या सावज्ञमुपात्ता महामणयः संवृत्ताः। अहमपि नामानेन गन्धर्वव्यपदेशिना कीचकान्तकेन सुशर्मणो मोचितोऽस्मि' इति तेषामर्घमाजहार। व्याजहार च भूयः 'भो युधिष्ठिर, प्रतीच्छत्वर्जुनो मद्दुहितरमुत्तरां जायार्थम्। अनया वरिवस्यया भवत उपस्थातुमाशंसे' इति। अर्जुनस्तु 'यौवनस्थया तव दुहित्रा सह संवत्सरमेकान्ते सहोषिते मयि शङ्का मा भूत्' इति तां स्नुषां ग्रहीतुमभ्युपैति स्म। तथेति विवाहोत्सवे प्रवृत्ते, समाहूतेषु च पाञ्चालकेकयवृष्णिप्रमुखेष्वाप्तबन्धुवर्गेषु, सौभद्रोऽभिमन्युर्यथाविधि वैराटीमुत्तरामुपयेमे। निर्वृत्ते तु विवाहमङ्गले राजा युधिष्ठिरो ग्रहनिर्मुक्त इव दिवाकरः सर्वैर्भ्रातृमित्रादिवर्गैः सह विराटनगरस्य नातिदूरे उपप्लव्याख्ये पुरे सुखमासांचक्रे।

इति विराटपर्व।

———

# उद्योगपर्व ।

अथ परेद्यवि सर्वैर्बन्धुभिरलंकृते वैवाहिके विराटस्य सदसि कृष्णः कथान्ते व्याजहार—'विदितमेव सर्वेषां वः यथायं युधिष्ठिरश्छलेन राज्याद्भ्रंशितोऽप्यनृतभीरुतया बहून्क्लेशांस्तितिक्षमाणः प्रतिज्ञापारावारं तीर्णवानिति। एवं गते कथमयं यथापुरं स्वं राज्यं लभताम्। न खलु परमतमविज्ञाय शक्यमुपायोऽध्यवसातुम्। तन्मन्ये पूर्वं दूतेन दुर्योधनस्य हृदयं ज्ञातव्य'मिति। तद्वाक्यान्ते बलदेवः प्रोवाच—'श्रुतं भवद्भिः कृष्णस्य वचनम्। दूतमुखेन युधिष्ठिरो धार्तराष्ट्रं स्वं भागं याचताम्। स्वदुर्नयेन नाशितं बलवताक्रान्तमर्थं प्रतीच्छोरस्य नास्त्युपायान्तरम्' इत्यर्धोक्त एवोत्थितः सात्यकिर्युयुधानस्तं विगर्हयन्नाह-'अयि मुसलायुध, शस्त्रमिव ते मतिर्निशिता यस्य तवाजातशत्रुरशिष्टः, कुरवो बलीयांसो, धार्तराष्ट्रो याच्ञयोपस्थातव्यः। खलु वा बहूक्त्वा। मम मार्गण एव मार्गणीभूय दुर्वृत्तकारिणस्तस्य हृदयं ज्ञास्यति न युधिष्ठिरः' इति। द्रुपदस्त्वब्रवीत्—'युक्तमुक्तं सात्यकिना। गर्दभो मृदुमिव साम्नोपस्थितमशक्तमेव मन्येत स दुरात्मा। अतः प्रथमं सेनासंग्रहोद्योगं कृत्वा पश्चात्तत्र दूतः प्रेषणीयः' इति। तद्वाक्यमङ्गीकुर्वन्भगवान् 'यदि त्वर्थ एवोपायः साधनं पर्यवस्यति तदा सर्वेषामाह्वानानन्तरमस्मभ्यं निवेदयत। उभयोः संबन्धिनां क्वचित्पक्षपातकौलीनं मा भूत्' इत्युक्त्वा सपरिवारः स्वां पुरीमवाप।

ततः पाञ्चालः साह्याय क्षत्रियान्वरीतुं तत्र तत्र दूतानादिश्य स्वं पुरोहितमाह—'विप्रर्षे, कुरुसदो गत्वा तथा व्याहर यथा वीराणामु-

त्साहो भज्येत। ततस्तत्समाधानव्यग्रे धार्तराष्ट्रे, लघु सेनां संग्रहीष्यामः। इदमस्माकं सद्यः फलम्। दूतकर्म तु फलतु न वा। त्वं विप्रो वृद्धश्चासि। अतो निःशङ्कमनुष्ठीयताम्' इति प्रस्थापयामास। दुर्योधनस्तु चारैस्तत्सर्वं विदन्, स्वयमपि सेनासंग्रहोद्यमं कृत्वा कृष्णं स्वयं वरीतुकामो द्वारकामेत्य शयानस्य भगवतः प्रबोधं प्रतिपालयंस्तच्छिरोदेशे कस्मिंश्चिदासने आस्त। अर्जुनोऽपि तेनैवार्थेन तदा तत्रैत्य स्वपतस्तस्य देवस्य पादान्तिके तदुपधानवदतिष्ठत्। अथोत्थितो भगवान्पूर्वमर्जुनं पश्चाद्दुर्योधनं च पश्यन्द्वयोः समागमार्थं संपृच्छमानो दुर्योधनमाह—'कुरुपते, युवां द्वावप्येककार्यावागतौ। तत्र भवान्प्रथममागतः, अर्जुनस्तु मया प्रथमं दृष्टः। द्वयोः संबन्धी चास्मि। तदुभयोश्च साहाय्यं चिकीर्षामि। प्रथमतरं बालो हि प्रवारणीयः। तस्मादर्जुनः पूर्वं वृणोतु' इति तमुक्त्वा पार्थमब्रवीत्—'सखेऽर्जुन, नाहं योत्स्ये, न च शस्त्रं धारयिष्यामि। वाचा केवलं साह्यं कर्तास्मि। तादृशोऽहं वा तवापेक्षितः, उत महाबला मम सैनिका वा' इति। तेनाशस्त्रे जनार्दने वृते, मुदितो धार्तराष्ट्रस्तद्बलमादाय पार्थं जितं मन्वानः संकर्षणगृहं प्रविवेश। प्रविशंश्च स पूजयता तेन 'कुरुराज, कृष्णो भृशं निषिद्धोऽपि पाण्डवेषु प्रवण एव भवति। न मे मनः सुभद्राहर्तरि स्निह्यति। नापि कृष्णप्रत्यवस्थानेन त्रैलोक्यमपि मे काङ्क्षितम्। तस्मान्मामनपेक्ष्य धर्मेण युद्ध्यस्व' इति विसृष्टः स्वपुरं गतवान्। 'अशस्त्रं मां किमवृणोः' इति कृष्णेन पृष्टो गाण्डीवी तं प्राह—'सखे माधव, त्वं पूर्वमेव प्रसिद्धतमोऽसि। अतस्त्वयि शस्त्राणि विजयनिमित्तं यशस्त्वामेव

गच्छेत्। न हि सवितरि प्रकाशमाने ज्योतिरन्तराणि स्वयं प्रभवितुमीशते। त्वद्वद्भवितुमाशंसोर्मम मनोरथः काकतालीयेन तव वरणेन संपादितः। अन्यच्च। भवता क्रियमाणे सारथ्ये मम चिरान्मनोबन्धः। तमपि निर्वर्तयितुमर्हसि' इति। तेन तुष्टो वासुदेवस्तमालिङ्ग्य तथेति तेन सहोपप्लव्यमगात्।

मद्रराजः शल्यस्तु महत्या सेनया पाण्डवसाहाय्यायागच्छन् पथि विरचितासु सभासु तेन तेनोपचारेण प्रमुदितः 'केनैवं ममापचितिः कृता, तं कथयत। तस्याभीष्टं पूरयितुकामोऽस्मि' इति तत्पालानप्राक्षीत्। अद्राक्षीच्च तत्क्षणं प्रकाशीभूय प्रणमन्तं दुर्योधनम्। तेन च सर्वमेवोपचरणमात्मकृतं निवेदयता समरसाहाय्यार्थितः स शल्यस्तथेत्यभ्युपगम्य, युधिष्ठिरदर्शनार्थमुपप्लव्यमुपगम्य, तस्मै पथि धार्तराष्ट्रसंवादमात्मनः संश्रवं च श्रावयामास। युधिष्ठिरस्तु तद्वाक्यं पूजयन्नाह—'मातुल, नन्ववश्यं निर्वोढव्यो ह्याश्रुतोऽर्थः। किं त्वकार्यमपीदं मदर्थं कर्तव्यमेव। यथा भवान्कृष्णसदृश इति भवन्तं स कर्णस्य सारथ्याय नियोजयिष्यति। आश्रित्यहननन्यायेन तदङ्गीकृत्य तस्य सूतपुत्रस्य तेजोवधः कार्यः' इत्युक्त्वा स्मृतानुभूतदुःखोऽश्रूणि मुमोच। स तु तमाश्वासयन्नब्रवीत्—'भोः पाण्डव, किं विषीदसि। नैकान्तिकं हि देवानामपि सुखम्, किमितरेषाम्। श्रूयते हि पुरा देवराजो विश्वरूपस्य वृत्रस्य च हत्याभ्यामभिभूतः श्रिया प्रियया च विनाकृतः कथंचित्पुनरपि तद्द्वयं च लब्धवानिति। त्वमपि नातिचिरेण कालेन स्वं राज्यं प्राप्स्यसि। अहमपि तवार्थं यथाशक्ति साधयितुं यतिष्ये' इत्यापृच्छ्य पुनः कुरूणां स्कन्धावारमयासीत्। अथ

युधिष्ठिरस्य बलं सप्तभिरक्षौहिणीभिरपूरि । तदनु द्रुपदपुरोधा बहुभिः शिष्यैः सह हस्तिनामासाद्य, एकादशभिरक्षौहिणीभिः संकुलायां तत्र सभास्थं धृतराष्ट्रमुपगम्य हस्तमुद्यम्योच्चैर्बभाषे—'भो राजन्, युक्तं नाम ते मायया भ्रातृपुत्राणां राज्यमपहृत्य, प्रत्यर्पणाय समयं च कृत्वा, प्राप्तेऽवसरे स्वयमेवमतिसंधातुम् । कथं बकारिगन्धहस्तिनो गाण्डीविकण्ठीरवस्य कंसारिशरभस्य चाग्रे धार्तराष्ट्रशशकाः स्थास्यन्ति । तस्माच्छाम्यतु ते कुदृष्टिः । मास्तु समरसंरम्भः । अर्धराज्योत्सर्गेण स्वस्थो भव' इति । 'विप्रर्षे, सत्यमुक्तं भवता । किं तु ब्राह्मण्येन तीक्ष्णा ते वाक्' इति वदत एव भीष्मस्य कर्णः सरभसमुदीरयामास—'ननु भोः किं वृथा भीषयसि । ब्रूहि तं सत्यसंधमानिनं युधिष्ठिरं—यदि न्यायेन राज्यमभिलषसि तर्हि पुनः सम्यक् समये तिष्ठ । विपर्यये मम कालपृष्ठं प्रतिवक्ते'ति । तद्वाक्येन कुपिते 'रे रे राधेय, गोग्रहं घोषयात्रां च विस्मृत्य किं जल्पसि । धिक्त्वां निर्लज्जम्' इति तं निर्भर्त्स्यमाने पितरि, तं सान्त्वयन्धृतराष्ट्रो ब्राह्मणमाह—'विप्रर्षे, सम्यग्विमृश्य क्षिप्रमेव दूतं प्रेषयामि । भवतोऽनुष्ठानोपरोधो मास्तु' इति तं विसृज्य, संजयमाहूय 'गावल्गणे, यथास्मासु कलिर्न भवेत्, तथा युधिष्ठिरं बोधयित्वा शमेनायाहि' इति कर्तव्यं चोपदिश्य पाण्डवान्तिकं प्रजिघाय ।

स तथा गत्वा सबहुमानमागमनप्रयोजनं पृच्छन्तं युधिष्ठिरं प्राह—'राजन्नजातशत्रो, त्वत्कृते महाजनक्षयं प्रत्यासन्नमाकलय्य युद्धाद्बिभेति ते पिता । अनुकम्पया कम्पितहृदयस्य तस्य वचो मानय । निवर्तय कलहाभिनिविष्टं भावम्' इति । सोऽपि किंचिद्व्यथित इव

प्रत्याह 'सूत, विप्रलम्भकवचनं हीदं यदग्निना स्वयं गृहमुद्दीप्य प्रातिवेशिकशिरसि निक्षेपणम्। त्वमेव वेत्सि यन्मूलकोऽयं दुर्व्यवसाय इति। अथवा तिष्ठत्वयमतीतोपालम्भः। अधुनापि न किंचिच्छिन्नम्। वितरतु मे पित्र्यं धनं, वितरतु चायोधनम्' इति। संजयस्तु तदनभिनन्द्यैव प्रत्युवाच—'भो धर्मसंभव, शृणु भूतार्थम्। त्वं धर्मात्मेति कृत्वेदमुच्यते। तन्मास्तु महदिदं वैशसम्। अहिंसा हि परमो धर्मः। न हि कुरवः प्रदानेन तव मैत्रीं प्रतिपालयन्ति। किं वा द्रोहेण भोगान् भुञ्जानस्य धार्तराष्ट्रस्य शिरसि शृङ्गमुत्पन्नम्। किं च वा तापसालये तपस्यतस्तव व्याहतम्। भुक्तवतो बुभुक्षितस्य च सममेव कालो गच्छति। पूर्वं धर्मबुद्ध्या धर्मपत्नीं भ्रातॄंश्च दुःखार्णवे निपात्य आत्मानं च परदासीकृत्य, चरमे वयसि धनतृष्णया संतप्यसे। अल्पं हि जीवितम्। तस्माच्छाम्यतु भवान्' इति। 'भोः संजय, सत्यमुक्तं भवता त्वं धर्मात्मेति। अत एवायं निर्बन्धः। परैर्विषमां दशां गमितस्य मे गत्यन्तराभावाद्धर्म एवायम्। यद्यत्र विसंवादस्तर्हि कृष्णो ब्रवीतु' इति युधिष्ठिरेण प्रत्युक्ते, माधवः सूतमुवाच—'संजय, केयं कुरूनधिकृत्य धर्ममीमांसा, यैः सम्राजः पत्नी सभामानीता क्लेशिता च। तत्तिष्ठतु। ब्रूहि तं वृद्धं राजानं—गुरूणां पादावुपचरितुं, संग्रामे परेषां मूर्ध्नि संचरितुं च पाण्डवाः शक्ताः। यत्तेऽभिरुचितं तदनुष्ठीयताम्' इति। तथेति प्रस्थितं तं सूतं राजा साभ्यर्थनमाह—'संजय, ब्रूहि तं लुब्धं ग्रामपञ्चकेनापि शाम्येयम्' इति।

तदनु रात्रौ प्रत्यागत्य 'सर्वं पाण्डववाक्यं श्वः प्रातर्वक्तास्मि' इत्युक्त्वा गृहं गते संजये, तच्चिन्तया संजातप्रजागरो धृतराष्ट्रो

विदुरसनत्सुजाताभ्यां धर्मज्ञानश्रवणापदेशेन रात्रिशेषं गमयन्, प्रातः सदसि तं सूतं पृच्छंस्तेनाख्यायि—'महाराज, तव बहुपुत्रतां तदनुवर्तितां च, त्वत्पुत्राणां दुरात्मतां च, भीमस्य नागायुतप्राणतामत्यमर्षणतां च, गाण्डीविनोऽमानुषवीर्यतां वासुदेवसहायतां च पुनः पुनर्विमृश्य, त्वयि कृपया पर्याकुले धर्मसुते, कृष्णस्य मुखमवलोकयन्किरीटी प्राह—'तात, उदितः सविता, तदिदानीं दुष्करमन्धकारेण छिद्रपिधानम्। तस्मात्तव पुत्राणामनयमनयमवधार्य पालय संविदम्। लालय वा युगपत्पुनर्दुर्लभदर्शनां तव संततिमिति' इति तद्वचः श्लाघमानः शान्तनवः सहृदयमिदमवोचत्—'भद्र दुर्योधन, नरनारायणौ किल कृष्णार्जुनौ भूभारक्षपणायावतीर्णौ। ततः परमश्लीलमिति वक्तुं संकुचति मे जिह्वा। सति हि कुड्ये चित्रकर्मचिन्ता। यदुपघ्ना तवाशालता तस्यास्य राधेयस्य रणसाहसम्, एतेन यमुच्छेद्यं मन्यसे तस्य पार्थस्य वीर्यं च युगपदेव भवता प्रत्यक्षितं च चित्रसेनसमागमे। तदलं बलीयसा सह विरोधेन' इति। तमेवार्थमनुवदति द्रोणे, तदनादृत्य 'युधिष्ठिरः किमाह तद्ब्रूहि' इति पुनः पुनः पृच्छन्धृतराष्ट्रः 'अन्ततो ग्रामपञ्चकोत्सर्गादृते संग्रामोऽवश्यंभावी। एष तेषां सर्गः' इति संपिण्डितार्थं सूतेनोक्ते, गान्धार्या सह पुत्रं विविधैर्वाक्यैरनुनिनाय। स पापस्तु मर्कटो मुष्टिग्रहमिव स्वं कुदृष्टिग्रहं न विजग्राह। उज्जगार च नरेन्द्रनिर्बन्धेनेमां गिरं गरमिवाशीविषः—'तात, किं वृथा प्रलापेन। अनस्तमिते दिवाकरे कुतो निशापतेरुदयः। तस्मात्प्रतीक्षतां ममान्तं पाण्डुपुत्रः' इति। कर्णस्तु भीष्माधिक्षेपमसहमानः प्रतिजज्ञे—'यावदयं पितामहः शस्त्रं धारयति, तावदहमशस्त्री' इति। भीष्मस्तु

विहस्य तं प्रत्युवाच—'राधेय, साधुरयं ते नयः, यन्निष्प्रयोजनस्यार्थस्य स्वयं परित्यागवदभिनयः। भीष्मे शस्त्रिणि कुत्र तव शस्त्रमुपयुज्यते। न हि व्यापारिणि दम्भोलौ नलिकेनार्थः' इति। सूतस्तु पुनः पुनः पृच्छते धृतराष्ट्राय 'शमार्थिनः कृष्णस्य गोष्ठी नातिचिरेणेह भविष्यति' इत्युक्त्वोपरराम।

युधिष्ठिरस्तु संजयगमनानन्तरं कृष्णं पप्रच्छ—'माधव, श्रुतमस्माकं पितुर्वचनम्। स ह्यभ्यवहारेण विनातिथ्यं चिकीर्षति। स्वयं चोरयित्वा परं स्तेनशब्देनाक्रोशति। एवं स्थिते किमत्रावश्यमनुष्ठेयं, तत्प्रब्रूहि' इति। 'अहं तत्र गत्वा संध्यर्थं यतिष्ये' इति भगवतोक्ते स राजा ससंभ्रममाह—'मा खलु मा खलु। न हि हरवृषभः कथमपि धुरि योगमर्हति। अतो न युक्तं तव दूतकर्मणा गन्तुम्। विमानयिष्यन्ति च ते गृध्रा राजहंसमिव संभावनीयं भवन्तम्। अतो न प्रसीदति मे हृदयम्' इति। तदाकर्ण्य भगवान्सस्मितमाह—'ननु राजर्षे, कथं बान्धवेषु विनश्यत्सु, मादृशेनोपेक्षमाणेन भाव्यम्। कथं च वा सर्वलोकक्षयेऽप्युदासितव्यम्। अतोऽवश्यं प्रयातव्यं प्रयतितव्यं च यथाशक्ति। सिद्धौ तु लोकोपकारः। असिद्धौ च वाच्यतापरिहारः। अथ स किंचिदसन्मयि प्रयुञ्जीत, अवसितस्तदानायासेनास्मन्मनोरथः। क्रुद्धस्य मम पुरः शक्रोऽपि न तिष्ठासेत्। तस्मादनुजानीहि प्रयाणाये' इति। 'अयुद्धेनैवार्थं साधय' इति वदति भीमे भगवता पुनरुत्तेजिते, 'यथार्हं क्रियतां' इति वदतोरर्जुननकुलयोः, 'हन्तव्यास्ते पापाः' इत्युत्तिष्ठति सहदेवे, तद्वाक्यमभिनन्दति सात्यकौ, द्रौपदी बाष्पगद्गदमिदमगदीत्—'दुर्जातबन्धो भगवन्देवकी-

नन्दन, कुलक्षयाशङ्काझञ्झावातेन प्रतिज्ञावरणमाच्छिद्य पतन्त्याकालिक्या घृणावृष्ट्या निर्वाणो हि नाथस्य भीमस्य चिरसंभृतः क्रोधानलः। तत्किमिति दुःखधूमावशेषं तं पुनः संधुक्षयितुं प्रयतसे। कामं संदधतां नाम पाण्डवाः कुरवश्च। न हि ताडनेन वारि विघट्यते। ननु दुर्लभाः खलु भ्रातरः, सर्वत्र सुलभं च कलत्रम्। संधानाय घटमानेन भवता तु इदं स्मर्तव्यम्' इति स्वं केशाग्रं हस्ते गृहीत्वा दर्शयन्ती सा, उद्वेलस्य स्रोतसः परीवाहेणेव प्रवहता बाष्पपूरेण कृत्स्नमेव सदः करुणोत्तरं वर्तयामास। 'अयि कल्याणि, तव शोकाग्निरेव तान्धक्ष्यति। अवन्ध्या हि त्वादृशीनां सतीनां संकल्पाः। तस्मादचिरेणारोक्ष्यसि मनोरथभद्रासनम्' इति तामाश्वास्य प्रस्थितः कृष्णो युधिष्ठिरेण 'माधव, निसृष्टार्थोऽसि गम्यताम्' इति प्रस्थापितः सपरिवारः प्रतस्थे।

धृतराष्ट्रस्तु दूतैः कृष्णमायान्तं विदित्वा, तत्पूजार्थं पथि तत्र तत्रोपचारान्पुत्रेण कारयित्वा, क्षत्तारमाहूयाह—'श्वः प्रातर्यदुपतिरिहायास्यति, बहून्ग्रामान्रत्नानि च तस्मै प्रियातिथये प्राभृतकीकृत्य तमर्चयितुमुत्सुकोऽस्मि' इति। कुशाग्रबुद्धिः सोऽपि तदाशयमुद्घाटयन्नाह—'राजन्, एतदन्यच्चार्हत्येव स दाशार्हः। किं तु त्वं मायया तं संजिघृक्षसि। तन्न शक्यम्। अनन्यो हि पार्थात्पार्थसारथिः। परद्रव्येण तीर्थोपस्थानं मास्तु। आगतस्य तस्य वचो मानयन् पञ्चभिर्ग्रामैः पाण्डवानुपशमय। एतदेवालम्' इति। दुर्योधनस्तु तद्वाक्यमङ्गीकुर्वन्निव प्राह—'तात, साधूक्तं विदुरेण। जानामि यादवस्य पार्थे पक्षपातम्। तदधुना तदुपचरणमसंभावितम्। व्यायामकाले

विपक्षसंभावनं हि भीरुत्वानुमापकं स्यात्। तद्वासुदेवोऽनुपचरणीयः, किं तु संयन्तव्यः' इति। भीष्मस्तु तं धिग्धिगिति निर्भर्त्सयामास।

कृष्णस्तु पथि तत्कृता अपचितीरसमीक्ष्यैव हस्तिनामासाद्य दुर्योधनवर्जं सर्वैरपि कुरुभिरभिगम्यमानस्तेनैव पथा धृतराष्ट्रमुपगम्य पूजयता तेन सह क्षणं संलप्य, विदुरगृहे स्थितामतिदुःखितां पितृष्वसारं कुन्तीं चाश्वास्य दुर्योधनगृहं प्राप्य तेन भोजनाय निमन्त्रितः प्राह—'कौरव, कृतार्थाः खलु दूता भुञ्जते, मानं लभन्ते च। अतः साधिते मदागमनार्थे तथा करोमि' इति। 'ननु भोः, कोऽयं व्याहारः। नाभ्यवहारस्य व्यवहारस्य च समाहारोऽस्ति। न चावयोर्मिथः संप्रहारः। सत्येवं किमिति ममोपहारमाहारं वाप्यनासङ्गेन परिहरसि' इति वदन्तं तं कृष्णः पुनरुदाजहार—'प्रीत्या दौर्गत्येन वा परान्नं भुज्यते। न वयं दुर्गताः, न च त्वमस्मासु प्रीतिमान्। पश्य। जानीहि मां गुणपक्षपातिनम्। अतो यो गुणिनं द्विषन् स मामेव द्वेष्टि। पाण्डवा गुणनिधय इति सार्वलौकिकमेतत्। बाल्यात्प्रभृति तानकस्माद्द्विषन्भवान्कथं भोज्यान्नः। न केवलं त्वमेक एव, अपि तु विदुरवर्जं सर्वेऽपि कुरवोऽवद्यकर्माण एव, ये राजमहिष्याः सभानयनमुपेक्षितवन्तः' इत्यधिक्षिप्य विदुरस्य गृहे भुक्त्वा सुखं सुष्वाप।

परेद्युर्देवो वासुदेवः सात्यकिविदुरादिभिः समं सभामलंकुर्वन् तत्राविर्भवतो नारदादीनृषींश्च मानयन्सर्वलोकसमक्षं परिषदि धृतराष्ट्रमाभाष्याबभाषे—'ननु भारताग्र्य, वेणवो लोके स्वयं संहत्यावस्थानेन दुरुन्मूला भूत्वा, स्वच्छिद्रेणान्तः प्रविशता समीरेण मिथः संघट्टिता निरवशेषं भस्मीभवन्ति। एवं गहना ज्ञातयोऽल्पेनान्त-

श्छिद्रेण परेषां सुखोच्छेद्या भवन्ति । परोऽपि तज्जनसाहाय्येन विना नालं विपक्षे प्रहर्तुम् । न हि त्सरव्येण दारुणा विना परशुर्वृक्षच्छेदनाय संपद्यते । संहतानि तु तृणान्यपि दुराधर्षाणि हि दृश्यन्ते, किं पुनर्महासारास्तव पुत्राः पाण्डवाश्च । तथा सिंहवनयोर्योगो मिथो दुरभिभवत्वं भवति, एवं महारण्यस्थानीयस्य सपुत्रस्य तव सिंहस्थानीयैः पाण्डवैर्योगोऽस्तु । विषीदन्तु तव दुर्हृदः । निषीदन्तु सुखमेकत्र सुहृदः । आसीदन्तु सर्वेऽप्यमी राजानः स्वं स्वमावासम् । प्रसीदतु भवान् । एतदेव त्वां याचितुमागतोऽस्मि । किं बहुना । त्वदायत्तास्य महतो जनस्य स्थितिर्मृतिर्वा । देहि प्राणभिक्षाम्' इति । अथ नारदादिभिरुपदिष्टं न्यायमप्यश्रुत्वैव स्थितं दुर्योधनं धृतराष्ट्राभ्यर्थनया कृष्णः प्रोवाच—'भोः कुरुपते, रिपोरतिरिच्यमानबलो विगृह्णीयात्, विपरीतस्तु संदधीतेति हि नीतिसारः । बहुशो दृष्टपूर्वं हि तत्र तत्र भीमार्जुनयोर्बलम् । अथवा किमन्येन निदर्शनेन त्वय्येव साक्षिणि स्थिते । एवमवहीनबलस्त्वमतिबलाभ्यां ताभ्यां सह कथमभियोक्तुमीहसे । दुर्बलानां वेतसवृत्तिर्हि परायणम् । तस्मादेतदेव तीर्थीकृत्य पञ्चग्राम्युत्सर्गेण सर्वां पृथिवीं शाधि' इति । दुर्योधनस्तु मुखं व्यावर्त्यावाग्दृष्टिः प्रोवाच—'भोः कंसारे, केयं विभीषिका । वयं दुर्बला बलिनो वा स्याम । क्षत्रियस्य संयुगे शत्रुणा वधोऽपि वरं, न तु तदुपस्थानम् । भाराक्रान्तो हि शिलास्तम्भो भज्येतापि न नमेत् । तस्मादस्माकं यद्भावि तद्भवतु । जीवन्दुर्योधनः सूच्यग्रभेद्यामपि भुवं पाण्डवेभ्यो न प्रयच्छेत्, किं पुनः पञ्च ग्रामान् । किं तु अनात्मज्ञोऽयं पाण्डवो मताक्षेण शकुनिना द्यूते निर्धनः कृतो

यदि, तदा कोऽत्र ममापनयः येन भवान्मां वाक्शल्यैस्तुदति। अथ त्वं मन्यसे मयैव प्रवर्तितं, तथापि न दोषः—'मम पित्र्यं राज्यं मय्यप्रौढे परैः प्रतार्य हृतं पुनः प्रत्याहृतम्' इति। कृष्णस्तु सोपहासमुच्चैः चाह—'अयि नयवादिन्सुयोधन, त्वया न किंचिदप्यपकृतं नाम पाण्डवानाम्। कस्तर्हि विषान्नजतुगृहादिना तान्हन्तुमयतिष्ट। ननु तवैवेदं पित्र्यं न पाण्डवानामपि, येन सूच्यग्रभेद्याया अपि भुवो न ते भागिनः। स्थिरो भव। स्मर्तासि मम वचनम्' इति। अनन्तरं 'आर्य, एते त्वां निगृह्य युधिष्ठिरे प्रदास्यन्ति' इति दुःशासनेनोक्तः स पापो निश्वस्य तत उत्थाय गतः कर्णादिभिः सह कृष्णं निग्रहीतुं मन्त्रयामास। सात्यकिना तद्व्यापारं विदन्भगवान् पुनर्धृतराष्ट्रेण सभां प्रवेशितं तं पापमुवाच 'रे मूर्ख, यन्मन्यसे कृष्णोऽसहाय आगतस्तस्मादेनं भन्त्स्यामीति, सर्वं जगदत्रैव दर्शयिष्यामि' इत्युक्त्वा विश्वरूपं दर्शयन्धृतराष्ट्रं दिव्येन चक्षुषा योजयामास। सोऽपि तद्रूपं दृष्ट्वा तमाह 'भगवन्, उपसंहर मे दृष्टिं, न हि त्वां दृष्टवत्यानया दृशान्यं द्रष्टुमुत्सहे' इति। स तथेति तद्दृष्टिं तद्रूपं चोपसंहृत्य तानामन्त्र्य निर्गतः कुन्त्यै सर्वं सभावृत्तं न्यवेदयत्। 'विक्रमोपार्जितमेव क्षत्रियस्य प्रशस्यतरं न तु याच्ञयोपनतम्। तस्माद्युद्धमेव प्रवर्तताम्' इति तयोक्तः कृष्णस्तथेति तामापृच्छ्य प्रस्थितः सन् एकान्ते कर्णमाहूय तस्य कौन्तेयत्वैतिह्यं व्याख्याय, पाण्डवपक्षस्वीकरणाय चोदयामास। स तु 'अच्युत, अस्तु नाम मम जन्मादि यथोक्तम्, तथापि कथं पुत्रनिर्विशेषं पोषितवतीं राधां तत्कुले प्ररूढं संबन्धादिकं च, तथा भ्रातृनिर्विशेषमादृतवन्तं धार्तराष्ट्रं च प्रयोजनकालेऽकस्मादपहाय

उभयोरपि कृतघ्नो भवतु कर्णः । चापलपिशुनं खलु शाखाचङ्क्रमणम् । तत्कृतमायासेन' इति तमुक्त्वा स्वगृहमगात् । ततः प्रभाते जाह्नवी-तीरे सवितारमुपतिष्ठमानः कर्णः 'भद्र, वैकर्तनः कौन्तेयोऽसि । अत-स्तव भ्रातॄणां युधिष्ठिरादीनां सुखदुःखयोः षष्ठांशहरो भव' इति कुन्त्यादिष्टस्तत्क्षणं तदनुवदन्त्या अशरीरिण्या वाचा च चोदितः सन् सव्यथमाह—'अयि सूरि, स्त्रियो निसर्गत एवाशुचयो निस्त्रिंशहृदया आत्मकार्यसाधनैकपरा इत्यत्र किमितः परं निदर्शनान्तरमन्वेष्टव्यम् । यत्त्वमात्मन एव जुगुप्सावहं कर्म कृत्वा सैंहेयस्यौरसस्य सारमेयतां प्रापय्य, पुत्राणां विपत्तिमुत्प्रेक्ष्य, इदानीं सुप्तोत्थितेव मां बोधयसि । अथ वा कपिध्वजादृतेऽन्यं तव पुत्रं मम शरः शरव्यं न करिष्यति । अतो मया तस्मिन्, तेन मयि वा हतेऽपि, सर्वथा त्वं पञ्चपुत्रासि । एतदेव त्वद्गर्भवासव्यपदेशस्यानृण्यम्' इति तां विससर्ज ।

कृष्णस्तु युधिष्ठिरमासाद्य सभावृत्तं वर्णयितुमारेभे—"शृणु राजन्नजातशत्रो ! सर्वमपि वक्तव्यं मयोक्तं तेन दुरात्मना न गृहीत-मिति नाद्भुतम् । किन्तु 'तात दुर्योधन, ममेदं पित्र्यं राज्यं, मदुपेक्षया विचित्रवीर्यं, ततः पाण्डुं, ततस्तव पितरं चागात् । मयि स्थिते न कस्याप्यत्र स्वातन्त्र्यम् । तस्मान्मद्वचनात्पाण्डवेभ्यो भागं प्रयच्छ' इति न्यायवादिनि भीष्मे, 'यत्र भीष्मस्तत्र द्रोणः, तिष्ठ पितामहवचने, तदैव वयं तवाधीनाः' इति शासत्याचार्ये, 'पितः शान्तनव, कोऽयं दुर्योधनो नाम । त्वया वर्धितं कुलं नश्यत्कथमुपेक्षसे । तदिमं निगृह्य स्वयं शाधि' इति तर्जयति क्षत्तरि, 'वत्स, कथं भीष्मादीन-तीत्य तव स्वातन्त्र्यम् । तेषां वचसि तिष्ठ । अलमर्धराज्यं सवर्गस्य

तव भोगाय' इत्यनुनयन्त्यां मातरि, 'भद्र, पूर्वं ज्येष्ठे यदौ स्थितेऽपि, पितुरिष्टतया कनिष्ठः पूरू राजा बभूव। तथा त्वग्दोषेण ज्येष्ठमपि देवापिमतीत्य कनिष्ठमस्मत्पितामहं शन्तनुमेव राज्यश्रीः शिश्रिये। पितुरनिष्टो हीनाङ्गो वा न राज्यार्ह इत्यस्मत्कुलमर्यादा। अनेनैव न्यायेन मम राज्यं नाभूत्। अभागिनस्तवार्धमप्यधिकमेव। तस्मा-च्छाम्यैतावता' इति कुलसंप्रदायमुपदिशति राजनि धृतराष्ट्रे, सर्वमेव तत्स मूर्खः आकाशभाषितमिवानवधार्य 'अद्य पुष्यस्तदभियुज्यतां वाहिनी संग्रामाय' इत्यादिश्य निर्ययौ। ततः किमन्यत्। मां संयन्तुमुद्युक्तः' इति। तच्छ्रुत्वा युधिष्ठिरो धृष्टद्युम्नं सेनापतिं कृत्वा सर्वैः सैनिकैः सह कुरुक्षेत्रं गत्वा चर्मण्वत्यास्तटे सेनां निवेशयामास।

दुर्योधनस्तु भीष्मं सैनापत्येऽभिषिच्य, तेन सर्वैरनीकैश्च कुरुक्षेत्रमासाद्य, तत्र स्कन्धावारं चक्रे। तदानीं हलायुधो युधिष्ठिर-समीपे ज्ञातीनां मिथो युद्धमात्मनोऽनभिप्रेतमावेद्य, तद्दुःखेन दूयमानस्तीर्थयात्रायै जगाम। अत्रान्तरे भीष्मकसुतो रुक्मी 'यदि भीतस्त्वं तर्हि तव समरे साह्यं करोमि' इत्यर्जुनं वदन् 'नाहं भीतः' इति तेन निरस्तः, तथा दुर्योधनमेत्य वदंस्तेन च तथोक्तः पूतिकू-ष्माण्डन्यायेनोभाभ्यां च प्रत्यादिष्टो व्रीडितो गृहमगात्। तदनु दुर्योधनेन प्रेषित उलूको नाम विप्रो युधिष्ठिरं प्राप्य प्रोवाच—'भो धर्मपुत्र! मां धार्तराष्ट्रस्य संदेशार्थकं दूतं विजानीहि। अतो मय्यनमर्षेण श्रोतुमर्हसि' इति। तेन तथास्त्वित्युक्ते प्राह—'रे रे बैडालव्रतिक युधिष्ठिर! साधूक्तं त्वया विराटे नाम्ना कङ्कोऽस्मीति, यत्त्वं सर्वान्भक्षयितुमीहसे। एवंविधस्य तव कथमजातशत्रुता।

तव दौरात्म्यं जानता हि मया बाल्यात्प्रभृति युष्मासु दण्डो धार्यते। एकचक्रे युष्माकं भैक्षी वृत्तिः, महाशनस्य तव भ्रातुः सूदता, षण्ढस्य कन्यानर्तकता, यमयोश्च पशुवृत्तिरित्यादीनि ममैव बुद्धिकृत्यानि। भार्यायाः पराभवं, प्रतिज्ञां च स्मृत्वा पुरुषा भवत। रे रे गोविन्द! वयं च जानीम इन्द्रजालादिकम्। अकिंचित्करं हीदं सांयुगीनस्य मम पुरः। श्वस्तावदविस्मृत्यानुष्ठीयतां सर्वमपि यद्भवद्भिः शिक्षितम्' इति। ततो युगपदेव कुपितेषु योधेषु, 'यथा तव मतं तथा कुर्म' इति व्यवहसति कृष्णे, 'स्त्रीवत्परबलाश्रयस्य तव केयं वाचाटते'त्यधिक्षिपति पार्थे, 'अचिरेण तव मूर्धा ममाङ्घ्रिणा ताड्यते'ति गर्जति भीमे, राजा—'गच्छ ब्रह्मन्, ब्रूहि धार्तराष्ट्रहतकं नाहमस्य क्षयस्य हेतु'रिति तमुलूकं निवर्तयामास।

अथ रथातिरथसंख्याने भीष्मेणार्धरथत्वेन गणितः कर्णः कुपितः पूर्वोक्तं तद्वधानन्तरमात्मनः शस्त्रग्रहणव्रतं पुनरुक्तयामास। भीष्मस्तु रथानतिरथान्महारथानर्धरथांश्च गणयित्वा दुर्योधनं प्राह—'भद्र, भवन्त इव मे पाण्डवाश्च। तस्मात्तद्वर्जं सर्वानपि हनिष्यामि। किंतु द्रौपदं शिखण्डिनं न हन्याम्' इति। तन्निदानं जिज्ञासौ धार्तराष्ट्रे पुनर्व्याचचक्षे—'शृणु वत्स, येनाहं शिखण्डिन्यपराद्धशस्त्रोऽस्मीति। पुरा तव पितामहस्य विचित्रवीर्यस्य विवाहार्थमम्बिकाम्बालिकाभ्यां सहानीता तज्ज्येष्ठाम्बा प्रस्तुते विवाहे साल्व आत्मनोऽनुरागमावेदयन्ती मयोत्सृष्टा तेन चानङ्गीकृता सती, उभयकूलपशुरिवोभयत्राप्यलब्धमनोरथा मद्गुरुं जामदग्न्यं शरणं जगाम। तेन तत्परिग्रहाय नियुज्यमानोऽहं तथानुष्ठानमन्तरेण तं सर्वथापि समाधातुमशक्नुवन्, बला-

तेन साहसिकेन शस्त्रं ग्राहितोऽस्मि। ततश्च प्रवृत्ते गुरुशिष्ययोरावयोः संप्रहारे, व्यतीतेषु चाविशेषेण युद्धेन त्रयोविंशतिदिवसेषु, चतुर्विंशे दिने प्रस्वापास्त्रं संदधाने मयि, भीतैः ऋचीकादिभिर्निषिद्धो भार्गवः 'अयि राजपुत्रि, अहं देवव्रतेन जितोऽस्मि। त्वं तमेव शरणं याहि' इत्युक्त्वा महेन्द्रगिरिं गतवान्। अथ मद्वधाय तपस्यन्ती सा 'अनन्तरे जन्मनि त्वमेव स्त्रीत्वेन जनित्वा पश्चात्पुंस्त्वं लब्ध्वा भीष्मं हनिष्यसि' इति महेश्वराद्वरं लब्ध्वा वह्नौ तनुं जुहवामास। अत्रान्तरे पाञ्चालः स्वयमप्रजाः परिभूतपूर्वश्च मया मद्वधार्थं तपस्यन्, प्रीतान्महेश्वरात् पश्चात्पुत्रभावं प्राप्य मां हनिष्यन्तीं कन्यां वरं लेभे। ततः कालेन जातां कन्यां तद्वरप्रत्ययेन गूहित्वा पुत्रत्वेन व्यपदिश्य, तदुचितान्संस्कारान्विधाय, दशार्णराजस्य हिरण्यवर्मणः कन्यां दारार्थं जग्राह। ततः कालेन प्रकाशीभवति तदलीके, तयोन्मत्तचेष्टया कुपिते जिघांसयोद्यते दशार्णपतौ, तेन च भीतभीते पितरि, दारशब्दवदर्थतः स्त्रीभूयेऽपि व्यावहारिकः पुमान् स शिखण्डी नितान्तं विषण्णो भूत्वा स्थूणाकर्णाख्यस्य यक्षस्य वनं प्रविश्यात्मत्यागायोद्यतः कृपालुना तेन यक्षेण दत्ताभयः स्वं संकटं निवेदयामास। कामसंकल्पेन तेनाश्वशुरप्रत्यायनं स्त्रीत्वविनिमयेन दत्तं पुंस्त्वमादाय, तेन हिरण्यवर्माणं प्रीणनेन प्रस्थाप्य, पुनरपि तत्प्रत्यर्पणाय यक्षवनं प्रविवेश। अत्रान्तरे यदृच्छया तत्रागतो यक्षराजः स्त्रीत्वविशिष्टं तं स्थूणाकर्णं दृष्ट्वा हृणीयमानः 'यावच्छिखण्डी भुवि तिष्ठति तावत्त्वं स्त्री भव, स एव पुमानस्तु' इति तं शप्त्वा गतः। शिखण्डी तु तद्विदित्वा मुदितो गृहमियाय। ततो द्रोणादस्त्राण्यशिक्षत। स

स्त्रीपूर्वेऽस्मिन्न प्रहरेयम् । कथं मादृश ऊर्ध्वरेताः स्त्रियं स्त्रीपूर्वं वा शरस्य लक्ष्यं करोतु । अतो ममायं निर्बन्धः' इति ।

प्राप्ते तु समरारम्भदिने प्रातर्दुर्योधनः पितामहादीन् पप्रच्छ— 'कियता कालेन पाण्डवसैन्यं भवद्भिः पृथक् पृथक् क्षपयितुं शक्यम्' इति । 'मासेन शक्यम्' इति भीष्मद्रोणयोः, 'मासद्वयेन' इति कृपे, 'दशरात्रेण' इत्यश्वत्थामनि च प्रतिज्ञातवत्सु, 'पञ्चरात्रेण' इति वदन् कर्णः 'यावत्कृष्णार्जुनौ न पश्यसि, तावत्सर्वं त्वया साध्यम्' इति भीष्मेणावहसितः । चारैरेतच्छ्रुतवता युधिष्ठिरेण धार्तराष्ट्रसैन्य-क्षपणकालं पृष्टोऽर्जुनः प्राह—'आर्य, कृष्णेन सहितोऽहं क्षणार्धेन हन्याम् । अथवा प्रत्यादिष्टं तव क्रोधास्त्रेण मम पाशुपतास्त्रम् । तस्मात्स्थिरो भव । वर्तते हि तव हस्ते विजयः' इति । अथोभये च सैन्या महतोत्साहेन संनाहभेरीर्वादयांचक्रिरे ॥

इत्युद्योगपर्व ।

## भीष्मपर्व ।

अथ भगवतो व्यासस्य प्रसादेन कृत्स्नं भारतयुद्धं प्रत्यक्षीकुर्वन् संजयो धृतराष्ट्राय व्याचख्यौ—महाराज, मिलितयोः सेनयोः, भीष्मद्रोणौ राज्ञे युधिष्ठिराय जयमाशास्य तामेव प्रक्रियामहर्दिवमन्वरुध्येताम्। तदनु ध्मायमानेषु शङ्खेषु, हन्यमानेषु च संनाहपटहेषु, जलदनिर्घोषेण नन्दिघोषाख्येन स्वेन स्यन्दनेन सेनामुखमलंकुर्वाणो गीर्वाणपतेः कुमारः पक्षद्वये च स्वजनप्रायतामालक्ष्य, 'कथमेते हन्तव्याः' इति कृपया पर्याकुलीभवन्, अध्यात्मविद्यामुपदिशता भगवता विनीतकश्मलः पुनर्नवो बभूव।

युधिष्ठिरस्तु कवचादिकमवमुच्य पद्भ्यामेव परानीकं प्रविशन् साशङ्कं कृष्णेन सहानुद्रवत्सु भ्रातृषु, अप्रतिरूपं विप्रलपत्सु च रिपुषु, स्वयं तूष्णीक एव तालध्वजमभिपत्य पितामहं प्रणम्य 'कथं भवन्तं जयेयम्' इति तज्जयोपायं तमेवापृच्छत्। तस्य तया सेवया प्रवणीभूतः स शान्तनवः सबहुमानं तमुवाच—'महात्मन् युधिष्ठिर! अवश्यमनुग्राह्यो भवान्। अतः प्राप्तेऽवसरे त्वया वयं पुनर्द्रष्टव्याः' इति। स तथेति तमापृच्छ्य तया परिपाट्या द्रोणमधीष्यन्, अच्छेद्यादप्रियश्रवणं तदन्तरमुपेयाय। तथा अवध्यात्कृपात्त्रेषु शिवानुध्यानवरमवाप्य, शल्यं कर्णतेजोवधप्रतिज्ञां स्मारयन्निवर्तमानः स युधिष्ठिरः 'यद्यत्र कश्चिदस्मत्पक्ष्यः स्यात्सोऽद्यैव मया प्रेक्ष्योऽस्तु' इति परबलमध्य उद्घुष्य, 'अहमस्मि' इत्यागच्छन्तं वैश्यापुत्रं युयुत्सुमादाय स्वं रथमारुरोह। इत्थं विनीतपरिष्कृतया फलपुरस्कृतया सुसंस्कृ-

तया तस्य तया नीत्या विदग्धमानिनः स्वेऽपि ह्रेपिताः किं पुनः परे।

अत्रान्तरे वार्ष्णेयः कर्णमुपगम्य भेदयामास—'भोस्तेजस्विन्वैकर्तन! अतिरथस्य तवार्धरथत्वेन परिगणनं, तथा संग्रामेषु प्रष्ठस्य तव पृष्ठतः करणं च कथं भवान्मृष्यते। शृङ्गिणां शृङ्गभङ्ग इव मानभङ्गो हि मनस्विनां वधः। तदद्यैव पाण्डवैः पुरस्कृतः क्षपय क्षेतारमापगेयम्। क्षीणे तु तस्मिन् पुनः स्वपक्षमाश्रित्य स्वैरं ग्लपय पार्थम्। एवं चादित्य इवायनद्वयव्यापी द्व्यामुष्यायण इवोभयात्मग्राहकश्च सन्नितरां प्रकाशिष्यसे।' तदाकर्ण्य कर्णः सोपहासमुद्धतं च प्रत्याह—'ननु भोः केयं वाचोयुक्तिः। यद्यहं तव गिरा अभितश्चरेयं, तथा मम चेष्टितमवततेनकुलस्थितं हि स्यात्। तेन मम चापलेन दुर्योधनस्य मय्यप्रत्ययमात्मनीनं पश्यति भवान्। मयि प्रत्यवस्थातरि पार्थत्राणमशक्यं मन्वानो बकशिरसि नवनीतं निधाय तेन तं जिघृक्षसि। उपेन्द्र, उपेन्द्र, सम्यग्दृश्यसे। सर्वात्मना जागर्ति वैकर्तनः कर्णः। त्रायस्व मित्रं वात्र्यध्नं वात्र्यध्न्याः शक्नुयाद्यदि शक्तोऽसि।' कृष्णस्तु तं निर्भर्त्स्य पार्थमाससाद।

तदनु सरभसमारसितेष्वारम्भतूर्येषु, अहमहमिकयोद्यच्छमाना उद्यतचापबाणकृपाणादिनानाप्रहरणा उत्कटाटोपा उच्चण्डचण्डिमानश्च भटाः 'तृण्ढि पिण्ढि आहर प्रहर संहर' इत्यूर्जस्वलं गर्जन्तः परस्परं संप्रहरन्ते स्म। तत्र वैराटावुत्तरे शल्येन प्रेतनाथस्य प्रथमोपायनतया नीते, तद्भ्रातरौ श्वेतशङ्खौ च तद्गतिं गमयन् भीष्मः स्वकेतनं पातयन्त-

मार्जुनिमभिमन्युं 'अयि वीराङ्कुर!' इति प्रशस्य, सर्वमेव परबलं दिक्षु विक्षिपन् लोहितायति पतङ्गमण्डले स्वबलस्यावहारं कृतवान्।

परेद्यवि गजसाधने कालिङ्गे गदापाणिना भीमेन भुवमालिङ्गिते प्रक्रान्तप्रधनौ भीष्मार्जुनौ प्रत्यस्त्रैरस्त्राणि, एकेन बहूनि, बहुभिरेकं, तावद्भिस्तावन्ति च शस्त्रैः शस्त्राणि च शमयन्तौ, अदत्तान्तरावलब्धान्तरौ निरवकाशयन्ताविवाकाशं, तिमिरयन्ताविव मिहिरमण्डलं चलयन्ताविव साचलामचलां चिरमविश्रान्तावयुद्ध्येताम्। चतुरश्रया तया लघुहस्ततया चित्रयोधितया च चित्रीयमाणाः सेनानेतारस्तत्प्रयोगेऽनवगाहिन्या केवलं तूर्णीमुखे जीवामुखे कटकामुखे च परिवर्तमानया दृष्ट्या चित्रार्पिता इव वर्तमानाः परागतेऽह्नि स्वयमकामेनैव प्रत्यावर्तन्त।

तृतीये दिवसे तु भीमार्जुनरक्षितपक्षं स्वामक्षौहिणीं क्षोभयद्धटोत्कचाख्यं रक्षो दूरतो निःसारयन् भीष्मः संततया शरधारया सर्वान् परवीरान्मन्त्ररुद्धानिव तन्त्रप्रोतानिव यन्त्रार्पितानिव सर्वतो निरुद्धप्रसरान्कुर्वन् भृशमर्दयामास। स्वेषां तादृशं दौरवस्थ्यं गुरुप्रातिपत्त्या पार्थस्य वैक्लव्यं च पश्यन्भगवान् कृष्णः 'अत्ययोऽत्ययः!' इति गृहीतरथाङ्गो रथादवप्लुत्य संभ्रमेण भुवि कृष्टोत्तरीयाञ्चलः 'तिष्ठ तिष्ठ' इति भीष्माभिमुखमभिदुद्राव। तस्य तेनापूर्वेण संरम्भेण संभ्रान्तेषु लोकेषु, स्वयमसंभ्रान्तः स समरशौण्डीरस्तारस्वरेण तमामन्त्र्याबभाषे—'भोश्चक्रिन्! पूरय मे प्रतिज्ञां योऽहमतिसाहसिकतया 'कृष्णं शस्त्रं ग्राहयिष्यामि, येन शस्त्राग्रहणं प्रतिज्ञातं' इत्याश्रुतवानस्मि।

इयं हि महतां शैली, यदात्मनो व्रतत्यागेनाऽप्यात्मीयस्य व्रतसत्यापनम्। अतः कृतार्थय मां सुदर्शनफलोपलम्भेन।" तावदर्जुनः स्वयमपि रथादवप्लुत्य कृष्णस्य पादयोः प्रणिपत्य ययाचे—'भक्तानुकम्पिन् दामोदर! किमिति मम मनोरथतरुं संवर्ध्य स्वयमेवोच्छेत्तुमीहसे। त्वय्येवं प्रवृत्ते मम का प्रशस्तिः। सायमग्निमनुग्रहीष्यन्नादित्य इव मम तेजोवर्धनेन मामनुगृहाण। मृषोद्यता च भवन्तं मा स्पृशतु' इति तमनुनीय रथमारोपयामास। तावच्चक्षुषोरविषये जगच्चक्षुषि उभये च सैनिका विश्रान्तिमभजन्त।

तुरीयेऽहनि भीमेन चतुर्दशसु धार्तराष्ट्रेषु मारितेषु, पञ्चमे तु सौमदत्तिना भूरिश्रवसा दशसु सात्यकेः पुत्रेषु प्रमापितेषु, अविशेषेणैव युद्धेन षष्ठसप्तमयोर्दिवसयोर्गतयोः, अष्टमेऽह्नि सप्तदशसु धार्तराष्ट्रेषु भीमेन चरमां गतिं गमितेषु, अर्जुनेन नागकन्यायामुत्पादिते इरावति शकुनिपुत्रान् पञ्च पञ्चतां नीत्वा स्वयमपि दुर्योधनानुज्ञेन बकभ्रात्रा राक्षसेन ग्रीवायां खण्डिते, अस्तोन्मुखे च भानाववहारो बभूव।

गान्धारेयस्तु उपक्षीयमाणाननुजान्विमृश्य कर्णमाहूय परिदेवयांबभूव—'सखे अङ्गराज, पश्य पश्य ममाधन्यताम्। सत्स्वपि महासारेषु बहुतरेषु सहायेषु, ग्रैष्ममिव जलं मम बलं प्रतिक्षणं क्षीयते। अधिकविंशा मम भ्रातरस्तेन दुरात्मनौदरिकेण प्रत्यवसिताः। पुरा 'भवान् भ्रातॄन्घातयिष्यति' इति कालज्ञैरावेदितोऽहं दौरात्म्येन 'पाण्डवान्घातयितास्मि' इति परितुष्यन्, अधुना तु फलेन विसंवा-

दिते ऽर्थे शाल्मलीशुक इव भग्नाशो भूत्वा, 'अपि नाम तपस्विनोः पित्रोर्निर्वापोदकं न विलोपयेयम्' इति मुह्यामि। अहो दिष्टस्य दुष्टता। वामे तु यत्र निरायतनं प्रयतनं, अपेशलं कौशलं, सापाय उपायः। 'स्तोकलोभेन महन्नोच्छिन्द्यात्, यथा दुर्योधनः' इति लोकस्य वैधर्म्यनिदर्शनाय केवलं कृतजनेर्मम्भाजननिरेव वरम्' इति विलपन्निशश्वास। तं कर्णः प्रत्याह—'कुरुपते, कथं फल्गुनोपस्थानीये विधौ भवतोऽपि मनोबन्धः। विक्रममाणं वाजिनमिव स्वैरगतिं तं प्रग्रहेणेव पौरुषेण बलादनिवर्तयन् किमिति कापुरुष इव विषीदसि। आत्ययिकेऽवसरे आप्तेन तत्त्ववादिना भाव्यमित्युच्यते, न तु पृष्ठ-मांसादनवृत्त्या। तदुत्पश्यतु भवान्। 'गृहीतसैनापत्योऽस्मत्पितामहो-ऽवश्यं परान्विजित्य मह्यमकण्टकं राज्यं प्रदास्यती'ति योऽयं भवतो मनोरथस्तन्मनोरथमात्रम्। न खल्वस्य पाण्डवनिग्रहेण भवाननुग्राह्यः, तद्वैपरीत्याय ह्ययमारम्भः। अंसे स्थित्वा कर्णदंशनवदिह स्थित्वा त्वत्प्रत्यर्थिने प्रत्यहं जयाशासनेन रक्षां व्यपदिश्य, क्षीरेण बिडाल-पोषणवद्भवतेऽभयं प्रदाय, पार्श्वे तूबुरेण हन्यमानानां स्वेषामुपेक्षणेन च प्रत्यक्षहृदयेऽपि तस्मिन् अहो महान्महाराजस्य प्रत्ययः। आत्मन ऐहलौकिकाय पिण्डाय भवन्तं, पारलौकिकाय पिण्डाय पाण्डवं च द्वावपि पौत्रौ वां व्यवस्थया कल्पयंस्तदनुगुणं चेष्टते ते पितामहः। यच्चापि सर्वक्षत्रान्तकस्य जामदग्न्यस्यापि जेतायमिति तत्तु पर्युषित-त्वात्प्रशस्तिमात्रम्। अयातयामवीर्यो हि गाण्डीवी। अलं वा विस्तरेण। यदि मन्यसे पाण्डवान् जेतव्यान् तर्हि प्रयच्छ मे सेनाधिपत्यं, प्रतीच्छ च निःसपत्नमाधिपत्यम्।'

स तथा भीष्ममासाद्य रुदन् जगाद—'पितामह पितामह, प्रत्यहं सोत्साहमादित्यमण्डलेन सह समरायोद्यम्य, तल्लये प्रायेण मन्देहतां प्राप्य वयमपि प्रलीयामहे। कथमृणग्रस्तस्य द्रविणमिव प्रतिक्षणं क्षीयमाणमस्मद्बलं न पश्यसि। अनेन दिवसाष्टकेन परबले भित्तमपि न भिन्नम्। त्वयि नेतर्यप्यस्माकमियं दशा यदि विधिमन्तरेण कमन्यमुपालभे। यदि परेषु वात्सल्यानुरोधेन पिच्छिले हृदये कर्कशता पदं नादधाति, यदि वा अतिजीनतया अनाम्नातानि छन्दांसीवावशंवदान्यङ्गानि, तदा निसर्गत एव परेष्वायःशूलिकवृत्तौ भवत एव सतीर्थ्येऽङ्गराजे स्वां धुरमवरोप्य' इत्यर्धोक्त एव कुपितः स भीष्मस्तं ससंभ्रमं प्रत्याह—'भोः पुरोभागिन्, शब्दतोऽर्थतश्च चन्द्रहासवद्धृदयस्पृक् ते वचनम्। कथमधुनापि राधेयेन पाण्डवजयमनोराज्यम्। सिंहशब्दश्रवणेन विस्रब्धो ग्रामसिंहेन केसरिणं जिघांसति मूर्खः। तदास्ताम्। यद्भीष्मेण शक्यं तत्सर्वं श्वः प्रातरनुष्ठितमवधेहि' इति तं निवर्तयामास।

तेन बलवदधिक्षिप्तमानी स मानी अशान्तात्मा सन् परेद्युरत्युषस्येव संग्राममहीमभिपत्य शङ्खं प्रध्माय शृङ्गं प्रपूर्य शार्ङ्गं प्रघोषयामास। निर्घातेनेव तेन निर्ह्रादेन प्रतिध्वनितेषु कृताक्रन्देष्विव दिगन्तेषु, जगदन्तायोद्यतः कृतान्त इव क्रुधान्धः प्रतिक्षणमेधैरेधमान इवेध्मजिह्वो, धूमितो भ्रुकुटीविटङ्केन, ज्वलितोऽदृष्टिक्षेपेण, विस्फुलिङ्गितोऽस्रबिन्दुभिः, भीष्मतराकारः स भीष्मः प्रकम्पनेनेव प्रकम्पितैः पृतनानाथैः सर्वतः प्रत्तपथेन रथेन सर्वतोमुखवत्तत्र तत्र प्रधावन्, विधमन्प्रधानदर्शी, दारयंश्च शूरंमन्यवेदं, प्रचण्डैः काण्डप्रकाण्डैः

सकोदण्डान्, भुजदण्डान् सकुण्डलानि मुखमण्डलानि च खण्डयन्, करालेन करवालेन नखरायुध इव करिनिकुरुम्बाणि कुम्भेषु निर्भिन्दन्, कठोरेण कुठारेण घोटककुलेष्वाखेटमिवाटन्, निशीतेनालातेन शताङ्गेषु दम्भोलिकेलिं कलयन्, क्रौञ्चारिरिव गृहीतशक्तिः शतं शतं गवाक्षयन्, शूलपाणिरिव शतं शतं शूलेन प्रोतयन्, दण्डपाणिरिव शतं शतं दण्डेन पातयन्, पर्जन्य इव जगर्ज, ज्वलन इव जज्वाल, तपन इव तताप। किं बहुना। नानाशस्त्रजिह्वाले स्वप्रतापसततजिह्वे पाण्डवबलपुरोडाशं प्रायेण जुहवामास। तेन महावैशसेन घृणीभूतो भगवान् पूर्ववच्चक्रेण रथादवतरन् पार्थेनानुनीतः पुना रथमारुरोह। अत्रान्तरे सवितर्यन्तर्हिते शङ्खमाघोषयन्भीष्मः स्वां ध्वजिनीमवजहार।

भृशमुद्विग्नो युधिष्ठिरो वेधवर्त्मना शल्योद्धरणवदनुनयेन भीष्मं जिगीषुः कृष्णेन भ्रातृभिश्च साकं पुनस्तमेत्य प्रणतिपूर्वकं 'पितामह!' इत्यामन्त्र्य बाष्पस्तम्भितकण्ठस्तूष्णीं तस्थौ। दयार्द्रभावः सोऽप्यात्मन्यासेनामुमनुग्रहीतुकामः 'वत्स, किं विषादेन। स्त्रीपूर्वं पुरोधाय विजयमादत्तामयं विजयः' इति तमाश्वास्य व्यसृजत्।

प्राप्ते तु दशमे दिने 'अद्य पितामहो विग्रहं पारयिष्यति' इत्युभयेषु च सैनिकेषु समवेतेषु, वीरैकधुरीणो भीष्मः पुङ्खानुपुङ्खप्रवर्तितैः शरसंपातैर्युगपत्सर्वं समाकृष्य भक्षयितुं प्रसारितसहस्रकर इवाक्रन्दयन्, आजानेयोऽश्व इव गम्भीरवेदी गज इव च परप्रहारानगणयन्, काल इव कालाग्निरिव कालाग्निरुद्र इव च पाण्डवबले ववले। तत्र काशीशकरूशादीन् बहून्निपात्य विष्वक् चरिष्णुः स धृष्णुः 'कः पुमान् भीष्ममभियोक्तुमीष्टे' इति वीरवादव्याजेन ग्लास्नून् पाण्डवान्संज्ञां

प्राहयामास । तत्क्षणं शिखण्डिनं पुरोधायाभिपतन् कुशाग्रीयधीर्वानरकेतनो भ्रातृभिः सह तन्निरोधाय पुरः प्रसर्पन्तं तं सर्पकेतनमाशुगेन ध्वस्तकेतनं विधाय प्रतिवातः प्लवमिव समरसरणेः सुदूरमपसार्य, पितामहाय शरं संदधे । 'देवव्रत, संहर शस्त्रं, कृतं मर्त्यभावेन' इत्यपौरुषेयीं गिरं, धुरि अपौरुषेयधुरं शिखण्डिनं च गोचरीकुर्वन् स महाव्रती भीष्मो यावच्छरासं न्यस्यति, तावद्गाण्डीवात् त्रिदिवाच्च पतद्भिः सूनोपसृष्टैः शिलीमुखैः प्रसाधिताङ्गो निपपात । अनुत्तरायणे मरणमनभिनन्दतः स्वमातृप्रयुक्तान्मुनीन् 'पितृप्रयुक्तेन स्वच्छन्दमृत्युवरेण तावत्प्राणान्धारयितास्मि' इति प्रयापयन् गाङ्गेयः 'हा हा!' इति 'पतितः पतितः!' इति 'पितामहः पितामहः!' इति च समावृण्वत्सूभयेषु च प्रधानवीरेषु, 'तात, लम्बमानस्य मच्छिरस एतत्कालोचितमुपधानं कल्पय' इति दुर्योधनं चोदयामास । श्लक्ष्णानि महार्हाणि चोपधानानि ससंभ्रममुपनयन्तं तं व्रीढाकूणितेन कटाक्षेणाधिक्षिप्य भीष्मः पार्थमीक्षांचक्रे । आकूतज्ञः स तु त्रिपदीकृत्य भुवि निखातेनोपधानीभवता शरेण तस्य शिरो धारयन्, तेनानुज्ञातः स्वं स्कन्धावारमयासीत् । 'तृषितोऽस्मि । तदद्य ममोचितं पानीयं संपादये'ति पुनश्च दुर्योधनं नियुज्य, तेनानीतं सुगन्धि पेयमसत्कृत्य भीष्मः पुनरर्जुनमाकार्य तं चोदयामास । तेन पातालाद्बाणोद्धृतं गाङ्गं वारि पिबन् गाङ्गेयः सुयोधनमाह—'तात, पश्य अल्पीयस्यर्थे युवयोरन्तरम् । न खलु धनुर्धारणमात्रेण सर्वोऽपि पार्थो भवितुमर्हति । तदलं मदन्तेन वैरेणे'ति । सपदि व्यावृत्तमुखं तं धार्तराष्ट्रं सपरिवारं शिबिरायानुज्ञाप्य, अधिक्षेपवचनशान्त्यै सान्त्वयन्तं कर्णं पाण्डवपक्ष-

स्वीकरणाय चोदयामास। तदनभ्युपगच्छति तस्मिन्, 'अयि वैकर्तन! यस्मात्त्वमवकीर्णिन्यां कुन्त्यां जातोऽसि, अतस्तवेयमसंस्कृता बुद्धिः। संस्कारानुरूपं हि सर्वं चेष्टितम्। तद्गम्यताम्' इति तं प्रयाप्य देवव्रतः शरतलपन्यस्तकलेबरः सन्, अपराचीनया वृत्त्या प्रत्यञ्चमात्मानमुपासीन उत्तरायणं प्रतीक्षांचक्रे।

इति भीष्मपर्व।

# द्रोणपर्व ।

अथैकादशे दिने कर्णानुमत्या द्रोणं सैनापत्येऽभिषिञ्चन्दुर्योधनः प्रीतेन तेनेप्सितवरेणोपच्छन्दितो जीवग्राहं युधिष्ठिरस्य ग्रहणमवृणोत् । 'किंस्वित्त्वं विजित्य पुनरनुजिघृक्षसि, येन तद्वधं नावृणीथाः' इति तेन महात्मनानुयुक्तः स दुर्मेधाः स्वस्य पार्श्वं कृतामुद्घाटयन्नाह—'भगवन्, नैदंयुगीनं हि धर्मविजयित्वं, जीवत्यवरजे पार्थेऽसुरविजयित्वानुरोधेन तद्वधे महाननर्थः स्यात् । अतस्तं संयम्य लोभविजयित्वपक्षमाश्रित्य पुनर्द्यूतेन जेतुमाशंसे' इति । 'ननु वेत्स्येव तस्य वासवेर्विक्रमं, अतस्ततोऽन्तरे लब्धे तव मनोरथः सेत्स्यति' इति सान्तरमुक्त्वा कर्णादिभिः सह समरधरणीमवतीर्णो द्रोणस्तत्र पदे पदे तद्ग्रहणाय प्रयतमानोऽपि वन्ध्योद्यमतया ह्रीणो भूत्वा 'ननु भोः, पार्थविघटनायोपायं चिन्तय' इति सायं सुयोधनं चोदयामास ।

द्वादशेऽहनि 'कुरुराज, वयं तव प्रत्यर्थिनमन्यत्र हरिष्यामो हनिष्यामश्चैकलोष्टवधेन । सुखं निगृह्णातु युधिष्ठिरमाचार्यः' इति शपथं कृत्वा संभूय प्रस्थिताः सुशर्मादयो बहवो वीराः सौखशायनिका इव प्रत्यूष एवार्जुनशिबिरमेत्य 'मिथ्याध्मात रे षण्ड! त्वं किल निवातकवचानेकाकी व्यजेष्ठाः, यदि तथा, तदा निर्याहि तत्सत्यापयितुं, प्रापयितुं चात्मानमस्मान्वा वीरशय्यां' इत्युद्धतमाह्वासत । मर्माविधं तमधिक्षेपमक्षममाणः पदाक्रान्तो हर्यक्ष इव शय्योत्थायमभिक्रम्य तैः सह क्वचिदन्यत्र युद्धमाचरन्नर्जुनो दिव्यास्त्रेण तान्विव्याध । तेन

मोहितेषु तेषु 'अयमर्जुनोऽयमर्जुनः' इति स्वानेव परस्परं तीक्ष्णतरं निशातयत्सु, स ततः संकुलयुद्धभुवं प्राप्य तत्र स्वबलानि निर्दयमर्दयन्तं भगदत्तं खलीनेनाविन्तमिव भल्लप्रहारेण बलाद्व्यावर्तयामास। क्षुभितेन तेन निर्मुक्तमङ्कुशं केशवो वैजयन्तीमिव स्ववक्षसि गृहीत्वा शमयामास। बीभत्सुस्तु भग्नोत्साहो भवन् कृष्णं सोपालम्भमाह—'ननु भोः! अयुद्धेन खलु त्वं मया साह्याय वृतः। सत्येवं किमिति पदे पदे मम यशः क्षपयितुमीहसे। किमहमस्याङ्कुशस्य भञ्जनेऽप्यक्षमो येन त्वमभिपत्य त्वरया स्ववक्षस्यग्रहीः' इति। स च तं प्रत्याह—'सखे, न मे तव यशसि स्पर्धा, अपि तु तव श्रेयसि श्रद्धा। इदं हि वैष्णवमस्त्रं अस्य पित्रे नरकासुराय तन्मातुः पृथ्व्या अभ्यर्थनया दत्तमितरैर्दुःसहं च। अतस्ततो रक्षितोऽसि। तस्मादसंभ्रमेण दुर्भगमेनं भगदत्तं जहि' इति। गाण्डीवी तु स्वं दुरभिमानं प्राग्ज्योतिषपतेस्तस्य मूर्धानं चानासङ्गेन झटित्येव परिजहार।

त्रयोदशे दिवसे हतशेषैः संशप्तकैः सह योद्धुं गतेऽर्जुने द्रोणकृते चक्रव्यूहेऽलब्धान्तरो युधिष्ठिरस्तद्व्यूहभेदनाभिज्ञमार्जुनिमभिमन्युं पुरस्कृत्य तद्भेदनाय प्रवृत्तो द्रुततरमन्तःप्रविष्टे तस्मिन्कुमारे, महेश्वरवरदत्तेन जयद्रथेन सपरिवार एव निरुद्धोऽद्विज इवाहवाद्बहिरेव बभूव। दम्यतरोऽपि स सौभद्रो नैसर्गिकेण प्रागल्भ्येन दान्ततमैरपि दुर्धरां तां रणधुरां निर्वहन्, अग्रे दारंदारमन्तर्निविशमानश्चक्रमध्यमाघूर्णयन्, दुर्योधनस्य पुत्रं लक्ष्मणमन्यांश्च बहून्वीरान्मारयन्, वधप्राप्तानपि कर्णादीन्स्वपितृप्रतिज्ञागौरवेण सावज्ञमुत्सृजन्, गोग्रहे स्वपितुर्गौरवमपि स्वविक्रमेण लंघयन्, तदाक्रान्तं परेषां हृदयं पैतृकं सिंहासनमिव

सहसारुरोह। तेन जीवनाशं बहुषु नष्टेषु, तदुन्मुखेषु च शिष्टेषु, 'आचार्य, स्थातव्यमिति तिष्ठामि, न पुनर्जेष्यामीति। तस्मात्सद्य एवास्मान्मृत्योरस्माकं निर्मोक्षाय मन्त्रयस्व' इति कर्णेनाभ्यर्थितो भारद्वाजः प्राह—'न खलु परिमाणेन क्षुल्लकमिति परिभाव्यं तेजः। तदयं वीरप्रकाण्डाङ्कुरः सर्वैरेवास्माभिः संहत्य प्रहर्तव्यः, संहर्तव्यश्च यथावसरम्। न खलु प्राणात्यये संभूयप्रहरणमधर्माय' इति। तथेति ते षड्वीराः षोडशवर्षदेशीयमेकाकिनं च तं समावृत्य, तद्वाहादिषु प्रत्येकमेकैकं लक्ष्यीकृत्य प्रहरन्तोऽपि यौगपद्येन निरोद्धुमलंकर्मीणे तस्मिन्ननीशा भूत्वा स्वभुजौ प्रहरणानि च गर्हयन्तो महत्येर्ष्यया तत्र सर्वोद्यमं चक्रुः। तांश्चिरं निबर्हयन्स वीरप्ररोहः प्रायेण प्रणाशितसर्वोपकरणः प्रक्षीणास्त्रशस्त्रः प्राणसंशयं प्रापितोऽपि सहजया धैर्यलक्ष्म्या स्वयमनाकुल एव गृहीतचक्रो दिवमुत्पपात। चक्रेण खमुच्चरमाणं तं साक्षादसुरकुलवधोद्यतं चक्रपाणिमिव महीधरपक्षच्छेदोद्यतं वज्रपाणिमिव च समुद्वीक्ष्य भीतभीतेषु चमूनाथेषु, दुःशासनस्य पुत्रो दुर्धर्षो नाम सहसोत्पत्य तस्य ग्रीवां कौक्षेयकपदवीं गमयामास।

तत्क्षणं तिष्ठ तिष्ठेति सावशेषवीरवादेन संदष्टाधरेण समुच्चलद्भ्रूकुटीविटङ्केन रक्तान्तलोचनेन लम्बालकेन लक्ष्मीनिवासेन लावण्यनिधानेन धिक्कृतपूर्णेन्दुमण्डलेन सकुण्डलेन मुखमण्डलेनासुहृदोऽपि स्पृहणीयया, उद्धृतचक्रायुधेनाव्याजशौर्यनिधानेन ज्याकिणाङ्केन सावापेन सकङ्कणेन साङ्गदेन कर्कशतलेनापि दर्शनीयतमेन परवाहिनीपतिमन्थदण्डेनातिदीर्घेण पीवरेण भुजदण्डेन तथा विशङ्कटेन विकङ्कटेन वैयात्यसारेणाश्मसारमयेनेव बाढतमेन वक्षसा च तादवस्थ्येऽपि

परानुद्वेजयन्त्या, सर्वाङ्गीणेन क्षतेन क्षतजेन च कठोरचित्तानपि निष्परामर्शं हाहेति करुणमाक्रोशयन्त्या च द्विधाभूतया मूर्त्या शक्रध्वज इव दिवः पतिते तस्मिन्मन्मथमन्मथेऽसहायशूरे गर्भरूपे कुमारे, 'अत्याहितमत्याहितं' इति बलानि सर्वतः पलायांबभूवुः।

संशप्तकान्निहत्य निवर्तमानोऽर्जुनोऽनिमित्तदर्शनेन शङ्कितस्त्वरिततरं स्कन्धावारमागच्छन्, तत्र निःस्पन्दं निरानन्दं सर्वतो मूकमिव स्थितं स्वजनं कार्त्स्न्येन पश्यन्, अपश्यंश्च यथापूर्वमाभिगामिकगुणसंपन्नमात्मजमभिमन्युं, संभ्रान्तः, 'क मे बहिश्चरः प्राणो वत्ससौभद्रः' इति सर्वानप्राक्षीत्। तेषु भयेन शोकेन च तूर्णीं बाष्पायमाणेषु, निश्चितार्थः पार्थः उत्कटेन मन्युना निर्दहन्निव पश्यन् वेपमानतनुः, 'हा मर्कटैरिव पापैः क्षीरकण्ठं मे बालं चक्रव्यूहे प्रक्षिप्यात्मा संरक्षितः। हा सिंहसंहनन, हा सिंहविक्रान्त, सिंहडिम्भ इव शशककुलेन त्वमपि कथंतरां तुच्छेनारातिकुलेनेमां गतिं गमितोऽसि। अभ्यधिकगुणा ह्यल्पायुषो भवन्तीति किंवदन्तीमर्थापयितुं मां संतापयितुं च त्वं जातोऽसि। यद्वा। तद्व्यूहस्य भेदन इव ततो निर्गमनेऽप्युपायमनुपदिशन्नहमेवान्ततस्तवान्तकः संवृत्तोऽसि' इत्याक्रुश्य मूर्च्छितः पपात। तं सरभसमुत्थाप्याश्वासयता भगवता 'नन्वलंकारोऽयं शूराणां यदरीन्प्रताप्य स्वयं वीरशय्याशयनं' इति सान्त्विते किंचिदिव शमाभिमुखक्रोधे तस्मिन्, युधिष्ठिरः प्राह —'तातार्जुन, त्वयि गते द्रोणकृतं चक्रव्यूहं भेत्तुमनभिज्ञा वयं तदभिज्ञं वत्सं पुरोधाय व्रजन्तः सेनामुखं निर्भिद्यान्तः प्रविष्टे वत्से, महेश्वराल्लब्धवरेण जयद्रथेन निरुद्धा बहिरेवाभूम। एवं दैवविघटितेऽर्थे

किमाक्रोशेन।' तदाकर्ण्यार्जुनः प्रतिजज्ञे—'एवं वत्सस्य दिष्टान्तहेतुं जयद्रथं श्वोऽनस्तमितेऽहस्करेऽस्तं नेतास्मि। वैपरीत्ये तु तन्निष्कृतये तनूनपाति तनुं पातयितास्मि' इति। तच्चारैर्विदित्वा कम्पितेन जयद्रथेन सह दुर्योधन आचार्यं शरणं प्राप्य तेन दत्ताभयः पार्थं हतं मत्वा भेरीमाघोषयामास। 'द्रोणादीननाकलय्य किमेवं प्रतिज्ञातवानसि' इति कृष्णेन पृष्टोऽर्जुनः, 'त्वयि सहाये सति मया किमसाध्यं' इत्युत्तरयामास।

चतुर्दशेऽह्नि प्रातः पार्थः कृष्णमाह—'सखे माधव, कथं सैन्धवं हनिष्यामीति सर्वरात्रमपि चिन्ताकुलेन निशान्ते क्षणं सुप्तेन मया कश्चन स्वप्नो दृष्टः, तं भवान् श्रोतुमर्हति। यथा—आवां कैलासगिरिं गत्वा गिरिशं प्रणम्यास्ताविष्व। ततस्तुष्टस्य तस्य देवस्य संदेशेन संनिहितात्सरसः सशरं शरासमाहर्तुमगमाव। तत्र विषोल्बणास्याशीविषौ वीक्ष्य तावप्यस्तोष्वहि। सद्यः प्रहरणतां गतौ तावादाय तस्य देवस्य संनिधिमहार्ष्व। स तौ गृहीत्वा प्रास्य मह्यं कश्चन मन्त्रमुपदिदेश। सपदि प्राग्वितीर्णे पाशुपतास्त्रे मम प्रतिभाते तमनुज्ञाप्य पुनरागमाव' इति। तच्छ्रुत्वा सर्वेऽपि सिद्धिं करस्थां निश्चित्य जहृषुः।

अथ सोत्साहं रणमहीमवतरन्पार्थस्तत्राग्रे शकटव्यूहेन मध्ये पद्मव्यूहेन पृष्ठे सूचीव्यूहेन च बलानि विन्यस्य, मध्ये बह्वीभिरक्षौहिणीभिः कर्णादिभिः षड्भिर्वीरैश्च सम्यग्गुप्तिं विधाय, तन्मध्ये पद्ममध्ये वराटकमिव तं वराकं वराहध्वजं जयद्रथं गूहयित्वा स्वयं सेनामुखं रक्षन्तं द्रोणमचष्ट। आचष्ट च तमुपगम्य सानुनयं-'आचार्य

सर्वावस्थासु भवानिव माननीयो मेऽश्वत्थामा। स इव सदा पालनीयोऽहं भवतः। अतो देहि मे किंचिद्विवरं दुःसहपरप्रसहनासहनतयारूढप्रतिज्ञासाहसस्य भवदन्तेवासिनः’ इति। पुत्रवत्सलतया प्रियशिष्यतया च तेन तथेति दत्तान्तरोऽन्तः प्रविवेश। प्रविष्टमात्रश्च स पुत्रमारणसमिद्धस्य क्रोधस्य, दारपराभवसंभृतस्य वैरस्य, दीर्घतरस्य क्लेशनिवहस्य, आततायिनः परिपन्थिनः, प्रयत्नसंचितस्य दिव्यास्त्रशस्त्रकलापस्य, चिरप्रवृद्धस्य युद्धकौतूहलस्य नैसर्गिकस्य भुजोष्मणश्चानुगुण्येन चेष्टमानो निशितनिशितैरमानुषास्त्रैः पङ्क्तिशःपङ्क्तिशः शातयामास।

क्षणार्धेन तत्र तत्र विरलीकृते वाहिनीमण्डले, सर्वतः समुद्भूते च हाहाकारे, तूर्णं द्रोणमभिपत्य दुर्योधनः प्रेरयामास—‘आचार्य, कथं शुकशावकायाभयं दत्त्वा द्वारोद्घाटनेन नीडान्तर्मार्जारं प्रवेशितवानसि। शरणागतत्राणान्नास्ति धर्मान्तरमिति न खलु भवद्भ्योऽपि निवेदनीयम्। अतस्त्वरस्व वराहध्वजान्वेषिणं कपिध्वजं गलहस्तिकया बहिर्निःसारयितुं’ इति। ‘ननु भोः, श्वेताश्वस्याश्वा अतिजवना सुशिक्षिताश्च। यन्ता च हरिः। अतोऽल्पान्तरेण त्वरिततरमन्तः प्रविष्टः। अहं तु जराविह्वलतया सहसाक्रमितुं नाशकम्। तव रिपोर्ग्रहणायान्तरप्रेप्सुश्चासि। अतस्त्वमेव तं रुन्धि। त्वमपि क्षत्रियः कृतास्त्रो युवा चासि’ इति तेन प्रत्युक्ते, ‘कथं मया गाण्डीवी अभियोक्तुं शक्यः’ इति क्लीबमानः सुयोधनस्तदुपदिष्टेन दिव्येन कवचेन संनद्धः पार्थमभिदुद्राव।

तदा श्रान्तान्वाहान् शरोद्धृतेन पानीयेन विश्रमय्य प्रतिष्ठमानः सव्यसाची प्रत्यूहीभवन्तं सुयोधनहतकमाचार्येण संवर्मितमवेत्य तद्गौरवेण भीमस्य प्रतिज्ञाप्रतिपालनेन च तं शरीरमात्रेण शेषयित्वा विद्रावयामास। अत्रान्तरे शन्तनुभ्रातुर्बाह्लीकस्य पौत्रः सोमदत्तस्य पुत्रो भूरिश्रवा नाम कुरुवीरोऽनुनयेनान्तः प्रविश्य बलान्यर्दयन्तं सात्यकिं जीवग्राहं गृहीत्वा हन्तुं यावत्खड्गमुदस्यति, तावत्कृष्णनुन्नेनार्जुनेन बाहुमूलयोः शराभ्यां चिच्छिदे। कृत्तस्कन्धस्तरुरिव स सौमदत्तिर्निःशोभो निःसारश्च भूत्वा 'रे रे षण्ड, कथमन्यत्र व्यग्रं मां शरव्यं कृतवानसि। धिक्त्वां नाम्नैव कर्मणापि बीभत्सुं' इति तं निर्भर्त्स्य मर्तुकामः प्रायमुपविवेश। तदवस्थस्य तस्य शिरः पदाक्रम्य कृपाणेन च्छिन्दन्सात्यकिः सर्वेषामेव धिक्कारभाजनं बभूव।

अत्रान्तरे सरभसमन्तः प्रविशन् भीमः सेनाग्रस्थेन द्रोणेन सनिषेधमिदमूचे—'अयि वृकोदर, अपि न जानीषेऽनुनयेनैवान्तः प्रविष्टमर्जुनं सात्यकिं वा। कथं द्रोणे व्यूहाध्यक्षेऽपि तवायं संरम्भः। यद्यन्तः प्रविविक्षसि तर्ह्यनुरुध्यस्व तेऽवरजस्य पन्थानं' इति। स तु 'कथं भीमेनाप्यनुनेयो भवान्। बालिशेनार्जुनेन समर्पितमात्मनि मिथ्यागौरवं कथं त्वं तथ्यमेव मन्यसे। पश्य मे पन्थानं' इति गदाप्रहारेण तस्य रथ्यानन्यतो विद्राव्य स्वैरमन्तः प्रविवेश। तत्र संघशः समापतत्त्रिशतं धार्तराष्ट्रान्प्रमाप्य, एकत्रिंशं विकर्णं च पिंषन्, 'हा नयवादिन् धर्मैकरुचे कुरुकुलप्रदीप विकर्ण, निर्दोषोऽपि भवानसज्जनसंबन्धेन हेतुना किंपाकान्तर्गतमाकन्दवृक्षक इव प्रतिज्ञाकर्कशात्मना मया नामैवं' इत्यर्धोक्तेनैव विचुक्रोश।

अथाल्पावशेषेऽह्नि मायातमसादित्यमाच्छादयन्भगवानर्जुनं चोदयामास—'सखे, शीघ्रमैन्द्रेणास्त्रेण जयद्रथस्य शिर उत्कृत्य समन्तपञ्चके तपस्यतस्तत्पितुर्वृद्धक्षत्रस्याङ्के लघु निपातय। स किल जातमात्रे पुत्रे समरे तस्य शिरश्छेदमशरीरिण्या वाण्याकर्ण्य 'योऽस्य मम पुत्रस्य जयद्रथस्य मूर्धानं भुवि पातयिता, सद्य एव तस्य मूर्धापि भुवि निपततु' इति शप्तवान्। तथेत्यर्जुनेन प्रयुक्तं तदस्त्रं तस्य सैन्धवस्य शिरः कणिशलावं लूत्वा सायंतनजपैकतानस्य तत्पितुर्वृद्धक्षत्रस्योत्सङ्गे तपःफलमिव मृदु निवेशयामास। तदविदन्स उपस्थानाय सहसोत्तिष्ठन्सन् अङ्कात्पततः पुत्रशिरसोऽनुपदं स्वयमपि भिन्नमूर्धा भुवि पपात। तत्क्षणं मित्रमण्डलादवतीर्यामित्रमण्डलान्तः प्रविशति तमसि, प्रकाशे च तमोऽपहे पार्थः कर्णमामन्त्र्य 'रे रे पुरुषमानिन्गोष्ठश्व, मम परोक्षमैकागारिकवृत्त्या युष्माभिः संहत्य किल मम शिशुर्हतः! अहं पुनरेकेन शरेण पश्यतोहर इव तव समक्षमेव त्वत्पुत्रं महारथं वृषसेनं जयद्रथस्य सध्रीचीं दशां नेतास्मि' इति प्रतिशुश्राव।

दुर्योधनस्तु शान्तेऽपि संगरे स्वयमशान्तस्वान्तकम्पो व्यचिन्तयत्—'अहो अस्य पृथागर्भकन्धरस्य वीर्याभ्युच्चयः। अयं हि कुम्भसंभवः पारावारमिवाक्षौहिणीसप्तकं क्षणेन चुचूष। अहं तु ग्रस्तमुक्त इवाद्यापि दिग्देशादि न विभजामि। लोभात्मना मयाश्मप्लवेनाकूपारं तरितुमारब्धम्। यद्व्यपाश्रयेणैवं मया महावैरमुत्पादितं स राधेयः कुत्र पलायित इति न ज्ञायते' इति चिन्तयन्नेव द्रोणमवोचत—'भगवन्, न खलु न विदितं आचार्यस्य धार्तराष्ट्रेषु निर्वेशः पाण्ड-

ष्वभिनिवेश इति । तथापि कथमेवं विश्वास्य मारणक्रौर्यम् । ननु नवनीतहृदया हि ब्राह्मणाः । मन्ये ममैव दौर्भाग्येन सहजमप्यात्मनो म्रदिमानमपहाय क्षात्रीं क्षुरप्रहृदयतामवाप्तोः' इति । तच्छ्रुत्वा स सनिर्वेदं प्रत्याह—'गुणप्रद्वेषिन्, न वयं जानीमस्तव बहिः प्रह्वता- मन्तर्जिह्मतां च । धिग्धिक्कृतघ्नताम्, यया ह्येवमस्माकमसाधुभिर्नि- त्यमनुषङ्गोऽभिषङ्गश्च । दुर्विपाकं किंपाकं भक्षयित्वा किमर्थं परेभ्यः क्रुध्यसि । निश्चिनु पाञ्चाल्याः शोकाग्निः सानुबन्धं भवन्तमप्रदह्य नोपशाम्येत् । मम मृत्युं धृष्टद्युम्नं दर्शंदर्शं दूयमानं मां किमेवमस- त्कृताक्रोशैस्तुदसि । न चाहं पाञ्चालवर्गमहत्वा कवचं मोक्ष्यामि' इति सक्रोधं ब्रुवन्नेव रणधरणिमवजगाहे । तावत्प्राप्तः कर्णः 'सखे- ऽङ्गराज, पश्य पश्याचार्यस्य दुर्नाटकं' इति दुर्योधनेनोक्तः, 'कुरुराज, दिवा प्रदोषाध्यासकारिणा दैवेन विप्रलब्धा वयमेवात्रोपालब्धव्या, न तु जरादूषितो विप्रः । यदह्नः पारितत्वबुद्ध्या शिथिलोद्यमा भवन्तो जयद्रथस्य पार्थप्रतिज्ञायाश्च निष्ठाहेतवोऽभूम' इति प्रतिब्रुवन् रात्रि- युद्धाय सेनां संनह्य तेन सह द्रोणमनुजगाम ।

तत्रान्तर्बहिश्च रजस्तमोभ्यां निरालोके लोके, सपुत्रेण भारद्वाजेन केकयादिषु बहुषु पातितेषु, भीमेन द्वादशसु धार्तराष्ट्रेषु, बाह्लीकसोम- दत्तयोश्च विकर्णादिसरणिं प्रस्थापितेषु, प्रदीपविरलिते योद्धृणां हृदयं प्रविष्टे संतमसे, अम्बष्ठादीन्निहत्य चरतो युधिष्ठिरस्य ग्रहणाय दुर्यो- धनेनार्थितः कर्णः, 'भो राजन्, कर्णे प्रदातरि तुच्छं खल्वीदृशमभ्य- र्थनम् । अतो मिषत्स्वेव परवीरेषु निमेषार्धेन तव शत्रुमजातशत्रुं भवतः क्रीडामृगमातनोमि' इति जगर्ज । 'इदं त्वया वाङ्मात्रेण

साध्य' मित्यवहसति कृपे, क्रुद्धः कर्णः 'अये ब्रह्मबन्धो, किमुक्तं वाङ्-मात्रेण साध्यमिति। पूरय वाक्यशेषं 'न कर्मणा' इति। छिन्द्यां ते जिह्वां यद्येवं पुनर्जल्पेः' इति तर्जयामास। तदमृष्यमाणस्तद्भागिनेयोऽश्वत्थामा 'तिष्ठ तिष्ठ, रे दास्याः पुत्र, त्वं किलाचार्यस्य जिह्वाच्छेदकः। अहं पुनर्महन्निन्दाकश्मलदूषितस्य तव शिरः खड्गधाराजलेन संस्कृत्य, तत्र चिरबद्धलक्ष्यं पार्थं विलक्षयामि' इत्युत्तस्थौ। 'एह्येहि वटो, गुरुपुत्रत्वगौरवेण सर्वैरप्युपेक्षितं, अत एव संध्याबलिवृषमिव मत्तं त्वामद्यैव दमयित्वा, तव सहाध्यायिमित्रं पार्थमपि त्वदनुपदं प्रस्थाप्य, परत्रापि युवां सब्रह्मचारिणौ द्वन्द्वचारिणौ च करोमि' इत्युत्थिते च कर्णे, प्रसक्तानुप्रसक्तेन वाक्कलहेनास्युद्यतयोश्च तयोर्द्वयोः दुर्योधनस्तदन्तरीभूय कथंचित्सान्त्वयामास।

तदनु विशिखशिखादुर्धर्षे बलकक्षाणि प्रदहति कर्णदावानले, तच्छमनाय धनंजयसारथिना नुन्नो घटोत्कचो वार्षिको वलाहक इव दुर्दर्शहेतिविद्योतनोऽन्तरिक्षचरो मुहुर्मुहुर्गर्जितेन शिखण्डिनमुत्कयन्, अर्जुनमुल्लासयन्, धार्तराष्ट्रान्विह्वलयन्, संततया शिलासारवृष्ट्या आदित्यादीनां तेजो छादयन्, कबन्धोच्चलन्महानागभीषणभीमावर्तपरिभ्रमणमन्थरस्यन्दनामापन्ननानासिन्धुजातामाद्रवदुद्भटौघां दुःसहाशुगशैत्यां कीलालस्रोतोमयीं वाहिनीं सर्वतः प्रवर्तयामास। 'कालरात्रिः कालरात्रि' रिति सांराविणे समुद्भूते, निरुच्छ्वासीकृताः सुयोधनादयस्तूर्णं कर्णमभिपत्य 'भोः कथमीदृशेऽप्यवसरे स्वयमुदास्से। उदस्य शक्तिमस्य घटोत्कचाख्यस्य मृत्योः क्षपणाय' इति निर्बबन्धुः। 'कथं पार्थाय रक्षितामेकपुरुषव्यापादिनीं तां शक्तिमन्यत्रोपयुज्य, परस्यो-

त्साहदो भवतु कर्णः' इति बहुवारं वदन् स वैकर्तनः 'अद्य जीवतो हि श्वस्तनी चिन्ता । तदलं विलम्बेन' इति तैर्नियन्त्रितः सन्, जामात्रे सज्जितं सूपमतिथिसात्कुर्वाणा मितंपचेव स्वयमकामेनैव तां शक्तिं राक्षसाय प्रयुयुजे । प्रयुक्तायां च तस्यां तं निबर्ह्य वासवमुपतस्थुष्यां, दिवः पतता महता तत्कलेबरेण बहवो विनिष्पिष्टा विनेशुः ।

ताव'द्दिष्ट्या दिष्ट्ये'ति मुहुर्मुहुरर्जुनमालिङ्ग्य प्रहृष्यन्कृष्णः 'किं शोकस्थाने तवायं प्रहर्षः' इति तेन पृष्टो व्याचख्यौ—'अयि कौन्तेय, मोघीकृतायाममोघायामिन्द्रशक्तौ, भग्ने च कर्णोत्साहे, कथमद्यापि शोकस्थानम् । वध्यश्चायमस्माकमपि दुरात्मा ब्रह्मद्विड्राक्षसः । एतदर्थमेव मयायमायोधनाय यातुधानः प्रहितः । त्वया पदे पदे कर्णाभियोगाय चोद्यमानोऽहमन्यतान्यत्र त्वामनैषम् । त्वद्भाग्येनैव प्रत्यहं सायं सायं परेद्युस्तुभ्यं शक्तिप्रयोगाय शिबिरे तस्य मन्त्रः समरसमये तन्द्रा च बभूव । यद्यपि भग्नदंष्ट्रो दन्दशूक इवाद्य संवृत्तः कर्णः, तथापि नावज्ञेयः । स हि ब्रह्मण्यस्तपस्वी सत्यवादी घृणी च । अतः समयेऽप्रमादेन प्रमापणीयः' इति । ततस्तुष्टमायान्तमर्जुनमवलोक्य युधिष्ठिरः कृष्णं प्राह—'भगवन्, अभिमन्युव्यपाये तव सख्युर्विषादादिकं, अद्य भैमसेनौ पतितेऽस्य हर्षं च, तथा पुरः स्थिते विक्रान्ते द्रोणेऽस्य कातर्यं, भयेन प्रलीने दुःशालाभर्तरि शौर्यं च त्वमेव वेत्सि । एवं मतिवैषम्ये किमुक्तेन । कामं वर्ततामर्जुनः । अहं भीमश्च परान्हनिष्यावः' इति क्रोधेन निर्विद्य समराय प्रस्थितः स व्यासेन तत्त्वोक्त्या प्रकृतिं गमितः ।

पञ्चदशे वासरे पुनर्दुर्योधनेन निष्ठुरमुक्ते आविष्ट इव क्रुधा संग्राममहीमवतीर्णे जीर्णपर्णराशिपतिताशुशुक्षणिवत्क्षणेन द्रुपदविराट-केकयचैद्यादीन्बहून्निजघ्नुषि द्रोणे, कृष्णः पार्थमाह—'सखे, पश्य पश्याचार्यम्। एवंप्रतापोऽयमनार्जवेन विना जेतुं न शक्यः। न चापत्सु प्राणत्राणार्थस्य च्छलस्याधर्मता। तस्माद्युष्मासु कश्चिदस्य प्रेयांसं पुत्रं दिष्टान्तितं ब्रूताम्। तच्छ्रवणेन विषीदन्नयं सुखेन जय्यः स्यात्' इति। तदनभ्युपगच्छति बीभत्सौ, तथेत्युत्थितो वृकोदरः स्वपक्ष्यस्य मालवराजस्य कुञ्जरमश्वत्थामाख्यं गदया निहत्य द्रोणस्याग्रे 'अश्वत्थामा हतः' इत्युच्चैर्जगाद। स्वपुत्रस्य वीर्यज्ञोऽयं तद्वचोऽप्रति-पद्यमानो द्विगुणितक्रोधो मुहूर्तमात्रेण पाण्डवबलमल्पावशेषं चकृवान्। ततः कृष्णेन बलवन्नियन्त्रितोऽजातशत्रुः कालस्यापरिहार्यतया दुः-सहतया च तच्छरसंपातस्य, कृच्छ्रेणाङ्गीकुर्वन् यावन्नेदीयान्भवति, तावत्तं द्रोणं ब्रह्मलोकं निनीषवो दिविष्ठा वसिष्ठजामदग्न्यादयः 'विरम विरम भारताचार्य, किमितः परमपि शस्त्रेण' इति निषिषिधुः। तत्क्षणं क्षीणेष्वायुधेषु, 'यस्य श्रेयसे प्राणान्धारयसे, तस्याश्रेयस्यपि कथं बाणान्न परिहरसि' इति पुनरप्युपक्रोशति वृकोदरे, शङ्कितो द्रोणः संनिहितं धर्मसुतं तमर्थं पप्रच्छ। तस्मिंस्तु 'अश्वत्थामा हतः' इति तारस्वरेणोक्त्वा 'कुञ्जरः' इत्यस्फुटमालपति सति, अस्त्रक्षयमुनि-वचनसंवादिते तद्वचसि प्रत्ययेन स भारद्वाजः पुत्रं हतं मत्वा जीविते निराशो भवन् सपदि न्यस्तशस्त्रो रथोपस्थ एव समाधिमास्थाय मूर्ध-न्यया नाड्या दिव्यज्योतिरूर्ध्वमाचक्रमे। पूर्वमुपरि प्लवमाना युधिष्ठिरस्य रथ्यास्तच्छलोक्तिसमकालं भूस्पर्शिनो भूत्वा वाहान्तरैः

साधारणा बभूवुः । तदन्तरे धृष्टद्युम्नोऽर्जुनेनोद्घोषितमप्यब्रह्मण्यमनादृत्य संयमिनो द्रोणस्य मूर्धानमपजहार ।

ततो हा हेति सर्वतः कान्दिशीकेष्वनीकेषु, तदविद्वानश्वत्थामा किं किमिति दुर्योधनमप्राक्षीत् । हृणीयमानेन तेन नुन्नस्य कृपस्य मुखात्पतिते पितुर्व्यापत्तिवज्रे, विदीर्णहृदयो भुवि निपत्य बहु विललाप—'हा तात, षट्प्रज्ञ लोकाचार्य, कथं तवापीयं दशा । धृष्टद्युम्न, धृष्टद्युम्न, न्यस्तशस्त्रः संयमी पञ्चाशीतिवया गुरुः किल ते शीर्षच्छेद्यः । भो भो धर्मध्वजिन् पाण्डव, त्वं किलाजातशत्रुः सत्यसंधो नाम । भो भो महामन्त्रिन्माधव, त्वं किल ब्रह्मण्यदेवः । तात, इदमावयोरन्तरं यन्मिथ्याव्यसनश्रवणेन मयीदृशं वात्सल्यं दर्शितवान् भवान् । अहं पुनर्जननेन पोषणेन त्राणेन संस्कारेण विद्यादानेन च सर्वात्मना गुरोस्तव तथ्यामपि व्यापत्तिमाज्ञायानिर्भिन्नात्मा स्वस्थोऽस्मि । कथं वा तवाहमानृण्यं यायाम् । अथवा सत्स्वपि भवता मयि संक्रामितेषु दिव्यास्त्रेषु किं परिदेवितेन । ननु भोः कुरुपते, अपाञ्चालमपाण्डवमयादवं च भुवनमण्डलमकृत्वा न निवर्तिष्यते द्रोणपुत्रः । पश्य मे शौर्यातिशयम्' इति साटोपं नारायणास्त्रं संदधे । संहिते तु तदस्त्रे परबलं निर्मूलमुन्मूलितं मन्वानाः कुरवः 'जय जय गुरुपुत्र' इति जयभेरीं निजघ्नुः ।

किमवष्टम्भाः परवीरा एवमुन्नदन्तीति युधिष्ठिरेण पृष्टोऽर्जुनस्तमधिचिक्षेप—'यन्नाम्ना च्छले त्वमाम्नाती सन्, ब्रह्महत्यया गुरुद्रोहेण विश्वासपातकेन च परलोकाय गृहीतपाथेयोऽसि । येन नाथवतं

प्रशान्तस्य गुरोरयं छात्रव्यंसकः पाञ्चालः सहजां नृशंसतां दक्षिणीचकार। सोऽयमश्वत्थामा आत्मनो विक्रमस्य, धर्मकञ्चुकिनस्ते व्यतिक्रमस्य चानुरूपं चेष्टते' इत्यधिक्षिप्य व्यरंसीत्। तदाकर्ण्य तूष्णीकेषु सर्वेषु, भीमः प्रत्याह—'अर्जुन, कथं तवाप्ययं मतिविपर्यासः। तपस्यन्तमधिकृत्य हि 'ब्राह्मणो न हन्तव्यः' इति शास्त्रं प्रवृत्तं, न तु यत्किंचित्कारिणं काण्डपृष्ठम्। तथा धर्मप्रवक्ता खल्वाचार्यो न तु मर्मप्रभेत्ता। द्रोणस्य तु सदा जन्यभूमिरेव यजनभूमिः। ज्यासंयोग एवेज्याप्रयोगः। ब्रह्मास्त्रसंधानमेव ब्रह्मसत्त्रविधानम्। अस्मदक्षौहिण्येव दक्षिणा। पाण्डवप्राणा एव पूर्णाहुतिः। एवंरूपे महाक्रतौ दीक्षितस्य दुर्धर्षवीर्यस्यास्य प्रशान्तौ भवानेव पश्यत्वच्छलमुपायान्तरम्। तदलमनेन विषमोपन्यासेन' इति। तद्वाक्यान्ते धृष्टद्युम्नोऽप्याह—'अयमेव धर्माभासो यच्छैष्योपाध्यायिकां पुरस्कृत्य पितृकल्पस्य ज्येष्ठस्य भ्रातुस्तिरस्करणम्। समाने तु दोषे मिथोऽचोद्यतेति न्यायमविदन् कथं स्वयं मार्गदर्शी सन् पार्थस्तदनुगं मामधिक्षिपति। अथवा सर्वोऽपि लोकः सर्षपोपमं परदोषं पश्यति, न तु कूश्माण्डोपममात्मनो दोषम्। कथमन्यथा न्यस्तशस्त्रं कुलकूटस्थं भीष्मं पातयतोऽस्यायमाक्रोशः। किं च। मुख्यशिष्यस्य तव प्रियायां सदसि क्लिश्यमानायां कुत्र गतस्ते शिष्यप्रियः परमाचार्यः। अस्मत्कुलघस्मरस्य तस्य महापातकिनः शिरोऽपि दुःशलाजानेर्मूर्धेव निषादविषये न निक्षिप्तमिति मे विषादः। कृष्णायाः कृते हि क्षम्यते ते निष्ठुरवचनम्' इति। सात्यकिस्तु पार्थस्यान्तेवासितया तन्न्यकारमसोढ्वा तं प्रत्यधिचिक्षेप—'रे रे पाञ्चाल, पितामहस्य वधेऽ-

ह्यनियतलिङ्गस्तवैव भ्राता हेतुः। यद्येवं पुनरप्यसंबद्धं प्रलपसि, तदा पतिष्यति ते मूर्धा निषादविषये' इति। धृष्टद्युम्नस्तु तमपवदते स्म—'रे रे निर्लज्ज शैनेय, त्वं किल मम शिरो हरिष्यसि। गृहाण शस्त्रम्। ननु रे मूढ, कथं विस्मृतवानसि, यद्भूरिश्रवसश्चरणेन ते मूर्धानं, शयानस्य तस्य वधाचरणेनात्मानं च पांसुलीकृतौ। अपि च। न खलु शिखण्डी भीष्मस्य शस्त्रन्यासवच्छरीरन्यासेऽपि हेतुः। उभयत्र च युवां गुरुशिष्यावुभावपि दूष्यौ' इति। तथा तयोर्मिथः कलहायमानयोः 'कथमहिभयमाकस्मिकं' इति भीमस्तौ निवारयामास। युधिष्ठिरस्तु सनिर्वेदमिदमाह—'भोः कृष्ण, आदितः प्रभृति ममाभिध्यया आततायितया च मय्यप्रीयमाणो द्रोणः कथंचिन्मां पुनर्विवासयितुं गोग्रहायाजगाम। संधिकामे त्वयि सम्यङ्मानिते धर्मलुब्धतया धार्तराष्ट्रस्य सैनापत्यं जग्राह, निजग्राह च सौभद्रं धर्मेण। न च गुरूणां गुणदोषौ विचारणीयौ। किं तु तदस्त्रतेजसि शलभायितव्यम्। तदकृत्वा रागतो ब्रह्महत्यादिमहापातकसामवायिकेऽहमग्नावात्मसंस्कारेण प्रायश्चित्तीयामि। अतः सर्वेऽपि यूयं स्वस्वविषयं प्रतियात। अलं परिश्रमेण' इति।

तावदासन्ने तदस्त्रे भगवान् 'अहो अभेद्यं नारायणास्त्रमायाति। अतः सर्वेऽपि रथादवतीर्य प्रणमत। अयमेवास्य प्रतीघातः' इत्युक्त्वा सर्वांस्तथा कारयन् साहसिक्येन रथादनवतरन्तं भीममपि बलात्कारयित्वा तदस्त्रं शमयामास। पुनश्च प्रयुक्ते आग्नेयास्त्रेऽर्जुनस्य ब्रह्मास्त्रेण शमिते, व्रीडितोऽश्वत्थामा यदृच्छया तत्रागतं व्यासं तमर्थं पृच्छंस्तेनाख्यायि—'शृणु द्रौणे, येनेदमव्याहतपूर्वं नारायणास्त्रं शमि-

तं, यत्प्रभावोऽयमिति । पुरा किल विष्णुस्तीव्रेण तपसा महेश्वरमाराध्य ततः सर्वोत्कर्षं वरं लेभे। स एव कृष्णार्जुनात्मनावतीर्णः। त्वमपि रुद्रांशभूत एव । तथापि परममाहेश्वरे कृष्णेऽभ्यधिका हि तस्य देवस्य प्रीतिः । तेनैव व्याघातितं ते दिव्यास्त्रम् । तस्मात्कृष्ण एव नन्तव्यो मन्तव्यो ध्यातव्यश्च । तदलं तव विरोधेन' इति। एवं तं संशमय्यार्जुनं प्राप्नुवन्स मुनिः, 'भगवन्, अत्र युधि यं यमहं शरव्यं करोमि, तं तं मम शरमोक्षात्प्रागेव दिव्येन केनचित्पुरुषेण शूलाग्रे प्रोतं प्रेतं च पश्यामि । कोऽसौ' इति तेन पृष्टस्तमाह—'अयमेव पशुपतिः, एतदीयेनैवास्त्रेण निवातकवचादीननायासेन न्यवधीः। पाशुपताग्रेसरस्य तव वध्यांस्त्वदर्थं स्वयमनुतिष्ठति । अयमेव कृष्णेन स्वप्ने दर्शितः । तदेनं रुद्रं स्तुवन्विजयी भविष्यसि' इति तस्मै शतरुद्रीयमुपदिदेश । उपदिश्य च तस्मिन् 'वत्स पार्थ, कृष्णे तव सर्वार्थसाधके सति, किमाशङ्कया । तस्माद्धीरो भव' इत्याख्याय गतवति बादरायणे, मुदितौ कृष्णार्जुनौ स्वं शिबिरमयांचक्राते ।

इति द्रोणपर्व ।

---

# कर्णपर्व ।

अथ दुर्योधनः कर्णमामन्त्र्याबभाषे—' सखेऽङ्गराज, अध्यक्षीकृतौ हि भीष्मद्रोणौ प्रत्यहं येन केनापि व्यपदेशेनास्मदीयानेव घातयित्वा, विवक्षितबाह्येनाडम्बरेण यापितार्धमासौ स्वयमशाम्यताम्। न खलु परत्र बद्धपक्षो हैमनस्तपन इव मन्दायमानतेजा प्रतप्तुमीष्टे। तदास्ताम्। भवता तु मयि मदमित्रे च विभज्य संवर्धितयोः प्रीतिद्वेषपादपयोरयमेवावसरः फलितुम्। तस्मात्समारुतेन धनंजयेनोपधूपितान् जीवनार्थिनोऽस्माननुगृहाण। गृहाण चेदमाध्यक्ष्यम्' इति सप्रशंसं सेनाधिपत्येऽभिषिक्तवान्। तथाभिषिक्तः स सोत्साहं परवाहिनीं प्रविश्य तीक्ष्णतरं प्रहरन्, आत्मनो वैवस्वतत्वं परेषां मनस्यर्थान्तरतया ग्राहयामास। तत्र तस्य वधप्राप्तं नकुलं कुन्तीप्रतिज्ञास्मृतिः सहसाविर्भूय ररक्ष। अत्रान्तरे दुर्योधनं हन्तुमुद्यतो युधिष्ठिरः ' कथं भवानार्यतमोऽपि कदर्य इव परकीयाय स्पृहयति। ममांशभूता हि धार्तराष्ट्राः। तदलमेतस्य वधेन' इति भीमेन निषिद्धो विरराम। तावद् द्रौणिनापीड्यमाने स्वबले, कुपितौ माद्रेयौ द्रौपदेयैः सह परानीकं प्रविश्य कदलीवनप्रविष्टाविव वेतण्डौ बहुशः पातयामासतुः।

सप्तदशे दिवसे कर्णः सुयोधनं प्रोवाच—' महाराज, प्रहरणादिना मत्तोऽविशिष्टोऽपि पार्थो विशिष्यते श्लाघ्यभूतेन सूतेन। तस्माच्छौरिकल्पं मद्रराजं मम सारथिं कल्पय, आकल्पय च गाण्डीविनः शिरःखण्डेन तव केतुदण्डम्।' तेन वाक्येन लब्धमनोरथ इव स मूढः सपदि शल्यमेत्य साभ्यर्थनमूचे—'मातुल, अद्यत्वे भवान् कर्णश्च

द्वावेव महारथौ महाशयौ च मन्मनोरथकल्पद्रुमौ। अतो मन्ये युवामपि कृष्णार्जुनाविवैकरथस्थावेव समरं निर्वहन्तौ विजयोत्तरौ भविष्यतः। तत्र चार्जुनस्य कृष्ण इव भवान् कर्णस्य सारथ्यमास्थाय, तं सर्वास्वापत्सु गोपायतु।' तच्छ्रुत्वा स सक्रोधं प्रत्याह—'ननु भोः किमेवमनर्हं मन्त्रयसे, यन्मां कर्णादवहीनबलं तस्य नियोज्यं च चिकीर्षसि। कथं वा मूर्धावसिक्त आधिरथेर्भृत्यो भवतु। परेषु यं मम भागं कल्पयसि, अथ वा सर्वानेव तव द्विषः कथाशेषान् करिष्यामि। तदलं मान्यविमाननया' इति। दुर्योधनस्तु पुनस्तं सानुनयमाह—'मातुल, भवन्तं वासुदेवसदृशं मत्वा कर्णस्य गुप्त्यर्थमर्थये, न पुनः कदर्थये। न च सूतकर्म कुर्वन्नर्वाचीन इति नियमः। श्रूयते हि त्रैपुरे संप्रहारे रुद्रस्य सारथ्यं कुर्वन्हिरण्यगर्भः। किं तस्य निकृष्टता। मा च कर्णं दौष्कुलेयं शङ्किष्ठाः। रूपमेव व्याचष्टे तस्य माहाकुलीनतां श्वैतच्छत्रिकतां च। अतो महानुभाव, तं महाभागं विषमेषु धारयमाणो भवन्, व्यसनार्णवे मग्नानां कुरूणां मद्रराजः कर्णधार इति कीर्तिं प्रपद्यस्व' इति। तदनु तदनुनयेन प्रवणीभूतः स युधिष्ठिरवाक्यं संस्मृत्य प्रत्याह—'ननु मनीषिन्, सुविशारदा ते मनीषा, सूनृता ते भणितिः, यन्मम सारं वासुदेवस्येव निर्णीतवानसि। अतोऽप्रत्याख्येयं तेऽभ्यर्थनम्। किं तु पार्थः कृष्णस्येव हितैषिणो ममावसरेषु स्वैरालापं मर्षेण यद्यनुमन्ता कर्णस्तदा तस्य यन्ता स्याम्' इति।

तथाभ्युपगच्छतः कर्णस्य रथ्यानां प्रग्रहान् गृह्णन् शल्यः 'अभिवानरध्वजमश्वांश्चोदय' इति तेन नुन्नस्तमूचे-'सूतपुत्र, नेयं विहारसंसत्

यत्र स्वैरं विकत्थमानस्त्वमप्रगल्भैर्महान्महीयसे । इदं तु पौरुषनिकष-भूतं वीराशंसनं हि । यन्मन्यसेऽतिबलेन स्पर्धा आत्मन उत्कर्षयेति, तदपेशलम् । पश्य पावकेन वैरायमाणस्य पतङ्गस्य गतिम् । तस्माद्यद्यात्मनः पथ्यमिच्छसि, तज्जहिहि पार्थाभियोगमनोराज्यम्' इति । तदनादृत्य 'नुद नुदाश्वान्' इति वदति कर्णे, तथा कुर्वन् शल्यस्तमुवाच—'भोः, पश्य प्रथम एव विक्रमणे प्रस्खलतस्तव वाहान् । दृश्यन्ते च विपरीतान्येव निमित्तानि । अतो न प्रसीदति मे हृदयम् । यदि मद्वचनमुल्लङ्घ्य गमिष्यसि, तदा गमिष्यस्येवेति । तदप्यसत्कृत्य संग्रामभुवमवतरन् कर्णः सेनाग्रस्थानप्राक्षीत्—'ब्रूत, क्व तिष्ठत्यर्जुनः । तं ब्रुवन् पारितोषिकमादत्ता'मिति । तस्य तथा गर्जितमसहिष्णुः शल्यः कर्णमुवाच—'रे राधापुत्र, भीष्मद्रोणादयो बहवो दोष्मन्तो यत्समक्षमर्जुनेन पराभूतास्तेषामेव पुरः कोऽयं वागाडम्बरः । परिहसन्ति त्वां वृथावाचाटोऽयमिति । त्वं तु निर्लज्जोऽसि । तदलमनया निरर्थिकयारभट्या' इति । तदमृष्यमाणः कर्णस्तमधिक्षिप्तवान्—'अरे प्रच्छन्नशत्रो, न त्वामिदं पृच्छामि । स्वाधिकारानुरूपमपृष्टोत्तरं च जल्पन्दण्ड्योऽसि । यदीदृशान्यक्षरमलानि पुनरपि जिह्वायां धारयसि, तदा तव जिह्वामनेन कृपाणधाराजलेन संस्कर्तास्मि' इति तं तर्जयामास । तत्प्रसङ्गेन कलहायमानावस्युद्यतौ च तौ रथिसारथी सान्त्वयित्वा सुयोधनस्ताभ्यां समं समरमध्यमवततार ।

तत्र शूरसेनान्पाञ्चालानन्यांश्च बहून्निहत्य युधिष्ठिरं व्यथयन्तं कर्णं विसंज्ञं कुर्वन्वृकोदरस्तत्पुत्रं भानुसेनं तथा सप्त धार्तराष्ट्रांश्च निष्पिपेष। लब्धाश्वासः कर्णस्तु माद्रेयाभ्यां सह पुनर्युद्धायापतन्तं युधिष्ठिरं भृश-

मर्दयन् प्राणसंशयं गतं तं रक्षितुकामेन शल्येनाख्यायि—'भो महावीर कर्ण, विक्रान्तस्य तव किमेभिर्वराकैः। न खलु मृगेन्द्रो गजेन्द्रादृतेऽन्यं मृगं मृगयते। तस्मादभियुज्यस्व धार्तराष्ट्रकुलसर्वंकषं वृकोदरम्।' तथेति निवृत्ते कर्णे, युधिष्ठिरो माद्रेयाभ्यां सह त्वरिततरं शिबिरं प्रविश्य श्रान्तः शय्यामधिशिश्ये।

अत्रान्तरेऽल्पावशिष्टं संशप्तकगणं निहत्य तदाहवमवभृथीकृत्य प्रतिनिवर्तमानः पार्थः संकुलयुद्धभुवि तीक्ष्णतरं प्रहरन्तं कर्णं वीक्ष्य, मृदङ्गध्वजाङ्कितं युधिष्ठिरस्य रथं, तथा शरभहंसलक्षणौ नकुलसहदेवयो रथौ चापश्यन् शङ्कितः सत्वरं सिंहध्वजं रथमभिसृत्य तत्रस्थं बलवत्प्रहरन्तं भीमं 'क्वास्माकं ज्येष्ठः' इति पप्रच्छ। 'नाहं जानामी'ति तेन प्रत्युक्ते ससंभ्रमं शिबिरमासाद्य तत्र तं पश्यन् हृष्टोऽर्जुनः कृष्णेन सह तस्य पादौ जग्राह। स त्वनवसरे प्रत्यागतौ सहर्षं प्रणमन्तौ च तौ कृष्णार्जुनौ दृष्ट्वा, कर्णं निहतं निश्चित्य पप्रच्छ—'वत्स गाण्डीविन्, कथं तं दुरात्मानं सूतपुत्रं न्यवधीस्तद्विस्तरेण ब्रूहि। न हि भीष्मद्रोणौ चास्य कर्णस्य कलामप्यर्हतः। महानरातिरयमस्माकम्। अद्यापि न मुञ्चति मां तद्रणजनितः कम्पः। अथ वा ईषज्जयोऽयं गाण्डीवसहायस्य तव, तथापि महत्कौतूहलम्। तदाचक्ष्व' इति। 'आर्य, तवादर्शनजेन खेदेनात्र प्रधावितोऽस्मि, न तु रिपुमर्दनजेन मोदेन' इति तेन प्रत्युक्ते, आ जन्मनोऽभूतपूर्वेणामर्षेण दुर्निरीक्षो राजा युधिष्ठिरस्तं विजगर्हे 'धिक्त्वां गेहेक्ष्वेडिनम्। यस्त्वं पूर्वं प्रसङ्गे प्रसङ्गे कर्णं नखनिर्भेद्यमिव सावज्ञया गिरा तिरस्कृत्य, प्राप्तेऽवसरे एवं कातरोऽसि। ईदृशस्य तव किमनेन

भारभूतेन गाण्डीवेन। दीयतामन्यस्मै यः कर्णं प्रतियोत्स्यते' इति। तत्क्षणं खड्गं परामृशन्नर्जुनः, 'किमर्थमस्थाने शस्त्रमन्विष्यसि' इति भगवता पृष्टः प्रत्याह—'सखे माधव, गाण्डीवमन्यस्मै देहीति यो मामधिक्षिपति, स मे वध्यः' इति ममेदमुपांशुव्रतम्, यथा तूबुर-शब्देनाधिक्षेपे भीमव्रतम्। शृण्वत एव तव तिरस्कृतगाण्डीवस्यास्य शिरः खड्गेनोत्कृत्य सत्यव्रतो भवितुमाशंसे' इति। भगवांस्तु तं धिक्कारपूर्वं निर्भर्त्सयामास—'आः पातकिन्, कथमादित्यमिव सर्वलोक-नमस्कार्यं, मूर्तिमन्तमिव धर्माधिदेवं, समस्तकल्याणगुणनिधानं मृदुं शुचिं शान्तं सुगृहीतनामधेयं सम्राजं पितृकल्पं ज्येष्ठभ्रातरमजातशत्रुं जिघांसन्नापत्रपसे। अहो समीचीनमारब्धं त्वया। गुरुहत्ययाप्य-वश्यं पालनीयं खल्विदं महाव्रतम्। कार्यानुरोधेन हि सत्यधर्मयो-र्व्यवस्था, न पुनर्यथाश्रुतमात्रेण। अन्यथा हि महाननर्थः स्यात्। श्रूयते हि पुरा कौशिको नाम तपस्यन् कश्चिद्ब्राह्मणः प्राणभयात्स्वाश्रमे प्रलीनान् विप्रान् पृच्छद्भ्यो दस्युभ्यः 'मया सत्यमेव वक्तव्यं' इति निश्चित्य कथयामास। तैस्तेषु बलान्निहतेषु तत्पातकेन स तपस्वी नरकमियाय। एवं च तदिदं सत्यवचनं पीडामात्रफलकत्वेनाधर्मो बभूव। गहना हि सत्यधर्मयोर्गतिः। पश्य। पुरा कश्चिद्व्याघ्रस्तीव्रेण तपसा बहून्वरानवाप्य लोकोपद्रवाय व्यजृम्भत। तेन जगतः क्षोभमाशङ्क्य विधाता तं चक्षुर्भ्यामन्धं चकार। तथापि प्रचण्डवीर्यतया भयानकं तं व्याघ्रं मारयन् कश्चिद्व्याधः सकुटुम्ब एव स्वर्गमियाय। तस्य सा हिंसा महाजनिकृतया धर्मो बभूव। एवं स्थिते,

बुद्धिपरिकल्पितस्य निष्प्रयोजनस्य व्रतस्यार्थे गुरुहत्यामाचरंस्त्वं कथंतरामन्धतामिस्रं न विशेः। तदलमनेन दुरध्यवसायेन' इति।

तदाकर्ण्य संजातवेपथुः पार्थः प्रार्थयामास—'भगवन्, यथा मम सत्यव्रतत्वमार्यवधपातकनिवृत्तिश्चोभयमपि स्यात्तथा त्वमेव संचिन्त्य विधत्स्व' इति। 'भोः पार्थ, न्यक्कुरु ज्येष्ठं कतिपयाक्षरैरुपालम्भवचनैः। वधादभ्यधिको हि मान्यानां तिरस्कारः। ततश्चोभयपरिहारं प्राप्स्यसि' इति तेन दर्शितोपायः स खड्गं न्यस्याग्रजं गर्हयामास—'अरे भीरो, समरात्पलायमानस्य तव कथं युधिष्ठिरता। ईदृशस्त्वं वीरगणनासु कनिष्ठिकास्थं मां क्षिपन्न जिहेषि। यदि कदाचिद्भीमसेनो मामेवं गर्हयेत्तस्य तत्क्षमं स्यात्। अरातिकुलोन्मूलनेऽलङ्कर्मीणो हि सः। त्वं पुनर्वित्तमर्जयितुं शत्रुमर्दयितुं वा अक्षमः क्षमामभिनयन्, मद्बलार्जितानि धनानि दारांश्च कदर्थीकृत्य, महदिदमाक्षद्यूतिकं वैरं चोत्पाद्य, त्वदर्थं क्लिश्यमानानस्मानेव निन्दसि। धिक्त्वाम्' इति। एवमधिक्षिप्य पुनः खड्गं परामृशन् सः 'किमन्यत्तवोपांशुव्रतम्' इति कृष्णेन पृष्टः सन् 'भगवन्, किमन्यत्। अनुद्यनामानमनवद्यमहिमानमार्यमेवमपोद्य, कां गतिं प्रतिपद्येय। तदद्यैव स्वशिरः संछिद्य तेन तद्दुष्कृतस्य निष्कृतिं चिकीर्षामि' इति प्रत्युत्तरयामास। कृष्णस्तु तं सावज्ञमाह—'अयि विवेकविश्रान्त, अनेन पश्चात्तापेनैव कृतप्रायश्चित्तोऽसि। तदलमलमन्धतमसप्राप्तिहेतुभूतया आत्महत्यया' इति तं निवारयामास। तावत् 'भोः कृष्ण, श्रुतं श्रोतव्यम्। किमितः परमुक्तेन। एवं विगीतकर्माहमद्यैव वनं प्रवेक्ष्यामि। कामं महात्मना भीमेन सह महावीरोऽर्जुनः सुखं वसतु' इति सनिर्वेदमुक्त्वोत्तिष्ठन्यु-

ष्ठिरः 'मत्कृते इदमेकमागः क्षन्तव्यं' इति पादयोर्निपत्य याचमानेन कृष्णेनानुनीतः प्रकृतिमापद्यत ।

अथ सुमनीकृतेन तेनानुज्ञातौ कृष्णार्जुनौ यावद्युद्धभुवमवतरतस्तावत्कर्णः स्वपुत्रान् सुषेणादीन्हतान्वीक्ष्य क्रुद्धो बहूनि परबलानि क्षपयामास । अत्रान्तरे भीमो दुःशासनं हठादाकृष्य भूमौ निपात्य पद्भ्यां तत्कण्ठं शिरश्चाक्रम्य तिष्ठन्नुच्चैर्जगर्ज—'भोः कुरवः, किमिति सर्वेऽपि यूयमुपेक्षध्वे पाञ्चालीपराभवजनितक्रोधानलदह्यमानतयातितृषितेन मया क्षतजपानाय विदीर्यमाणहृदयं युष्माकं युवराजं दुःशासनम्' इत्युद्घुष्य गदाप्रहारोद्वमितं तद्वक्षोरुधिरं पायंपायं 'गौगौः' इति ननर्त । तत्क्षणं प्रचण्डतरेण विकृतेन च तदाकारेण भीतभीतेषु सर्वतः पलायितेषु बलेषु, 'आहर प्रहर' इत्यापतन्तो दश धार्तराष्ट्रास्तस्य महासाहसिकस्य प्रतापानले शलभी बभूवुः ।

अथ पश्यत एव कर्णस्य तत्पुत्रं वृषसेनं निहत्य युद्धोद्यतेऽर्जुने, स्वपुत्रवधेनोपचितक्रोधेऽरिमभियुञ्जाने च कर्णे, दिवि युद्धदिदृक्षयागता देवा अर्जुनतः, आदित्याः कर्णतश्चाभवन् । तत्र च 'जयतु पार्थः' इति, 'कर्णः' इति च विवदमानौ तत्पितराविन्द्रविकर्तनौ सान्त्वयन् पितामहः, 'अस्मिन् संपरायेऽर्जुनस्य जयोऽस्तु, कर्णस्तु सांपरायिकं जयमप्रतिबन्धेन लभताम्' इति व्यवस्थापयामास । तौ कर्णार्जुनावुभावपि लघुहस्ततया कृतहस्ततया चानिमिषैरप्यनवगाह्यप्रयोगान्तरौ प्रतिक्षणमनिलमयमचलमयमनलमयमभ्रमयमन्यमन्यं चास्त्रशस्त्रकलापं विसृजन्तौ सृजन्तौ च तेजोमयं तिमिरमयं शीतमयमशीतमयं च भुवनतलं, चिरमप्यविश्रान्तावयुध्येताम् ।

अत्रान्तरे पूर्वं खाण्डववने पार्थेन हृतजननीकश्छिन्नबालश्च संस्तस्मिन्बद्धवैरः समयाकाङ्क्षी च स्थितस्तक्षकपुत्रोऽश्वसेनो नामोरगः स्वयं योगबलेन कर्णस्य शरे प्रविवेश। तदविद्वान् कर्णस्तं शरं प्रयुञ्जानस्तद्विदा शल्येन निषिद्धोऽपि तदनादृत्य पार्थाय प्रयुयुजे। देवराजस्तु 'धिक्परस्यार्थे स्वजनाय द्रुह्यन्तम्। यदयं दुरात्माश्वसेनो यस्मान्मया प्रयत्नाद्रक्षितस्तमेव ममात्मजं जिघांसति' इति प्रव्यथितो बभूव। तावत्सारथिना विश्वंभरेण स्वपदाङ्गुष्ठनिष्पीडिते किष्कुमात्रं भुवि मग्ने तद्रथे, शिरो लक्ष्यीकृत्य प्रयुक्तं तदस्त्रं किरीटिनः किरीटमाच्छिद्यापयातम्। तेन विषण्णस्ताक्षकिः कर्णं स्ववृत्तान्तमावेद्य, अभिहृदयं पुनः प्रयोगाय तं चोदयामास। 'कथमेकमस्त्रं द्विः प्रयुञ्जीत कर्णः। कथं च वा पराश्रयेण स्वस्मिन्मिथ्यागौरवितो भवतु। त्वदृतेऽपि शक्त एवाहमर्जुनं हन्तुम्। तद्गम्यताम्' इति तेन प्रत्याख्यातः सोऽश्वसेनः स्वयमेव पार्थं जिघांसुरभिपतन् ग्रीवां खण्डयता तेन स्वमातुः पदवीं निन्ये।

अनन्तरं प्रयुयुक्षिते ब्रह्मास्त्रेऽप्रतिभाते भुवि मग्ने च स्यन्दने, संभ्रान्तस्तूर्णं रथादवतीर्णः कर्णः, 'भोः पार्थ, क्षणं विश्राम्यतु भवान्, यावदहं रथं समेऽवस्थापयामि। न खलु वीरा विशस्त्रं कार्यान्तरव्यग्रं वा शरस्य शरव्यं कुर्युः' इति प्रोवाच। 'अहो विषमस्थः सर्वोऽपि धर्मं पश्यति, न सुखस्थः। किमयं धर्मो द्यूतकालेऽनेन नाधीतः। किं विलम्बसे। हन्यतामयं दुरात्माधुनैव' इति कृष्णेन नुन्नोऽर्जुनो दिव्यास्त्रेण भूमिष्ठमेव तं वीरप्रकाण्डं वीरशय्यायां शाययति स्म। तस्य कर्णस्य शरीरोत्थं दिव्यं ज्योतिः पश्यतामेव सर्वेषां ज्योतिर्मालिनो मण्डलमाविवेश।

सपदि पाण्डवबलैर्हन्यमानासु जयभेरीषु, दुर्योधनस्तद्दुःखं सोढुमपारयन्विललाप—' हा पुरुषभूषण, पुरुषपुंगव, पुरुषोत्तम, वैकर्तन, कर्ण, सौन्दर्येण वीर्येण शौर्येणौदार्येण गाम्भीर्येण मेधया प्रतिभया वा त्वत्सदृशः पुरुषो न भूतो न च भावी। यस्य तवैकोद्यमजय्यं जगत्, पुरुषकाम्यं रूपम्, सुरेश्वरार्थिकं वादान्यकम्, विपक्षाक्षोभ्यं चित्तस्थैर्यम्। तादृशस्त्वमार्जवैकपरायणः कुसृतिशरणैः पापैरिमां दशां गमितोऽसि। त्वयि कीर्तिशेषे संवृत्ते किं मम जीवितेन' इति भुवि निपत्य मुमोह। पुनराश्वासितः स शल्यं सेनापतिं विधाय, तेन सह मितपरिवारः पुत्रशोकेनेव तिरोहिते विवस्वति, स्वशिबिरमगात्। युधिष्ठिरस्तु प्रहृष्टोऽर्जुनमालिङ्ग्य 'अद्य राजास्मि संवृत्तः' इति वदन् कृष्णार्जुनादिभिः सह महता जयघोषेण मुखरायमाणदिक्-चक्रवालः स्वं स्कन्धावारमासाद्य सुखमासांचक्रे।

इति कर्णपर्व।

# शल्यपर्व ।

अथाष्टादशे दिवसे 'सर्वैरप्यस्माभिः संहत्य योद्धव्यम्' इति मिथः समयेन प्रवृत्तेषु शल्याधिष्ठितेषु हतशिष्टेषु कुरुबलेषु, 'अद्य समाप्तव्या समरकथे'ति निश्चयेन सोत्साहमुद्यतेषु च पाण्डवानीकेषु, यथावत्प्रवृत्ते च संप्रहारे, नकुलेन कर्णपुत्रे चित्रसेने, सहदेवेन तु सपुत्रे शकुनौ स्वे मातुलेये च, तथा दुर्योधनेन चेकिताने, द्रौणिना पाञ्चाले सुरथे, सात्यकिधृष्टद्युम्नाभ्यां म्लेच्छराजे साल्वे, अर्जुनेन सपुत्रे सवर्गे च सुशर्मणि, भीमेन तु दुर्योधनवर्जं शिष्टेषु धार्तराष्ट्रेषु च प्रेतनाथातिथीकृतेषु, राजा युधिष्ठिरः सेनापतिं मद्रराजं मातुलं शल्यं युधि कर्णस्य तेजोवधं परलोकेऽपि कारयिष्यन्निव तत्सालोक्यं गमयामास ।

तत्क्षणं तत्र तत्र विद्रुते हतवीरे परबले, धार्तराष्ट्रो युयुत्सुः कुरूणां वधूवर्गं हस्तिनां नीत्वा सर्वं वृत्तान्तं विदुरे न्यवेदयत् । सात्यकिगृहीतः संजयो व्यासेन मोचितो गच्छन्, मायया द्वैपायनह्रदे प्रविष्टं दुर्योधनं वीक्ष्य रुदन् तदाज्ञया कृपादिभ्यस्तदवस्थितिं कथयित्वा पुरं गतवान् । अथ तद्बलप्रधानावशिष्टाः कृपाश्वत्थामकृतवर्माणस्तस्मिन्ह्रदे तदवस्थं तं कुरुराजं वीक्ष्य भृशं व्यथिता विचुक्रुशुः ।

अत्रान्तरे समरभुवि तद्दर्शनेन व्यग्रो राजा युधिष्ठिरस्तं ह्रदसंवादं श्रुतवद्भिर्मांसिकैर्निवेदितार्थाद्भीमादवगत्य, सपदि तमुद्देशं सपरिवारोऽभिदुद्राव । तत्र कमप्यदृष्ट्वा विस्मितः स जलस्तम्भनविद्यया तत्रान्तर्हितं तं रिपुं भगवन्मुखाद्विदित्वा प्राह—'ननु पुरुषमानिन्

धार्तराष्ट्र, कथमेवमारब्धमनिर्वहन् अन्तराले प्रणष्टोऽसि। सूच्यग्रभेद्यायामपि मह्यां वञ्चादरस्त्वं कृत्स्नामेव तामेवमनासङ्गेन नोत्स्रष्टुमर्हसि। तात, कुलपुत्रोऽसि। मा भैषीः। ईप्सितसिद्धिः स्वर्गप्राप्तिर्वास्तु। काममुत्तिष्ठ' इति। सोऽन्तर्हित एव प्रत्याह—'ननु पाण्डव, श्रान्त्यैवाहमस्मिन् जलाशये शये, न तु भीत्या। युष्मन्मनोव्यथया सह मनोहत्य मया भुक्तभोगैवेयं वसुमती नापूर्वा। इदानीं तु हतवीरतया विधवेव नारी, भुक्तमुक्तेव स्रक्, जीर्णेव पटी, निःश्रीका निरामोदा निःसारा चेयं तवैवास्तु। किं च। यदि मया सह योद्धुमाशंससे, तदा युष्मास्वन्यतमो गदायुद्धाय सज्जीभवतु' इति पृच्छंस्तथास्त्विति तेनोक्ते गदापाणिरुदतिष्ठत्।

उत्थितेन च तेन 'को युष्माकं मया सह द्वन्द्वयुद्धाय सज्जीभविष्यति' इति पृष्टे, 'अस्मासु कतमं त्वं मन्यसे स प्रतियोत्स्यते। तस्मिन्नेकस्मिन् जितेऽपि सर्वेऽपि वयं पुनरारण्यका भवाम' इति प्रतिब्रुवाणं युधिष्ठिरं निरुध्य भगवान् ससंभ्रममाह—'भो भोः, किमिति पुनर्द्यूतं प्रवर्तयसि। भीमवर्जं चतुर्ष्वपि युष्मासु कतम एवं गदया प्रतियोद्धुमलम्। अयं ह्यतीतयुष्मत्प्रवासकालं भीमविजिगीषया आयसीं तत्प्रतिमां निर्माय तत्र शिक्षितवान्। तदलमनया प्रतिज्ञया। भद्र भीमसेन, अयमवसरस्ते प्रतिज्ञाशेषं पूरयितुम्' इति। अथ तथा प्रारब्धे भीमदुर्योधनयोर्गदायुद्धे, तीर्थयात्रायाः प्रतिनिवृत्तो बलभद्रः स्वशिष्ययोस्तयोस्तं युद्धोपक्रममाकर्ण्य कुतूहलितया सरभसमागत्य तैः सभाजितः प्रेक्षकाग्रेसरो बभूव।

तथा प्रवृत्तं तद्द्वन्द्वयुद्धं भीमस्य प्राणाधिकतया दुर्योधनस्य शिक्षाधिकतया चान्यूनातिरिक्तमननुमेयजयपराजयस्थानं च चिरमवर्तत। अथोपायज्ञेन भगवता प्रवर्तितोऽर्जुनो भीमसमीपमेत्य, असत्यपि प्रहर्षहेतौ कस्मिंश्चिद्विशेषे, 'साधु भीम साधु' इति स्वोरुं मुहुर्मुहुरास्फालयामास। सद्यो गृहीतसंज्ञः स्मृतसभाप्रतिज्ञः स प्राभञ्जनिः स्वयं दृढप्रहारितया एकेनैव गदाप्रहारेण तस्य सक्थि बभञ्ज। तथा भिन्नोरुर्दुर्योधनः कृत्तपादः पादप इव विशीर्णमकुटरत्नप्रसूनः विह्वलशाखो विश्लथस्कन्धो विकीर्णमूर्धजपत्रप्रकरः क्षीणपुण्यः स्वर्गीव हा हेति विक्रोशन्नवाक्शिरा विवशो भुवि निपपात। तत्क्षणं 'अहो अहो' इत्याक्रन्दिते सर्वतः समुद्भूते, भुवि पतितस्य तस्य पतितस्य शिरः पदाक्रम्य तिष्ठन् भीमः 'गौगौः' इति ननर्त। तं सहसा निरुन्धन्नजातशत्रुर्गुणग्राहितया बन्धुवत्सलतया च निरवरोधं प्रसृतास्रप्रवाहो व्यलपीत्—'अनागतचिन्तनं, आगते च सद्यः प्रतिविधानं, अलब्धस्य लिप्सा, लब्धे चासंतोषः, भृत्यभरणं, प्रकृतिरञ्जनं, शत्रुविकर्शनं, चारचक्षुष्ट्वं, अनालस्येन कार्यैकव्यग्रता चेत्येवमादिभिर्बहुभिः राजगुणैरलंकृतमपि त्वामेको लोभदोषो दूषयामास। यद्वा। ममैवेदमभाग्यविलसितं, येनाहमीदृशेन भ्रात्रा त्वया सहैकासनस्थसुखं नान्वभूवम्' इति मुक्तकण्ठं रुरोद।

संकर्षणस्तु भीमकृतं दुर्योधनस्य शिरसि पदाक्रमणमक्षाम्यन्, 'आः पाप, दुर्विनीत, कथं धर्मेण युद्ध्यमानं महाराजं कुरुराजमधर्मेण निपात्य, ममाग्र एव पदा तन्मूर्धानं स्पृशसि। अरे मदाध्मात, कस्माद्गुरोरधीतवानसि द्वन्द्वे कटेरधः प्रहर्तुम्। रे रे दुरात्मन्, कथं

मूर्धावसिक्तस्य शिरः पदा स्पृशन्न जुगुप्ससे। अययवलिप्त, मत्समो वीरो नास्तीति दृप्तं त्वां मदान्धं गजं कण्ठीरव इवाद्यैव निर्भिन्नमस्तकं निर्भिद्य महाराजदुर्योधनमाश्वासयामि' इति साटोपं वेपमानतनुरुत्तस्थौ। तावत्सत्वरं तमालिङ्ग्य कृष्णो ययाचे—'आर्य, क्षम्यतु भवान्। स्मर्तव्या ह्यस्माकं पितृष्वसा तपस्विनी कुन्ती। किंच। किं नाश्रौषीरस्मद्भागिनेयस्याभिमन्योर्वधे कुरूणां धर्मैकपरायणत्वम्। शप्तश्चायं पापो निजोरुताडनकुपितेन मैत्रेयेण। प्रतिज्ञातं चानेन द्रौपदीपराभवक्षुभितहृदयेनास्योरुभञ्जनं भीमसेनेन। अपि च। अवेक्षणीयो हि सर्वावस्थास्वप्ययं राजास्माभिर्युधिष्ठिरः। किं चान्यत्। पञ्चानां पाण्डवानामेकतमनाशेऽपि सर्वनाश एव। ततश्चावश्यं पुत्रशोकविषण्णाया वत्सायाः सुभद्रायाः वयमेवाभद्रहेतवः संवृत्ताः स्याम। तस्मादलं संभ्रमेण' इति तं सान्त्वयामास। तथा युधिष्ठिरं चाश्वास्य धार्तराष्ट्रं बहु विगर्हयतः स्वबलाध्यक्षान्निषिद्ध्याह—'भो वीराः, यद्यप्ययं पापः सर्वंकषया स्वदुर्बुद्ध्या सर्वं नाशयित्वा स्वयं च जीवनाशं नष्टः। तथापि ईदृशे व्यसनकाले तद्दोषसंकीर्तनं क्षते क्षारसेकवदरुंतुदं स्यात्। तस्मादेतदालापं वर्जयत' इति। तदात्मनोऽवहेलनं मन्वानः स मानी पूर्वकायेनोत्थितः स्फिग्देशेन भुवि स्थितः सन् कृष्णमधिचिक्षेप—'कंसस्य बन्दीपुत्र, जानामि ते कौटिल्यम्। भीष्मद्रोणकर्णानार्जवेन खल्वजैषीः। अधुनापि तवैवोपजापेन खलु ममेयं दशा। एवं दुर्बुद्धिसागरस्त्वं मामधिक्षिपन्न जिह्रेषि। किं च। शृणु रे पश्यत एव महामन्त्रिणस्तव विषीदत्सु च त्वन्नाथेषु पाण्डवेषु, चतुरङ्गिणीसंपन्ना समग्रवसुसंपूर्णा अशेषराजमण्डलमण्डिता चतुःसागरपर्यन्ता

वसुमती यथेच्छं मया भुक्ता दत्ता च। अधुना तु निर्वीरगजतुरगां मृतकबंहीयसीं दग्धामरण्यानीमिव ग्रस्तामिन्दुमण्डलीमिव मुण्डितामङ्गनामिव च शोच्यामिमां मेदिनीं प्रेतकृत्यैकव्यग्रो नित्यनिवापाञ्जलिप्रयतपाणिः सन्नयं पाण्डवः काममनुभुङ्क्ताम्। किमित्यनेन शोकामयमयेन जयेनोत्सिक्तोऽसि' इति। भगवांस्तु 'अयि दुरात्मन्, कथमद्यापि त्वं दौर्जन्यं न परित्यजसि। अथवा न विक्रियते हि प्रकृतिः। अतस्तवानुरूपमेवेदं वचनम्। धिक्त्वाम्' इति तं निर्भर्त्स्य सर्वैः समं तस्यैव शिबिरं जगाम।

गत्वा च स पार्थं सहोपकरणमवतार्य वाहांश्च विमोच्य स्वयं यावदवरोहति तावद्दिवमुत्पतिते सवानरे ध्वजे तद्रथ आकालिकेन वह्निना भस्मसाद्बभूव। कृष्णस्तु 'द्रोणकर्णनिसृष्टशास्त्राग्निर्मदवस्थानेन स्तम्भितशक्तिस्तिष्ठन्, अद्याप्रतिबन्धो व्यानशे' इति तन्निदानं विविदिषवे युधिष्ठिराय व्याचष्ट।

अथ दुर्योधनस्य वस्त्राभरणानि यथेच्छं परिदधानेषु प्रधानेषु, तपस्विन्या गान्धार्याः शापशङ्कितेन राज्ञा तत्सान्त्वनाय प्रेषितः कृष्णस्तथेति हस्तिनां गत्वा व्यासेनाश्वास्यमानौ तावन्धदम्पती प्रणम्य राजानं करे गृह्णन्, रुरोद। रुदित्वा च क्षणं स्वयमाश्वस्य प्राह— 'अयि राज्ञि, भो राजन्, स्फुलिङ्गेन स्पृष्टस्य हि दहनव्यथा, न तु समिद्धं दावानलं प्रविष्टस्य। एवमीदृशेऽस्मिन् कुलक्षये किं व्यसनव्यपदेशेन। अत्युत्कटं हि दुःखमदुःखमित्येव व्यवहर्तव्यम्। किं च। जलबुद्बुदवत्क्षणविनश्वरं शरीरं, पथिकसमागमोपमः कलत्रपुत्रादिसमागमः। स्वप्नभोगनिभाः सर्वे भोगाः। एवं निःसारेऽ-

स्मिन् संसारे वर्तमानोऽपि विवेकी सुखदुःखे लाभालाभौ जयाजयौ मानावमानावित्यादिभिर्द्वन्द्वैरनभिभूतः सर्वत्र च हर्षविषादविहीनः पद्मपत्रस्थवारिबिन्दुरिव निर्लेप एव देहयात्रां गमयेत् । इदमेव हि सर्वशास्त्र-हृदयम् । अथ वा भगवता व्यासेन नित्यमनुशिष्टयोर्युवयोर्न खल्विदानीमपूर्वं किंचिदुपदेष्टव्यम् । न च नियतितन्त्रेऽत्र दुर्योधनः शकुनिरन्यो वा कश्चिदुपालम्भनीयः । नापि पाण्डवान् क्रोधदृष्ट्या द्रष्टुमर्हथः । अदृष्टपितृमुखास्ते बाल्यतः प्रभृति युवाभ्यामेवौरस-निर्विशेषं लालिताः सर्वावस्थास्वपि युष्मच्छासनं नातिवर्तन्ते । अत-स्तेषु शिवानुध्यानौ भवतम् । एतदेव वामसकृदभ्यर्थये' इति । कृच्छ्रेण तथास्त्वित्यभ्युपगच्छन्तौ तौ गान्धारीधृतराष्ट्रावनुज्ञाप्य भगवान् द्रौणेः शङ्कितः सत्वरं युधिष्ठिरं निशीथ आसाद्य तदा तत्सा-न्त्वनमावेदयन् पुनः प्राह—'अद्य मङ्गलार्थमस्माभिरन्यत्र वस्तव्यम्' इति । तथा प्रस्थितैस्तैः पञ्चभिरपि पाण्डवैः सात्यकिना च साकं भगवान् नदीतीरे कुत्रचित्स्थले सुखं सुष्वाप ।

अश्वत्थामा तु कृपकृतवर्मभ्यां सह दुर्योधनमासाद्य तया तस्य दशया भृशं दुःखितः सर्वपाञ्चालवधं प्रतिजज्ञे । ततस्तुष्टेन तेन धार्तराष्ट्रेण कृतसेनाधिपत्यः स द्रौणिस्ताभ्यां सह प्रतिष्ठमानः कथ-मिदं निर्वाह्यमिति चेतसा समीक्षांचक्रे ।

इति शल्यपर्व ।

---

# सौप्तिकपर्व ।

अथानध्यवसितेतिकर्तव्यः स द्रौणिस्ताभ्यां सह कस्यचिन्न्यग्रोधपादपस्य तले विश्राम्यंस्तत्र निशि विस्रब्धं सुप्तान् बहून्काकानेकेनोलूकेन हन्यमानानवलोक्य तेन कृतोपदेश इव सहसोत्थितस्ताभ्यामनुगम्यमानः पाण्डवशिबिरं प्रविवेश। प्रविष्टमात्रश्च स केनचिदद्भुताकारेण महता भूतेन दूरं निःसार्य प्राणसंशयं गमितो रथादवप्लुत्य परमेश्वरं तुष्टाव। आशुतोषः स देवोऽपि तस्य स्तुत्या प्रसन्नः सपदि तत्राविर्बभूव। आविर्भवंश्च स संभ्रान्तं तमाश्वासयन्नाह— 'अश्वत्थामन्, प्रीतोऽस्मि। तद्गृहाणेमं खड्गम्। अनेन निगृहाण सर्वांस्तव विमतान्। पूर्वं तु वासुदेवाराधितेन मयैव त्वं शिबिराद्बहिरपवाहितोऽसि। तदलं साध्वसेन। अस्यां रात्रौ यं यमस्य खड्गस्य गोचरं गमयसि स यमस्य गोचरं गमिष्यति' इति तस्मै तं खड्गं ददौ, विदधौ च तस्यान्तरात्मन्यात्मनानुप्रवेशम्।

तदनु दुष्प्रेक्षतराकारः सोऽश्वत्थामा बहिरपसरतो मारयितुं तौ कृपकृतवर्माणौ द्वारि नियुज्य स्वयमन्तः प्रविशन् धृष्टद्युम्नशिखण्डी द्रौपदेयान् पञ्च, अन्यांश्च मात्स्यकेकयादीनसिधारानले चरुपुरोडाशवन्मुहूर्ततो जुहवांबभूव। ततश्च काकुमुखरे शिबिरे, समुद्भूते च सर्वतो हा हेत्याक्रन्दिते सर्वमेव तत्रत्यं जनं निहत्य तेनैव वेषेण दुर्योधनमासाद्य मुमूर्षवे तस्मै सर्वं स्वविक्रमविलसितमाचष्ट। तेन कृतकृत्य इव मुदितः स पापः सपदि तानिव प्रियानसूनप्यहासीत्।

पाण्डवास्तु तन्नदीतीरे सुखसुप्ततया अज्ञातशिबिरवृत्तान्ताः प्रातस्तद्विदित्वा अननुभूतपूर्वमप्रतीकारदुरन्तं च विषादमवापुः । तावच्छ्रुतवृत्तान्ता याज्ञसेनी 'हा वत्सा' इति सत्वरमभिपतन्ती कथमपि दुर्वचां पुत्राणां भ्रातॄणां च तां दशां प्रत्यक्षीकृत्य सोरस्ताडं भुवि निपत्य विलुठन्ती विक्रोशन्ती पदे पदे मूर्च्छन्ती अश्मनोऽपि द्रावकैर्विलापैर्बहु विललाप। तत्रान्तरे भीममन्तिके वीक्ष्य सा प्रोवाच 'नाथ, यदि मां जीवन्तीमिच्छसि, तर्ह्याहर गुरुपुत्रव्यपदेशिनस्तस्य शिशुमारकस्य शिरोमणिम्' इति। तथेति तस्मिन् प्रस्थिते कृष्णो युधिष्ठिरमाह—'ननु राजन् , योऽयं सुप्तघाती स आघातुकः पुरा द्वारकामुपेत्य गुरुपुत्र इति मया सत्कृतो मद्गृहे वसन् कदाचिदेकान्ते 'ब्रह्मास्त्रविनिमयेन तावकं चक्रं मे देहि' इति मामयाचत। 'आदत्स्व यदि शक्नोषी'त्युक्त्वा मया भुवि न्यस्तं तच्चक्रं सहसा ग्रहीतुमुद्यतः स सर्वारम्भेणोभाभ्यां बाहुभ्यामपि चलयितुमपि न शशाक। तदा व्रीडामन्थरोत्साहः स 'मम ज्येष्ठेन पुत्रेण प्रद्युम्नेन प्रेष्ठेन सख्यार्जुनेन चाप्रार्थितपूर्वमेतच्चक्रं कस्य जिगीषया अयाचिष्ठाः' इति मया पृष्टः सन् 'तवैव' इति प्रत्युदीर्य गतः। एवं चपलोऽयं वटुः। इदानीमपि रुद्रमाराध्य तद्वरबलेनैवं रौद्रं कर्म कृतवान्। स यदि कदाचिद्ब्रह्मास्त्रं प्रयुञ्जीत तदा महाननर्थः स्यात् । तदस्माभिर्नोदासितव्यम्' इति वदन्युधिष्ठिरार्जुनाभ्यां सह तमनुदुद्राव ।

तदा भागीरथ्यास्तटे कृष्णद्वैपायनमुपासीनः स द्रौणिः समापततो भीमादीन्दृष्ट्वा शङ्कित इषीकायां ब्रह्मास्त्रमभिमन्त्र्य पाण्डवाभावाय प्रयुयुजे। तत्क्षणं तत्प्रतिघाताय कृष्णनुन्नेनार्जुनेन च ब्रह्मास्त्रे प्रयुक्ते

व्यासनारदौ ‘अलमलमेतत्प्रयोगेण। जगदन्तो मास्तु’ इत्युच्चैर्घोषेण तदन्तरे भूत्वा निषिषिधतुः। तद्गौरवेण संहृतास्त्रे पार्थे स्वमस्त्रमुपसंहर्तुमशक्नुवन्नश्वत्थामा उत्तराया गर्भमनेन स्रावयामीति वदंस्तथा संदधे। भगवांस्तु ‘कामं प्रयुङ्क्ष्वास्त्रम्। अहमौत्तरेयं संजीवयामि। पश्य मे योगवीर्यम्। उक्तपूर्वा च सा बाला केनचित्तपस्विना। यथा—‘परिक्षीणेषु कुरुषु तव पुत्रो जनिष्यते। तेनैव हेतुना स परीक्षिन्नाम्ना प्रख्यास्यते च’ इति। एवं नृशंसकर्मा त्वं तु विजने वने पूतिगन्धिरामयावी च सुचिरं विचरिष्यसि’ इति तं गुरुपुत्रं शशाप। व्यासेन चानूदिते तच्छापे विमनाः सोऽश्वत्थामा स्वं शिरोमणिं पार्थेऽर्पयित्वा तपसे वनं जगाम।

अथ प्रतिनिवृत्तेषु तेषु सर्वेषु, याज्ञसेन्या राज्ञः शिरसि निबद्धः स मणिः प्रासादनिहितो रत्नदीप इव सुतरामिन्धांचक्रे।

इति सौप्तिकपर्व।

धृतराष्ट्रस्तु नीतिसर्वस्वविदुरेण विदुरेण नयोपबृंहितैर्वाक्यैर्मुहुर्मुहुराश्वास्यमानोऽपि प्रचण्डवेगं तं पुत्रशोकावेगं धारयितुमशक्नुवन् गान्धारीं पुरस्कृत्य प्रस्थितैः सर्वैरन्तःपुरजनैः परिजनैश्च सह कुरुक्षेत्रं प्रययौ। तदागमनेन भीतो युधिष्ठिरः कृष्णं पुरस्कृत्य मन्दं मन्दं तत्समीपमेत्य 'तात' इति सन्नया गिरा प्रणनाम। नातिहर्षेण तमालिङ्ग्य विषीदन्स प्रज्ञाचक्षुः 'एष भीमोऽभिवादयते' इति कृष्णेन पुरो निहितामायसीं प्रतिमां 'वत्स समरशौण्डीर, एह्येहि' इति वदन्, तदालिङ्गनव्याजेन बाहुभ्यां दृढं निष्पीड्य चूर्णयामास। ध्वंसमानायां तु तस्यां सपदि प्रशान्तमन्यूत्पीडः स पश्चात्तापपीडितः—'हा तात भीम महाबाहो, क्रोधपरवशेन मया पापेनेमां गतिं गमितोऽसि' इति विचुक्रोश। तदवस्थं तं सान्त्वयन् कृष्णः प्राह—'राजन्, पुरा प्रवासितेषु पाण्डवेषु, भीमान्नित्यशङ्कितेन तद्वधार्थं गदायां शिक्षाविशेषप्रयत्नवता तव पुत्रेण दुर्योधनेन तद्वधार्थं या निर्मिताश्मसारमयी तत्प्रतिमा, साद्य त्वदाशयज्ञेन मया तव पुरो निहिता वज्रकायेन त्वया चूर्णिता च। तदलमनुतापेन। क्षमस्व च ममेममपराधम्' इति। सोऽपि तथेति समाहितो बभूव।

तत्रातिभूमिं गतेन शोकेन क्रोधेन च भीषणाकारां गान्धारीं प्रेक्ष्य शापभयेन तत्र तत्र प्रलीयमानेषु तेषु, सहसाविर्भवन् भगवान् बादरायणस्तामाश्वास्याबभाषे—'अयि महाव्रते कल्याणि, किमेवमतर्कितेनाभिषङ्गेणेव विप्रतिपद्यसे। निश्चितं खल्वेतत्पूर्वमेव यदा त्वस-

कृदुच्यमानमपि पथ्यं तवात्मजो नाश्रौषीत्। तत्किमिति स्वयं स्खलित्वा पुराद्य क्रुध्यसि। तदलमलं संरम्भेण' इति। सा तु 'भगवन्, सत्यमेव। न चाहमलघुनाप्यपराधेन कुप्येयम्। किंतु श्रान्त्या जले प्रसुप्तं बलादाकृष्य पश्यत एव वासुदेवस्य भीमो मम पुत्रमधर्मेणापातयत्। एतदेव मां दुःखाकरोति' इति यावत्प्रत्युत्त-रयति, तावत्तस्याः पादौ त्वरया गृह्णन्वृकोदरः 'अम्ब, धर्म्यमधर्म्यं वा क्षमस्व मम चेष्टितम्। अहमपि तव पुत्र एव। स्त्रीधर्मिण्याः स्त्रियः सदसि पराभवे सति ब्रूहि ततः किमन्यत्पुरुषस्य क्रोधस्थानम्? ननु धर्मज्ञे, दुःशासनेन सदसि गृहीतनीव्यां तव स्नुषायां कुत्र गत-मिदं धर्मानुशासनम्। कुतो वा तेष्वयं क्रोधो नोत्सृष्टः। अत्यु-त्कटो हि व्यतिक्रमः सद्यः फलितः। तस्माद्विरम' इति प्रत्याह।

अथ 'क्व मे कुलान्तक' इति प्रस्फुरिताधरोष्ठपुटमारसन्त्यां तस्यां, युधिष्ठिरः सरभसमुपसृत्य 'अम्ब, एषोऽस्मि कुलघ्नः पापीयान्। स्वैरं मां शपस्व' इति प्रणम्य साञ्जलिरग्रेऽतिष्ठत्। तदा तूष्णीं मुहुर्मुहुर्निःश्वसत्या बाष्पायमाणायास्तस्यास्तपस्विन्या आबन्धनपट्टान्त-रेण किंचिद्बहिः प्रसृतया चक्षुःप्रभया मनागिवालीढकरनखः स सद्य एव कुनखी संवृत्तः। अहो तपसो माहात्म्यम्। अर्जुनस्तु भयेन कृष्णस्य पृष्ठ एव निलीन उच्छ्वसितमपि नाकरोत्। अनन्तरं क्षणेन प्रशान्तक्रोधवेगा सा साध्वी भयविषादतरलितान् पाण्डवाना-श्वासयामास।

अत्रान्तरे तत्रागता कुन्ती चिरविप्रयुक्तान् पुत्रान्वीक्ष्य भृशमुत्क-ण्ठिता प्रोष्यागता धेनुरिव वत्सान्तिकं द्रुतमुपधावन्ती 'हा मे पुत्रका

इति तान् कण्ठे समाश्लिष्य चिरं रुरोद। तदन्तरे सा चिरदुर्वसतिक्षामां जलोद्धृतां मृणालिनीमिवातीव क्लान्तां पुत्रशोकविह्वलां द्रौपदीं दृष्ट्वा 'अयि महानुभावे पाञ्चालि, दुर्भगाया मम संबन्धेन तवापीयमवस्था' इति तामालिङ्ग्य मुक्तकण्ठं विललाप। गान्धार्यपि तदन्तिकमेत्य 'अयि महाव्रते याज्ञसेनि, कथं त्वमपि मर्कटाक्रान्ता वल्लरीव निर्मूलमुन्मूलितप्रसवा मम समवस्था कृतासि। ननु वत्से, पातिव्रत्ये ममापि त्वमाचार्या खलु। तवाप्यनया दशया मन्ये सतीनां व्यसनमवश्यंभावि। अत्युत्कटं हि दुःखमदुःखमेव। तत्कृतं परिदेवितेन' इति तां सान्त्वयामास।

तदनु युधि निहतं तत्र तत्र पतितं स्वजनवर्गमेकत्र प्रत्यक्षमिव व्यासप्रसादेन पश्यन्ती सा गान्धारी भृशमाकुलमतिः श्रोतॄणामपि हृदयद्रावकं करुणकरुणं चिरं बहु विललाप। तदन्तरे कृष्णं दृष्ट्वा क्रोधेन पराभूतविवेका सा निष्ठुरां गिरमुज्जगार—'अयि जनार्दन, स्वयं शमयितुं समर्थोऽपि त्वमेवान्तःप्रविश्यानलसारथिरिव वैरानलं प्रज्वलयन् अतिविस्तारिणीं मम वंशाटवीं निःशेषं भस्मीकृतवानसि। अयि क्षुरप्रहृदय, कथमन्धयोरावयोरवलम्बनार्थमेकां यष्टिमपि नावशेषयः। अहो तव निरनुक्रोशता। यथा तव साचिव्येन मम निकेतनं निःसंतानं निर्वीरवधूटीभूयिष्ठं च संवृत्तं, तथा तव सदनमपि विधवामात्रशेषं भवतु' इति। एवं शप्तवतीं तां भगवान् प्रत्याह-'अयि पुरोभागिनि, कथमात्मदोषमविगणय्य परत्रोपक्रोशमुखरासि। ननु निरपराधेष्वज्ञातपितृमुखेष्वनुकम्पनीयेषु पाण्डोः संतानेषु बाल्यतः

प्रभृति निष्कारणमभीक्ष्णशस्तव पुत्राणां द्रोहव्यवसायान् किं न जानीषे। ज्ञात्वा च किं तान्व्यनैषीः। बलात्कारिते च द्यूते 'जितं जितं' इति गर्जति तव भ्रातरि, 'किं जितं किं जितं' इति सकौतुकं युवयोः प्रश्नेन पदे पदे विषादाभिनयेन च विदितमेव सर्वैस्तृणावृत-कूपोपमं युवयोर्हृदयम्। उद्वृत्तं पुत्रमनुसरन्तौ पितरावेवान्ततस्तस्य मृत्युरित्यत्र युवामेव निदर्शनभूतौ। यश्चायं तव शापः स ममानुग्रह एव। तदलं वृथा वाग्विग्लपनेन'।

अथ युधिष्ठिरो मृतेषु प्रधानानां स्वयमेव प्रेतकृत्यं कृत्वा, शेषाणां च विदुरसंजयधौम्यैर्यथोचितं कारयित्वा जाह्नव्यां निवापविधिं निर्वर्त-यामास। अत्रान्तरे कुन्ती सोरस्ताडमुच्चैर्विचुक्रोश—' हा वत्स कर्ण, हा असहायशूर, हा वदान्याग्रेसर, हा जगदेकवीर, हा कारुण्यैकसार, हा मन्मथमन्मथ, मां विहाय क्व प्रस्थितोऽसि। जात, दिव्यकुण्डल-मण्डितमुखमण्डलमामुक्तदिव्यकवचमपरमादित्यमण्डलमिव राजमानं सर्वासेचनकं ते वपुरिदानीमपि मम पुरः स्फुरति। वत्स, सर्वात्मना त्वं दौर्भागिनेयोऽसि, यन्महाक्षत्रियं त्वां रथकार इति, वैकर्तनं त्वां सूतपुत्र इति चानभिजातमिव व्यवहर्तुं जननीत्वव्यपदेशिन्यहमेव हेतुरभूवम्। हा वत्स युधिष्ठिर, देहि ते ज्येष्ठभ्रात्रे वैकर्तनाय कर्णाय निवापाञ्जलिम्' इति। युधिष्ठिरस्तु नाराचेनेवान्तः प्रविशता तद्वचनेन विदीर्णकर्णः सुतरां प्रव्यथितः 'कथमहं पितृकल्पस्य ज्येष्ठस्य भ्रातुर्दिष्टान्तहेतुरभूवम्। पुत्रवत्सलयापि त्वया ममैव दौर्भाग्यविल-सितेन पूर्वं नावेदितमासीत्' इति विलपन्निरवरोधं प्रसृतेन बाष्पेण

कोष्णान् जलाञ्जलींस्तस्मै निरुप्य, सर्वैः समं प्रतिष्ठमानः कर्णपत्नीः प्रजावतीत्वप्रतिपत्त्या नितरामर्हयांचक्रे।

इति स्त्रीपर्व।

अथाशौचवत्तया नगराद्बहिरेव वसन् पाण्डवस्तत्रागतेन नारदेन 'युधिष्ठिर, दिष्ट्या निष्कण्टकं राज्यमवाप्तोऽसि' इत्यनुमोदितजयस्तं प्रत्यूचे—'भगवन्, बाढम्। कृष्णप्रसादेन भवादृशामाशिषा भीमार्जुनयोर्विक्रमेण च मया प्राप्तं राज्यम्। किं तु। कुलतन्तुभूतान् सौभद्रं द्रौपदेयांश्च विनाश्य लब्धोऽयं जयः कथमभिनन्द्योऽस्तु। किं चान्यत्। योऽयं राधेय इति प्रयत्नेनास्माभिः कथाशेषीकृतः सोऽद्य कौन्तेयो भवन्, गलितसापत्न्यमत्सरोऽपि विधान्तरेण पुनर्मम तापायैव संवृत्तः। कथमस्य राधेयस्य मम मातुश्च पादौ सच्छायाविति मम हृदि संजातं तर्कबीजमलब्धावापमेव चिरं सत्तामात्रेणावस्थाय, अथ सदसि धार्तराष्ट्रान् प्रत्युत्थितं क्रोधानलं शमयता रूक्षवादिनोऽप्यस्य दर्शनजलसेकेन किंचिदुद्भिन्नं सदधुना निवापोदकान्तरे सविशेषं प्रवृद्धमासीत्। यद्येतत्प्रागेवावेदिष्याम कथमेवं भ्रातृद्रोहपातकमगमिष्याम। ननु भगवन्, महानुभावस्य तस्य रथचक्रमापदि पृथिवी कथं जग्रसे। तन्मे व्याचक्ष्व'।

सोऽपि तथेति तमाह—'शृणु राजन्नजातशत्रो, योऽसौ कर्णः स द्रोणाद्धनुर्वेदमधीयानस्तव बुद्धिं, भीमस्य बलं, अर्जुनस्य लाघवं, माद्रेययोर्विनयं, कृष्णस्य पार्थे पक्षपातं चालक्ष्य स्वभावत एव युष्मासु बद्धवैरतया तत्सर्वमसहिष्णुः, दुर्योधनमाश्रित्यार्जुनजिगीषया रहसि द्रोणमयाचत—'आचार्य, पार्थेन सह योद्धुमाशंसे। ततो ब्रह्मास्त्रं मे देहि' इति। 'ननु भोः सूतपुत्र, ब्राह्मणेन, तपस्विना क्षत्रियेण वा

ग्राह्यमिति हि तस्यास्त्रस्य निर्बन्धः। अतः किं करोमि। अतीव पीडयति मां त्वदर्थसंपादनाक्षमता' इत्यर्जुनपक्षपातिना तेन व्याजेन प्रत्याख्याते, स तमामन्त्र्य जामदग्न्यं राममुपसद्य, 'ब्राह्मणो भार्गवो विद्यार्थी चास्मी'ति सप्रणामं निवेदयामास। तेन चानुज्ञातः श्रद्धया तं शुश्रूषमाणो नातिचिरेण कालेन ततः समीहितमस्त्रमाददे। अथ कदाचिद्वनेषु रथेन संचरमाणस्य तस्य रथनेमिधारायां कस्यचिदृषेर्गोवत्सोऽकस्मान्निपत्य व्यापद्यत। तेन व्याकुलं तं तत्स्वामी द्विजः 'अयि मदान्ध, मम होमधेनुं विवत्सितवतस्तव रथचक्रं भयंकरे संगरे पृथिवी ग्रसताम्' इति शापवार्युत्ससर्ज। तदनु तेत भृशं प्रसाद्यमानः स द्विजः किंचिदिव सानुक्रोशस्तमाह—'ननु भोः, न खलु मादृशानामुक्तिषु विपर्यासः। तस्मादवश्यं तव भाव्येवेदं व्यसनम्। किंतु अनेन शापफलेनैव गोहत्यायाः कृतप्रायश्चित्तो भूत्वा परलोकायाप्रतिबन्धः स्याः' इति। तेन नातिप्रीतो गुरुकुले वसन् कदाचित्स्वोत्सङ्गमुपधानीकृत्य निद्राणे मुनौ, केनचिद्द्रोणकीटेन निर्भिन्नोरुरपि गुरोः प्रस्वापभङ्गभयात्कथंचित्तितिक्षते स्म। सपद्येव सुखप्रबुद्धो मुनिस्तस्य सक्थिन रुधिरस्रुतिं, उद्धूयमानं रुधिराक्तमुखचरणं सूकरार्भकाकारमष्टपादं तं कीटं च समं ददर्श। तेन दृष्टमात्रश्च स कृमिरूपमुज्झित्वा, राक्षसो भवन् दिविष्ठः प्राञ्जलिर्जामदग्न्यमामन्त्र्याबभाषे--'भगवन् भार्गव, अहं दंशो नामासुरस्तव कुलगुरोर्भृगोर्दयितामपहरन् कुपितेन तेनेमां गतिं गमितोऽस्मि। ततः प्रसादितः स त्वद्दर्शनावधिकं तं शापं व्यवस्थापयामास। सोऽहमिदानीं तव तेजसा शापान्मुक्तोऽस्मि। अनुमन्यस्व मां' इति तमामन्त्र्य

गतः। गते तु तस्मिन् जामदग्न्यः कर्णं रुधिरस्रुतिहेतुं पृच्छंस्तेन कथिततत्त्वः क्रुद्धः प्रोवाच—'अयि वियात, न त्वं विप्रोऽसि। अधृष्टा हि सा जातिः। अतस्तत्त्वेनात्मानं ब्रूहि। कृतं गोपनेन' इति। अथ यथावत्तन्मुखाद्विदितवृत्तान्तः स शशाप 'रे रे चार, कथमात्मापहारेण मयि ब्रह्मचर्यमदधाः। उपसत्त्यनुरूपा हि सिद्धिः। अत आत्मतिरोधानेन गृहीतेयमस्त्रविद्या आवश्यकेऽवसरे स्वयमपि तिरोधत्ताम्' इति। एवं ब्राह्मणशापेन पृथिव्यां निमग्नमस्य रथचक्रम्। अत्यये च न प्रतिभाति स्म तद्ब्रह्मास्त्रम्। अधुना तत्पौरुषमपि किंचिच्छृणु।

'कलिङ्गेषु राजपुरनाम्नि नगरे चित्राङ्गदो नाम राजासीत्। तस्य गृहे जातुचित्स्वयंवरमहोत्सवे प्रवृत्ते, नानादिग्भ्य आगता राजानः कालिङ्गेन सम्यक्पूजिताः सन्तो वरार्हेषु मञ्चेष्वासांबभूवुः। अथ वरणस्रजा तां सभां प्रविष्टा श्रीरिव रूपिणी सा कन्या आत्मनोऽनुरूपं सर्वानवद्याङ्गं भर्तारं निभालयन्ती, तत्रालब्धचक्षुर्निर्वाणा ततस्ततोऽन्यमन्यमतिचक्राम। दुर्योधनस्तु तेनैव क्रमेणात्मानमप्यतियन्तीं तां सुन्दरीं हठादपहृत्य स्वं रथं निनाय। ततः क्रोधेन सर्वतः समुत्थितेषु संनद्धेषु च राजसु समुद्भूते च तन्निमित्तं महति संगरे, कर्णः स्वयमेकरथ एव सर्वांस्तानभिदुद्राव। विद्रावयामास च मुहूर्तेन सर्वान् परवीरान् सर्वतोदिशम्। जरासंधस्तु तद्विक्रमेण मुदितस्तस्मै मालिनीं नाम पुरीं पारितोषिकं ददौ। अर्जुनसंघर्षतुष्टाद्दुर्योधनाच्चम्पा नाम पुरी पूर्णपात्रतया कर्णेनाहृतेति त्वयापि विदितपूर्वमेतत्।

किं च। अहो तस्यौदार्यम्, यत्सहजान्यपि कवचकुण्डलानि प्रत्यर्थिने याचमानायेन्द्राय पित्रा निषिद्धोऽपि जानन्नेवानासङ्गेन प्रायच्छत्। एवं ब्राह्मणशाप इति गुरुशाप इति कुन्तीवर इति शक्रमायेति भीष्मावमान इति शल्यतेजोवध इति कृष्णोपाय इति पार्थदिव्यास्त्रमिति च बहूनि निमित्तानि खलेकपोतन्यायेन कर्णस्य निपातने समवयन्ति स्म। भवितव्यानुरूपं हि सर्वं निमित्तनैमित्तिकभावेन गुणाय दोषाय वा संपद्यते। तदलमत्र शोकेन।'

तदनु दीर्घमुष्णं च निश्वस्य रुदन्तं युधिष्ठिरं कुन्ती साश्वासमाह—'वत्स युधिष्ठिर, कृतं तस्य दुरात्मनो वध्यस्य कृते व्यसनेन। यन्मया तत्पित्रा विकर्तनेन च युष्मत्पक्षस्वीकरणाय वारं वारं प्रोच्यमानमपि पथ्यं दुराग्रहेण न जग्राह। न हि हिततममप्याप्तवाक्यं मुमूर्षूणां कर्णपथमवतरति। तदलं तत्र पश्चात्तापेन।' तदाकर्ण्य युधिष्ठिरः क्रोधशोकपराभूतो मातरमाह—'अयि, जात्योऽपि मे ज्येष्ठो भ्राता अकुलीनत्वविमाननयान्तःसंतप्तो ममार। अहं तु तद्द्रोहेण नित्यसंतप्तो जीवन्नपि मृतकोपमः संवृत्तोऽस्मि। तदेतत्सर्वं तव गूढमन्त्रस्य फलं हि। तस्मादितः परं स्त्रियः कथमपि रहस्यं न धारयन्तु' इति शशाप।

अथ स्वजनवधेन निर्विण्णो निरुत्साहः पाण्डवः कृष्णेन कृष्णद्वैपायनेन भीमादिभिरनुजैश्च बह्वीभिरुपपत्तिभिः सान्त्वितो धृतराष्ट्रं पुरस्कृत्य हतशेषैः क्षत्रियैः परिवृतः स्वां राजधानीं हस्तिनां प्रविवेश। प्रविशंश्च स तत्र तत्र नागरैर्नानामङ्गलोपचारैरुपचरितः सर्वैः समं

राजसभामलंचकार। तत्र समवेतैर्बहुभिर्ब्राह्मणादिभिर्गोष्ठीं कुर्वाणे तस्मिन्, लब्धान्तरः कश्चिद्युधिष्ठिरमामन्त्र्याह—'भोः पाण्डव, एते हि ब्राह्मणाः गुरुद्रोहिणो ज्ञातिकुलघातुकस्य किमस्य भाषणेनेति त्वां प्रति मिथः संलपन्ति' इति। तत्क्षणमपत्रपया अवाङ्मुखे राजनि, भृशं व्यथिता ब्राह्मणा हस्तमुद्यम्योच्चैरूचुः—'ननु भो धर्ममूर्ते धर्मसंभव, पृथग्जनेष्वपि कश्चन त्वयि दोषदृष्टिर्न स्यात्। किं पुनर्वयम्। दवीयस्यरण्ये वर्तमानेऽपि त्वयि कृतसौहृदा वयं चिरकाङ्क्षितं तव राजभावं प्राप्य कथं विषमोपन्यासपराः स्याम। तदलमस्मास्वन्यथा ग्रहणेन। अयं तु दुर्योधनसखश्चार्वाको नाम राक्षसो यथाशक्ति स्वमित्रस्य धार्तराष्ट्रस्य प्रियं चिकीर्षुस्तापसवेषेणैवमसंबद्धं प्रलपति' इत्याख्याय हुङ्कारेण तं भस्मसाच्चक्रुः। अथ तेषु ब्राह्मणेषु यथार्हं संमान्य विमुक्तेषु, 'पूर्वं ब्राह्मणावमानादन्यत्रात्मनोऽवध्यत्वं वरं ब्रह्मणो लब्ध्वा लोकोपद्रवायोत्थितोऽयं राक्षसश्चार्वाको दिष्ट्याद्य विनष्टः' इति कृष्णेन निवेदिततत्त्वोऽजातशत्रुस्तद्वधदुःखमजहात्।

अथ भगवान्वासुदेवो व्यासादिभिर्धृतराष्ट्रेण च सहितस्तं सम्राजं युधिष्ठिरं राज्येऽभ्यषिञ्चत्। तेन प्रमोदभरितेषु पौरेषु, स राजा यौवराज्ये भीममभिषिच्य, दुष्टनिग्रहेऽर्जुनं, बलाध्यक्ष्ये नकुलं, साचिव्ये विदुरं, आयव्ययपरिज्ञाने युयुत्सुं च नियुज्य, सहदेवं सदा पार्श्ववर्तिनं च चकार। अथ धृतराष्ट्रानुमतस्य राज्ञः शासनेन दुर्योधनदुःशासनदुर्धर्षदुर्मुखानां गृहाणि भीमादयश्चत्वारोऽपि यथाक्रमं भेजिरे। कुरुवंशपुरोधाः सुशर्मा धौम्येन सहितः पौरोहित्यं कृतवान्।

अथ कृष्णेन नुन्नो राजा सर्वैर्बन्धुवर्गैः समं शरतल्पस्थमुत्तरायणप्रतीक्षं भीष्ममासाद्य प्रणमंस्ततो धर्मान् शुश्रूषुरपि तस्मिन् कृतकिल्बिषतया स्वयं लज्जितः कृष्णं चोदयामास। स तु 'ननु भोः, धर्मनिधे शान्तनव, सर्वोऽपि लोकः प्राप्तेऽवसरे रिक्थं दायादेभ्यो यथार्हं विभज्य खलु विरमति। अतस्तव धर्मज्ञानरूपं सर्वस्वमप्यादित्सतितेऽर्हत्तमः पौत्रः पाण्डवः। वयमपि तमेव मुखं कृत्वा त्वत्तः सर्वं श्रोतुकामाः स्मः' इति तस्मै न्यवेदयत्। भीष्मस्तु तच्छ्रुत्वा विहस्य प्रत्याह—'भगवन्, तदिदमादित्यस्य दीपनीराजनं हि यत्कृष्णस्य संनिधौ गाङ्गेयप्रवचनम्। अथवा ज्ञातं तव हृदयम्, भीष्मः प्रवक्ता कृष्णः श्रोतेति मम गौरवार्पणाय तवायमारम्भः। तस्मादवश्यं प्रवचनीयोऽस्मि। कामं पृच्छत्वयं धर्मसुतः। यथामति सर्वं व्याख्यास्यामि' इति।

तदनु व्यासादिषु सर्वेषु श्रोतृषु शान्तनवो राज्ञा युधिष्ठिरेण पृष्टान् राजधर्मान्, आपद्धर्मान्, वर्णाश्रमधर्मान्, मोक्षधर्मान्, सांख्ययोगविभागान्, आख्यानाख्यायिकेतिहासोदाहरणप्रत्युदाहरणैर्देशकालवयोऽवस्थाधिकारानुरूपमनुष्ठेयान्विविच्य व्याचचक्षे।

इति शान्तिपर्व।

---

# अनुशासनपर्व ।

पुनश्च दानधर्मादिमाहात्म्यप्रपञ्चनव्यपदेशेन ज्ञातिवधजनितां युधिष्ठिरस्याशङ्कां प्रणुदन् भीष्मो व्यासमतमनुसरन् पुनरपि तमूचे—'वत्स अजातशत्रो, प्रजापालनं हि राज्ञां धर्मः। अतस्तमनुतिष्ठन्, क्रतुराजेनाश्वमेधेनेष्ट्वापहतपाप्मा भविष्यसि। प्राप्ते तूत्तरायणे मां पुनः पश्येः। तत्साधय' इति। तथेति तमभिवाद्य परिवारपरिवृतो हास्तिनमुपगत्य स पाण्डवो नित्यमेधमानप्रजानुरागोऽपि, सर्वत्रास्खलितशासनोऽपि पुण्यकीर्तिरपि स्वजनक्षयशोककीलितात्मा नातिप्रीत एव राज्यं चकार। अथोदीचीं प्रति प्रत्यावृत्तेषु सप्तसप्तेः सप्तिषु स सर्वैः सह कुरुक्षेत्रमेत्य शरतल्पस्थं पितामहं प्रणम्य विज्ञापयामास—'एषोऽस्मि युधिष्ठिरः। आगतश्च स कालः। मां शाधि किमनुतिष्ठेयम्' इति। स च प्रसन्नात्मा तमभिनन्द्य बभाषे—'साधु वत्स, साधु। अद्य खलु माघो मासः शुक्लः पक्षश्च भवति। मम वचसि स्थितोऽसि। भद्र, सिध्यन्तु ते सर्वाः सिद्धयः। अतीतानि ह्यष्टपञ्चाशतमहानीदमवस्थस्य मम। मम पितुर्वरबलेन हि ध्रियन्ते कृच्छ्रगताः प्राणाः। तदनुमन्यस्व मामिदं मर्त्यनीडं जिहासुम्' इति तमुक्त्वा धृतराष्ट्रमाह—'राजन्वैचित्रवीर्य, बहुश्रुतस्य समुपासितवृद्धस्य च तव न खलु बहु वक्तव्यम्। सहजेन दौर्जन्येन सर्वं नाशयित्वा, स्वयं जीवनाशं नष्टमात्मजमामयमिव विस्मृत्य, त्वयि वत्सलेन वत्सेनाजातशत्रुणाराधितोऽल्पावशेषमायुर्गमय। मा वृथा व्यसने मनः कृथाः' इति तमाश्वास्य कृष्णं प्राञ्जलिरयाचत—'भगवन्।

पुण्डरीकाक्ष, दिष्ट्या मयि कृपया अधुना मम गोचरोऽसि । क्षणमात्रमेवमेव तिष्ठ, यावदहं त्वां ध्यानेन हृद्यवस्थाप्योत्क्रामामि' इति । 'अप्रतिबन्धो वसुपदं याहि!' इति तेनानुज्ञातः स गाङ्गेयः 'वत्स, सत्यधर्माभ्यां मा प्रमदः । वृद्धावन्धौ पुत्रशोकसंतप्तौ च पितरौ सम्यक्पालय' इत्यभिधाय, आधाय प्राणादिकलापं भ्रूमध्ये, निधाय परंज्योतिः स्वरूपं वस्तु स्वान्ते, निध्याय च क्षणं, सपदि मूर्धन्यया सुषुम्नाख्यया नाड्या तेजोरूपः समुत्थाय पश्यतामेव सर्वेषां क्षणाददृश्यो भूत्वा स्वं वासवं पदं प्रपेदे ।

राजा तु विस्मयेन विषादेन च कलिलो भूत्वा कुणपतां गतं तं कौणपदन्तं विधिना संस्कृत्य भागीरथ्यां सर्वैः समं तस्य निवापमकरोत् । स्वपुत्रस्य शिखण्डिना वधमननुरूपं मत्वा मानुष्या तन्वा जलादुत्थाय विषीदन्तीं गङ्गां 'नायं शिखण्डिना हतः । किं तु पार्थेनैव । तच्च तच्छन्देनैव । मा विषीद' इति भगवानाश्वासयामास ।

इत्यनुशासनपर्व ।

# अश्वमेधपर्व ।

अथ तस्यास्तटे पितामहकल्पस्य स्वपितामहस्य विरहेण विषीदन्तं राजानमाश्वासयन् व्यासोऽश्वमेधोपक्रमाय तं संदिदेश। बहुद्रव्यसाध्यत्वात्तत्क्रतोः, आत्मनो निःस्वत्वात् , अयुक्तत्वाच्च दुर्योधनेनासकृद्दुग्धदोहं बालवृद्धावशेषं सार्द्रव्रणं च राजकुलमुपरोद्धुं, कुण्ठिताशयः स पाण्डवो हिमवतः पार्श्वे मुञ्जवन्नाम्नि शैले राज्ञो मरुत्तस्य यागेऽवशेषितस्य प्रभूतस्य द्रव्यस्याहरणाय तेनैव मुनिना कृतोपायस्तथा निश्चित्य पुरमाजगाम। अथ कृष्णे द्वारकां प्रयाते, व्यतीतेषु च गणरात्रेषु राजा युयुत्सुं पुरगुप्त्यै नियुज्य, सर्वैः परिजनैः समं मरुत्तयजनमहीधरमहीं जिहीते स्म ।

कृष्णस्तु सौभद्रव्यापत्त्या दुःखितान् स्वानाश्वास्य, क्रमेण तेषु शान्तशोकवेगेषु, कुरुपतेः क्रतुसंपत्तये पुनर्हस्तिनामेत्य, यावद्राजगृहं प्रविशति, तावदन्तःपुरेऽत्युच्चैस्तरां प्रवृद्धं रोदनध्वनिमाकर्ण्य 'किं किं'मिति सरभसमभिदुद्राव। तद्दर्शनेनैव प्रवृद्धमन्यूत्पीडाः पृथादयः स्त्रियः 'उद्धरोद्धर कुरुकुलं महति निरयार्णवे निमज्ज'दिति विक्रोशन्त्यस्तं परितः परिवव्रुः। मा भैष्टेति ता निवार्य भगवान् मृतजातमुत्तरागर्भं विलोक्य तं शिशुं करे गृह्णन्निमां गिरं संगिरते स्म— 'यद्यहं धर्मात्मा सत्यपरो ब्रह्मण्यश्च, तदा जीवत्वयमर्भकः' इति। सपदि तच्छरीरान्निर्गत्य ब्रह्माणमुपतस्थुषि तस्मिन् ब्रह्मास्त्रे, रुदन्विचेष्टमानः स बालकः सर्वेषां शोकापनुदो बभूव। 'परिक्षीणेषु कुरुषु

जातत्वादयं परिक्षिन्नामास्तु' इति भगवतैव कृतनामा सोऽर्भकः शुक्लपक्षशशिवद्ववृधे ।

मासजाते तु तस्मिन्नौत्तरेये, मेरोः पादमिव प्रभूतं सुवर्णराशिमादाय पुरं विशन् स पार्थिवस्तमन्तःपुरोदन्तमाज्ञाय प्रमनाः कृष्णमाबभाषे—'भगवन्, क्षेमार्थिनो मनीषिणो यं योगेनान्विच्छन्ति, सोऽस्माकमेवं योगक्षेमधुरन्धरोऽसि यदि, ततः किं ब्रूतामयम्। न खल्वहं जानामि वाचापि भवन्तं सभाजयितुम्। अनुगृहाणेमं दासजनम्' इति। अनन्तरं व्याससंदेशेन संभृतक्रतुसंभारः स नृपः पृथिवीपर्यटनायाश्वमेधीयमश्वं मुञ्चन्, तद्गोपनाय पार्थं प्रजिघाय।

सर्वत्रास्खलितगतिं तं ययुं रुन्धतः पूर्ववैरिणस्त्रिगर्तान् विद्राव्य, सैन्धवभटांश्चार्दयन्नर्जुनः सपदि तोकं पुरो निपात्य रुदत्या दुःशलया ययाचे—'भ्रातः, तवेव ममाप्ययमेकः कुलतन्तुः पौत्रोऽवशिष्यते। अस्य पिता सुरथस्तु तवाभिगमनश्रवणेन व्याघूर्णमानः स्वपितुर्जयद्रथस्य पदवीं गतः। तद्रक्ष शरणं प्रपन्नमिमं तव भागिनेयस्य पुत्रम्' इति। सपदि प्रसृताश्रुः स तां स्वसारमाश्वास्य, ततो बहून्विषयानतीत्य मणिपूरकपुरमाससाद। तदीशो बभ्रुवाहनस्तु पितरमायान्तमवेत्य सविनयमुपगच्छन् 'अयि वीरसमयेनोपस्थिते नायं समुदाचारः क्षत्रियस्य, विशेषतो मत्पुत्रस्य तव' इत्यधिक्षिप्तो विमुखः परावृत्ते। प्रववृते च क्षणेन भुवं निर्भिद्य रसातलादुत्पतन्त्या पार्थभार्ययोलूप्या स्वसंबन्धकथनपूर्वकं प्रोत्साहितः पित्रा सह योद्धुम्। प्रवर्धमाने च संगरे पितापुत्रावुभावपि मिथो व्यतिहत्य भुवि न्यपतताम्। विदित-

वृत्तान्ता बभ्रुवाहनमाता चित्राङ्गदा तत्रागत्य 'अयि, एवं मम पत्यपत्ये निपात्य किमात्मनः फलमवाप्नोः' इत्युलूपीमुपालभ्य, स्वभर्तुरन्तिके स्वयमपि भुवि शिश्ये। अथ क्षणादपेतमूर्च्छेऽपि तथाविधया पित्रोर्दशया पुनरुपेतमोहे बभ्रुवाहने, सा नागकन्योलूपी स्मृतिमात्रोपस्थितेन संजीवनाख्येन नागरत्नेन पार्थं संजीवयामास।

अथ सुप्तोत्थित इव सुखमुत्तिष्ठन् स स्वभार्ये उलूपीचित्राङ्गदे सविधे विलोक्य 'वत्स, किमिदमसमीचीनं तव मात्रोर्वैयात्यम्। लज्जावगुण्ठना हि स्त्रियः। न खल्वव्यापन्ने भर्तरि तासामेवं स्वैरगतिः सतीपद्धतिः' इति पुत्रमुवाच। सर्वं मे माता नागकन्या प्रतिवक्ष्यतीति तस्मिन्विरमति, तयोलूप्या पार्थो न्यवेदि 'नाथ, श्रूयताम्। पुरा पुरस्कृतशिखण्डिना त्वया भीष्मे भुवि निपातिते तत्तवाधर्म्यं चेष्टितमक्षाम्यन्तो युद्धदर्शनार्थमागता दिविष्ठा वसवः 'अयमायोधने पराभूयताम्' इति त्वां शपन्ति स्म। तदवसरे तत्रस्थया तच्छ्रुत्वा विषण्णया मया नुन्नेन मम पित्रा प्रसादितास्ते 'सकृत्स्वपुत्रात्तस्य पराजयोऽस्तु' इति शापान्तमूचुः। अतो वत्सेन त्वं पातितोऽनेन रत्नेन पुनरुज्जीवितश्चासि। एतदर्थमेव ममागमनम्। चित्राङ्गदा तु तव व्यापत्त्या व्याकुला स्वयमपि जीविते निराशा प्रायमास्थिता। अतः क्षम्यतामावयोस्त्वद्भक्तिप्रवर्तितं साहसम्' इति।

स तु तुष्टः पुत्रमालिङ्ग्य 'वत्स बभ्रुवाहन, अवश्यमाभ्यां तव मातृभ्यां सह त्वयागत्य प्रवर्तिष्यमाणोऽश्वमेधो द्रष्टव्यः' इत्युक्त्वा विषयान्तरं गतः। अवशिष्टान्देशांश्च गोचरीकुर्वन् सोऽर्जुनः पितृ-

वधामर्षेणापतितान् शकुनिपुत्रान् सुदूरं निःसार्य, अस्खलितगतिना ययुना सह पुनः स्वपुरं प्रविवेश। अथारब्धे तस्मिन् महाक्रतौ, सर्वं विधिवदनुतिष्ठन् स यायजूको राजा समुद्रमेखलां वसुधां चतुर्धा विभज्य होत्रादिभ्यश्चतुर्भ्य ऋत्विग्भ्यो दक्षिणीकृत्य वनाय प्रतिष्ठमानः सभ्रातृभार्यस्तान् प्रदक्षिणीचकार। तेन विस्मितेषु लोकेषु, भगवान् बादरायणो युधिष्ठिरमाह—'राजन्, सदृशमेवेदं भवताम्। यत्सर्वस्वमर्थिसात्कृत्य स्वयं निःस्वतयाप्यवस्थानम्। निर्व्याजेन तवानेन विश्राणनेन तव पूर्वे राजानो नहुषययातिभरतादयोऽपि लाघवं गमिताः। त्वमेवार्हः पृथिवीं शासितुम्। अतो यत्किंचिन्मूल्यं प्रदाय शाधि सर्वां पृथिवीम्। पार्थिवोऽसि' इति। अथ कथंचित्तदभ्युपगतवता तेन राज्ञा भारसंख्यया वितीर्णासु दक्षिणासु, तदर्धं विभजन् स मुनिः स्वमंशं स्नुषायै कुन्त्यै प्रीतिदायं प्रददौ। कृतावभृथः स राजा पुनरपि तस्मै क्रतवे दीक्षां चकार। एवमाहृताश्वमेधत्रयः स सार्वभौमः पञ्चमो लोकपाल इव चकासामास।

इत्यश्वमेधपर्व।

अथ तस्मिन् राजनि पृथिवीं शासति, प्रजानां स्वत एव धर्मे रतिः, सूनृते मतिः, आनृशंस्ये प्रीतिश्च समजायत । सोऽपि प्रतीक्ष्येषु प्रशमेन, गुरुषु प्रश्रयेण, अर्थिषु दानेन, दुःखिषु साम्ना, भृत्येषु मानेन, विपस्तिषु प्रतीकारेण च सर्वेषां हृदयमावर्जयन्, सत्येन शौचेन दमेन दयया दाक्षिण्येन धर्मेणानालस्येनाप्रमादेनानुपेक्षया च जगतीं पालयामास । लालयामास च तावन्धौ पितरौ यथा तयोर्मनसि पुत्रशोकः कथमपि नान्तरमुपेयाय ।

कदाचिद्धृतराष्ट्रस्य तांस्तान् व्यापादोद्यमाननुस्मरन्नत्यमर्षणो भीमः सदसि शृण्वतोरेव तयोरन्धयोर्हस्तमास्फाल्य जगर्ज—'भोः सदस्याः, पश्यत पश्यत धृतराष्ट्रकुलतिलनिष्पीडनयन्त्रभूतौ ममेमौ बाहू' इति । तेन वाक्येन निर्विण्णो धृतराष्ट्रो युधिष्ठिरमाहूय बभाषे —'वत्स, त्वयाहं पुत्रवतां धुरमधिरूढोऽस्मि । इमाः पञ्चदश शरदः पितृनिर्विशेषं पोषितौ स्वः । अद्य तपसि समुत्सुकं मे मनः । धर्मश्चायं जरतां राज्ञाम् । तन्ममेमं मनोरथं न विहन्तुमर्हसि' इति । तेन दुःखिते तस्मिन् व्यासेन कथञ्चिदभ्युपगमिते परेद्यवि वनं प्रविविक्षुर्धृतराष्ट्रः पुत्राणां श्राद्धाय धनार्थी सन् विदुरं पाण्डवान्तिकं प्रजिघाय । श्रुतार्थः स राजा 'कामं गृह्यताम्' इत्याह ।

तदननुवादिषु चार्जुनादिषु भ्रातृषु प्रत्याचक्षाणं वृकोदरं सान्त्वयन् स तदपेक्षाधिकं धनं सादरं धृतराष्ट्राय प्राहिणोत् । तेन

पुत्राणां सभार्यस्यात्मनश्च पारलौकिकं विधाय विदुरसंजयाभ्यां सह सभार्ये वनाय प्रस्थिते धृतराष्ट्रे,ताननुव्रजन्ती कुन्ती पुत्रैर्निषिद्धापि श्वशुरकल्पयोरन्धदम्पत्योः शुश्रूषापरमा सती गान्धार्या अवलम्बनयष्टिर्बभूव ।

तदन्वात्मनापञ्चमः क्रमेण कुरुक्षेत्रं प्राप्य शतयूपस्य राजर्षेराश्रमे कृतप्रतिश्रयः स कुरुवृद्धो यदृच्छयागतान्नारदात् 'वर्षत्रयादूर्ध्वं त्यक्तकलेवरस्यात्मनः कुबेरलोकप्राप्तिं, विदुरस्य युधिष्ठिरात्मन्यनुप्रवेशं च विदाञ्चकार । अथ कदाचित्तान्द्रष्टुमागतः पाण्डवस्त्वगस्थिमात्रशेषांस्तानवलोक्यातीव दुःखितो भूत्वा, तत्र विदुरमपश्यंस्तं पितरमप्राक्षीत् । 'भद्र, स महातपाः दृश्योऽदृश्यश्च तपस्यति' इति तेन प्रत्युदीरिते, 'अयमसौ दृश्यते' इति जनेषु तं निर्दिशत्सु तया दिशा तूष्णीं प्रधावमानो राजा तमनुदुद्राव । तद्दर्शनेनैव पलायमानो विदुर 'अयमस्मि युधिष्ठिरः' इत्यनुद्रवन्तं प्रत्यासन्नं तं धर्मपुत्रं विजने वृक्षस्थः स्तब्धात्मा निरीक्षमाणो योगबलेन लिङ्गशरीरं प्रवृह्य तेन तच्छरीरमाविवेश । सपदि तद्बलेन चाध्मातः स पाण्डवो निर्व्यापारमचेतनीभूतं तत्कलेवरं संस्कर्तुमभिधावन् 'ब्रह्मसंस्थां गतस्य यतिधर्मणोऽस्य किमनया क्रियया' इत्यशरीरगिरा निषिद्ध आश्रममेत्य पित्रे सर्वं न्यवेदयत् ।

अत्रान्तरे स्वयमागतो व्यासस्तैः सभाजितो धृतराष्ट्राय व्याचचक्षे—'माण्डव्यशापेन धर्मराजो विदुरः संजातः । अयं युधिष्ठिरोऽपि तस्यैव धर्मराजस्यांश एव । अतः स विदुरः स्वतनुं विहाय युधिष्ठिरात्मनैकात्म्यमवाप । तत्तिष्ठतु । पुत्रशोकेन सुचिरं

विषीदतां युष्माकं दुःखशान्त्यै मृतान् सर्वानत्रानयामि। पश्यत मे तपोबलम्' इत्युक्त्वा तैः सह भागीरथीतीरं प्राप्य प्रेतांस्तानाकारयामास। तत्क्षणं युधि निहताः कर्णदुर्योधनादयः सर्वेऽपि महता कोलाहलेन तस्मात्स्रोतसः समुत्थाय सपदि विस्मितान् स्वानभिगम्य तैः सह मुक्तवैरास्तां रात्रिं निर्वव्रुः। व्युष्टायां तु रजन्यां यथागतं गतेषु तेषु, पुनरपि व्यासः प्राह—'या याः स्त्रियः पतिलोककामास्ता अत्र स्रोतसि निमज्ज्य स्वैरं पतिलोकं यान्तु' इति। तथा तास्तत्रावगाह्य दिव्यं शरीरं प्राप्य पतिसालोक्यमीयुः। अथ पाण्डवान्नगराय निवर्त्य तैस्त्रिभिः सह गङ्गाद्वारे तपस्यन् धृतराष्ट्रस्तत्र दावाग्निना परीतो गान्धारीकुन्तीभ्यां सह तत्रैव तनुं जुहाव। संजयस्तु कथंचिन्मुक्तो हिमालयं तपसे ययौ। युधिष्ठिरस्तु नारदाद्धृतराष्ट्रादीनां निष्ठामवगत्य तेषामौर्ध्वदैहिकं विधाय भ्रातृभिः सह पुरमाजगाम।

इत्याश्रमवासपर्व।

—

# मौसलपर्व ।

अथ प्राप्ते तु षट्त्रिंशे वर्षे यदवः कालेन दुर्विनीता भूत्वा कार्ष्णिं साम्बं स्त्रीवेषेणालंकृत्य यदृच्छया तत्रागतानां नारदादीनां मुनीनां पुरो नीत्वा 'भगवन्तः! एषान्तर्वत्नी 'किं प्रसोष्ये' इति युष्मान्पृच्छती'ति विप्रलम्भकगिरा विनीतवदुपतस्थिरे। ते तु तेषां दुर्विनीततां गान्धार्याः शापं भगवतो भावं च विमृश्य 'युष्माकं कुलक्षयकरं मुसलं प्रसोष्यते' इति प्रत्युदीर्य गताः। तत्क्षणं तदुदरात्पतितमायसं मुसलं दृष्ट्वा भीतास्ते कुमाराः सहसा कृष्णे तन्निवेद्य तदादेशेन तन्मुसलं चूर्णयित्वा समुद्रे प्रास्यन्ति स्म। तस्य त्वेकः खण्डो मत्स्येन निगीर्णो जालाहृतस्य तस्योदरे जराख्येन व्याधेन लब्धः स्वशल्यस्याग्रेण संयोजितः। तानि चूर्णानि तु तरङ्गैर्वेलां प्रापितानि भवितव्यताबलेन प्रभासस्य नातिदूरे एरकात्मनोद्भूय सहसा बहुशो ववृधिरे।

अथ कदाचिदाध्यात्मिकादीनि बहून्यनिमित्तानि दृष्ट्वा तपसे द्वारकाया हिमवन्तं प्रयात उद्धवे, तीर्थयात्रया प्रभासं प्राप्ता वृष्णय स्तत्रासवमासेवमानास्तेनोन्मदिष्णवो भूत्वा, अरुन्तुदैः पुरावृत्तपरीवादैरन्योन्यमधिचिक्षिपुः। तत्र प्रथमं सात्यकिर्हार्दिक्यमामन्त्र्य सावज्ञमुपहसन्नाह—'रे रे कृतवर्मन्! अतीते भारतयुद्धे त्वया सम्यग्विक्रान्तम्। यन्निद्राणान् शिशूनुलूकवृत्त्या न्यवधीः। अयि क्षुद्रबुद्धे! कथं निर्लज्जो वीराग्रेसरस्य मम पुरोऽवस्थितोऽसि। अपेहि रे असभ्य! अपेहि' इति। तदाकर्ण्य कुपितः कृतवर्मा प्रत्याह—' साधु रे शैनेय,

साधु। भूरिश्रवसो वध आत्मन ओजायितं कथं विस्मृतवानसि। एवं विगीताचारस्त्वं दैवबलेन तद्गात्रावसद्गोचराद्भ्रष्टोऽसि। दिष्ट्येदानीं स्मारितोऽसि त्वयैव। तदेह्येहि मन्दात्मन्युयुधान ! त्वामद्य निहत्य भूरिश्रवसोऽनृणो भवामि। अथवा न केवलं त्वमेक एव, अपि तु सर्वेऽपि पाण्डवपक्ष्याश्च वध्या एव। यैर्हि भीष्मद्रोणकर्णदुर्योधना अधर्मेणैव पातिताः' इति। तत्प्रसङ्गेन कलहायमानास्ते सर्वे यादवा वज्रशाताभिस्ताभिरेरकाभिः परस्परं निहत्य युगपत्प्रलयमीयुः। शेषांशभूतो बलरामस्तु स्वयं समाधिना मानुषं रूपं हित्वा, सहस्रफणामण्डलमण्डितं स्वं रूपं प्रपद्य नागलोकवासिभिराभिष्टुतो रसातलं विवेश।

भगवान् पुनः स्वकुलस्य स्थितिं ज्येष्ठस्य गतिं भूभारस्य हृतिं च विमृश्य, स्वयं चेमं लोकं जिहासुः पित्रे करणीयं निवेद्य, कस्यचिदश्वत्थपादपस्य मूले निषसाद। तत्र मृगयार्थं यदृच्छयागतो जराख्यो व्याधस्तं दूरतः पश्यन्मृगबुद्ध्या शरस्य शरव्यं चक्रे। तदेव व्यपदिश्य स देवतासार्वभौमस्तां मानुषीं तनुमुज्झित्वा ज्योतिर्मयं स्वं वैष्णवं रूपं प्रपद्य, दुन्दुभिघोषेण पुष्पवर्षेण सर्वैर्दिव्योपचारैश्चोपतस्थिवद्भिर्बृन्दैरुपास्यमानो नारदादिभिरुपश्लोक्यमानपुण्यश्लोकोऽपास्तसमस्तदुरितोपसर्गमानन्दघनमपुनरावृत्तिलक्षणं स्वं परं धाम प्रपेदे।

अर्जुनस्तु तत्सारथेर्दारुकात्तत्संस्थामाज्ञाय त्वरिततरं द्वारकां प्रधाव्य, निःशोभां निरानन्दां निःशब्दां च तां सर्वतः पश्यन्, अपश्यंश्च तत्र कृष्णं रामं प्रद्युम्नं अनिरुद्धं गदं साम्बं, अन्यं वा कंचन यादवं,

आधिपरिभूतो वसुदेवस्याग्रे 'हा मातुल, किमिद'मिति मूर्च्छितः पपात। तमाश्वासयन्वसुदेवः प्राह—"वत्स पार्थ, तव सखा तु 'इतः सप्तमेऽह्नि समुद्र इमां पुरीं प्लावयिष्यति। ततः प्रागेव वयस्येनार्जुनेन गुप्ता हस्तिनां यात' इत्यभिधाय गत एव" इति। तदुक्त्वा पार्थः कृष्णेन विना तत्र क्षणमपि स्थातुमपारयन्, तामेकां रात्रिं ब्रह्मरात्रिमिव चिन्ताद्राघीयसीं कथमपि गमयामास। उषसि वसुदेवमपि निष्ठां गतं निशम्य, तत्कुलेऽवशिष्टेन वज्रनाम्ना कृष्णदायादेन तं संस्कार्य, प्रभासं प्राप्य तत्र च यथाप्रधानं कांश्चित्संस्कार्य, स्त्रीप्रायं तत्कुलमादाय स्वपुराय प्रतस्थे। प्रयाते तु तस्मिन् सा पुरी सागराक्रान्ता कथाशेषा बभूव।

तन्महद्यौवतं पथि प्रवर्तयन् सव्यसाची तदवस्कन्दितुं प्रवृत्तेभ्यः पारिपन्थिकेभ्यो रक्षितुमशक्नुवन् क्लैब्येन विषसाद। तत्राष्टासु रुक्मिण्यादिषु कृष्णमहिषीषु जलमग्नि तपोवनं च यथेष्टं प्रविश्य भगवत्पदं प्रविष्टासु, अवस्कन्दितशिष्टाभिः स्त्रीभिः सहेन्द्रप्रस्थे तं वज्रमभिषिच्य, कुरुक्षेत्रे व्यासमभिगम्य तस्मै द्वारकोदन्तमावेदयामास। 'भूभारहरणार्थं भगवान्विष्णुः कृष्णात्मना भुवि प्रादुर्भूय कृतकृत्यः पुनः स्वं लोकमियाय। अयमेवावसरो युष्माकमपि प्रस्थातुम्' इति तेन सूचितार्थः पार्थस्तत्सर्वं राज्ञे युधिष्ठिराय विज्ञापयामास।

इति मौसलपर्व।

# महाप्रस्थानपर्व ।

राजा तु पृथिवीललामभूतस्य कृष्णस्य वियोगं, कृष्णद्वैपायनस्य नियोगं, भ्रातृणामुद्योगं च पुनः पुनर्विमृश्य, स्वयमपि जातवैतृष्ण्यो महाप्रस्थानाय मतिं चक्रे। तथा निश्चितार्थः स पौत्रं परिक्षितं राज्येऽभिषिच्य, वेश्यापुत्रं युयुत्सुं तस्य गोप्तारं, कृपं विद्यासु विनेतारं च विधाय, आनुपूर्व्यानुव्रजद्भिर्भीमादिभिरनुजैर्भार्यया केनचिच्छुना चानुव्रज्यमान उदीचीं दिशं प्रति प्रवव्राज। तथा प्रव्रजत्सु तेषु, पथि पावकेनार्जुनाद्गाण्डीवे प्रतिगृहीते, मेरोरुपकण्ठे निपतितां द्रौपदीं वीक्ष्य—'आर्य, केन कर्मणा भुवि पतितेयं वराकी कृष्णा' इति पृच्छति भीमे, गच्छन्नेव युधिष्ठिरः प्रत्याह—'भद्र, पञ्चस्वस्मासु पतिषु धनंजयेऽस्या अभिमानः। तेनैव भ्रष्टा' इति। ततश्च गच्छतामेव तेषां क्रमेण सहदेवादिषु पतितेषु, गच्छत्सु च शेषेषु, तत्पतनकारणं भीमेन पृष्टो युधिष्ठिरः स्वयं गच्छन्नेव प्राज्ञंमन्यत्वं सहदेवस्य, रूपवन्मानित्वं नकुलस्य, 'एकाहेन सर्वं परबलं शातयामि' इति वृथाप्रतिज्ञाकरणमर्जुनस्य च क्रमेण दोषं व्याचचक्षे। तावत्स्वयं भुवि पतितो भीमः 'आर्य, केन दोषेण ममायं भ्रंशः' इत्युच्चैः पृच्छन् गच्छतैव तेनाख्यायि—'भद्र भीम, त्वमतिभोजनः। परबलमविज्ञायैव स्वबलश्लाघी। अयमेव दोषस्ते पतनहेतुः' इति। श्वा केवलमेकाकिनं यान्तं तमनुसरति स्म।

तदनु शक्रो दिव्येन विमानेन वैमानिकैश्च तस्य पुरः प्रादुर्भूय 'राजन्नजातशत्रो! आरोहेदं यानम्। तव सुकृतैः प्रीणितोऽहं त्वां

मल्लोकं निनीषुरागतोऽस्मि' इति तं प्रोवाच। स तु साञ्जलिः प्रणम्य तं प्रत्याह—'भगवन्, यदि मयि भवान् प्रीतस्तर्हि मम भ्रातृभिर्भार्यया च सहैव मम स्वर्गे वासोऽस्तु। न ह्येकप्राणानेकार्थांश्च तान्विहाय स्वसुखमभिलषति मे चेतः। तैः सहैव स्वर्गो नरको वा अविभज्य भोक्तव्य इति मे निश्चयः। अतः प्रसीद' इति। तच्छ्रुत्वा मघवा प्रत्याह 'ननु राजन्, पूर्वमेव गता हि ते भ्रातरो भार्या च स्वर्गम्। तव गुणैः प्रीणितोऽहं सशरीरं त्वां नेतुमाशंसे। अतो निःशङ्कमारोहेदं विमानम्' इति। एवं प्रोत्साहितोऽपि स पुनरसंभ्रान्तः प्राह—'भगवन्, भवति प्रसन्ने किमस्माकमलभ्यम्। किं तु। अयं श्वा विषमेष्वपि मां न जहाति। आश्रितत्यागी नारकी स्यादिति न खलु भवद्भ्योऽपि मादृशेन निवेद्यम्। तत्प्रसीदन्तु भवन्तः शुना प्रसितचित्ते मयि' इति। एवं सप्रश्रयं तेन याचितः शतक्रतुः प्रत्यूचे—'ननु राजन्, धर्मज्ञस्य तवापि कथमयं दुरभिनिवेशः। किं न विदितं त्वया श्ववतां स्वर्गद्वारं संवृतमिति। तदलमस्मिन् गतिप्रतिबन्धिन्यभिमानेन। एनं परिहृत्य स्वैरं स्वर्गमाप्नुहि' इति। एवं बहुविधैरपि वाक्यैः स्वाश्रितत्यागेन स्वसुखमनभिनन्दति तस्मिन् धर्मसुते, तच्छ्वारूपं परित्यज्य स्वरूपं गृह्णन् धर्मराजः सादरं तमाह—'वत्स, युधिष्ठिर, अहं नाम तव पिता त्वत्परीक्षार्थं श्वरूपेण त्वामन्वसरम्। मघोनि प्रसन्नेऽपि स्वाश्रिते शुनि प्रसक्तेन त्वया दर्शिता धर्मपरता। पूर्वं च वने मया परीक्षितस्त्वं समवर्तित्वं प्रकाशयन्, मदंशत्वं व्याकरोः। यत्प्रियतरौ भीमार्जुनौ विहाय मातुः सपत्न्या अपि निवापलोपाभावाय माद्रेयस्य जीवितमवृणीथाः। तद्विस्रब्धो भव' इति

वदंस्तं तद्विमानमारोपयामास। तेन विमानेनोर्ध्वं नीयमानो राजा युधिष्ठिरः भास्वरां मनसाप्यचिन्त्यवैभवाममरावतीं नाम देवराज-राजधानीमीक्षांचक्रे।

इति महाप्रस्थानपर्व।

# स्वर्गारोहणपर्व ।

प्रविशंश्च स तां पुरीं तत्र देवैः सभाज्यमानं वरासनस्थं साक्षादिव वासवं तं दुर्योधनं दृष्ट्वा स्वांश्च कर्णभीमादीनदृष्ट्वा, सामर्षं प्रतिनिवर्तमानः सन् , पथि संगतेन नारदेन 'भोः, किमिति विमना इव भासि । कुतो वा वरासनमनादृत्य प्रतिनिवर्तसे' इति पृष्टः प्राह—'भगवन् , नाहमेतेन दुरात्मना धार्तराष्ट्रेण सह वस्तुमुत्सुकोऽस्मि' इति । 'ननु राजर्षे, कथं स्वर्गेऽपि ज्ञातेयं पुरस्कृत्य धार्तराष्ट्रेण वैरायसे । तदलमसूयया । निःसापत्न्येन भोगान् भुङ्क्ष्व' इति तेन मुनिनोक्ते स राजा पुनरपि तमब्रवीत्—'ननु भगवन् , यद्यधर्मैकरतेरस्याप्ययं लोकः, तदा क्व मे धर्मनित्या भ्रातरः । तेषु न कोऽपीह दृश्यते । क्व ते स्थिताः । तान्दिदृक्षे' इति ।

'भो राजन् , यदि त्वं स्ववर्ग्यान्द्रष्टुकामोऽसि, तदेहि, दर्शयामि तत्स्थानं' इति पुरोगामिनि देवदूते तमनुगच्छन् स युधिष्ठिरस्तमोजर्जरिततया निरालोके कण्टकशर्करातप्तवालुकाप्राये सर्वतो विसर्पिकृमिकीटसरीसृपाक्रान्ततले दंशमशकसरघादिभिर्नीरन्ध्रीकृते पथि कृतपदः, पूतिगन्धिमनाघ्रेयं दुःसहं गन्धवहं जिघ्रन् , अश्राव्याण्यसौम्यानां खगमृगाणां तुमुलानि वाशितान्याकर्णयन्, अस्पृश्यानि मांसशोणितानि पथि चितानि पद्भ्यां स्पृशन् , पदे पदे जुगुप्समानः 'नाहमत्र गन्तुमुत्सहे' इति निववृते । निवर्तमानश्च सः 'राजन् युधिष्ठिर, मुहूर्तमत्रैव तिष्ठ । त्वदागमेन सुरभिगन्धिर्गन्धवाहो वहति । वयं च वीतयातनाः स्मः । दुःखिषु करुणा हि महतां शाली' इत्युच्चैराक्र-

न्दितं शुश्राव। तच्छ्रवणेनैव रश्मिषु गृहीत इव सपदि जडीभूतस्तिष्ठन्, प्रसक्ताश्रुः सन्ननुभूतपूर्वमपि तत्स्वरं स्वयमप्रत्यभिजानानः स राजा 'के यूयं। का युष्माकमार्तिः। कथं वा मया युष्माकं प्रतिकर्तव्यम्' इति तान् पप्रच्छ। "भो राजन्, कथमस्मान्न प्रतिपद्यसे।" 'कर्णोऽहं', 'भीमोऽहं', 'अर्जुनोऽहं' इत्यादि स्वं स्वं नामोद्घुष्य, 'पाह्यस्मान्निरयनिमग्नान्' इत्याक्रोशत्सु तेषु, मुक्तकण्ठं रुदन् न राजा धर्मपुत्रः 'कथं युष्माकमपीयं दशा। धिग्दैवमसमीक्ष्यकारि!' इति गर्हयन्, 'नाहमिदमवस्थान् भ्रातॄन् भार्यां चोपेक्ष्य सुखी यामि। तद्गम्यताम्' इति देवदूतं विसृज्य तेषां हिताकाङ्क्षी तत्रैव तस्थौ।

ततो निमेषमात्रेण प्रकाशीभूतास्वाशासु, सर्वतस्तिरोहितेष्वमङ्गलेषु, प्रादुर्भूतेषु च सर्वेषु दिव्यमङ्गलवस्तुषु, वसुभी रुद्रैरादित्यैर्मरुद्भिरन्यैश्च देवैर्मुनिभिः सिद्धैश्चारणैर्यक्षैर्विद्याधरैर्गन्धर्वैरप्सरोभिरितरैर्दिक्पालैश्च परिवृतः सहस्राक्षः सहस्रधुर्येण ज्योतिर्मयेन विमानेन तत्राविर्भवन्, युधिष्ठिरमामन्त्र्य तारस्वरेणाबभाषे—'भो राजन्नजातशत्रो पाण्डव! सर्वैरपि राजभिरवश्यं नरको द्रष्टव्यः। अतस्त्वं दर्शितोऽसि। किंच। द्वाविह राशी सुकृतं दुष्कृतं च, फलमपि स्वर्गो नरकश्च। तयोर्यल्लघु भोगेन क्षय्यं तत्प्रथमतरं भुज्यते। अत एवाद्य तव नरकदर्शनं, त्वद्भ्रातॄणां तदनुभवः, त्वद्भ्रातृव्यस्य दुर्योधनस्य स्वर्गप्राप्तिश्चेत्यवधेहि। अपरं च। आचार्यं द्रोणमवसाने च्छलेन किल त्वमुपाचीर्णवानसि। अत एव त्वं च च्छलेन निरयं दर्शितोऽसि। तदस्यां स्नात्वा, तेन धूतमानुषभावो राजसूयेनाश्वमेधैरन्यैश्च पुण्यैरार्जितान् लोकान् स्वैर्वर्ग्यैः समं कामं भुङ्क्ष्व'

इति। तद्वाक्यान्ते धर्मराजोऽपि प्राह—'वत्स, एषा तृतीया परीक्षा। त्वया पुत्रेण पुत्रवानस्मि। यत्स्वसुखनिरपेक्षतया स्वाश्रितेषु प्रसितेन त्वया धर्ममयत्वं दर्शितम्। सर्वात्मना श्लाघ्योऽसि' इति तमालिङ्गय प्रशशंस। इत्थं त्रिदशनाथैरनुमोदितः स राजा पाण्डवो युधिष्ठिरः पञ्चभिर्भ्रातृभिर्भार्यया च सह दिव्यानक्षय्यां च भोगान् भुञ्जानः सुखमासांचक्रे॥

इति स्वर्गारोहणपर्व।

# अथ भगवद्दण्डकः ।

प्रतिष्ठितं स्वे महिमन्यगम्यं
मनोगिरां केवलभक्तिगम्यम् ।
अनन्तकल्याणगुणाधिवासं
हरिं प्रपद्ये शरणं शरण्यम् ॥

जय नागाङ्कशयन जय नागारिवाहन ।
जय नागेन्द्रदमन जय नागार्तिभञ्जन ॥

जय जय भगवन्महाकल्पविप्लाविकल्लोलिनीवल्लभोल्लोलकल्लोलपारिप्लवस्वीयभक्तप्लुवाबन्धसंधाकृते दिव्यमत्स्याकृते, मन्दरोद्वर्तनिर्वृत्तकण्डूसुखाशीलपृष्ठप्रतिष्ठक्ष्मापीठकर्मक्षमाकुण्ठकूर्माकृते, लीलयोदस्तविश्वंभरासुस्तभूदार विश्वंभर, क्रूरदैत्येन्द्रवक्षस्तटोत्पाटनोत्पाटिरक्तातिमत्तप्रचण्डद्युते नारसिंहाकृते ।

जय जय निजविक्रमाक्रान्तसंक्रन्दनाक्रन्दकृद्बाहुवीर्योष्मदुष्प्रेक्षनिर्व्याजदानप्रभावप्रशस्तप्रगल्भाग्र्यवैरोचनिद्वाररक्षावटो लोकशिक्षापटो, दृप्यदुन्मस्तकातिक्रमक्षत्रसंतानसर्वस्वसर्वंकषोद्दामसर्वातिशायिप्रतापानलात्यर्थतीव्रव्रताचारतेजोनिधे वाजिमेधे द्विजेभ्यो वितीर्णक्षिते नैष्ठिकब्रह्मचारिन्मुने भार्गव ।

जय जय रघुवंशमुक्तामणे भक्तचिन्तामणे राजचूडामणे लोकशल्यक्षपाटक्षपाहर्पतीभूतदोर्दण्डकोदण्डचण्डध्वने राम सीतापते,

कामपाल प्रलम्बघ्न हे रेवतीकान्त, हे पुण्डरीकाक्ष हे वासुदेवा-च्युत द्वारकानाथ कंसादिदिंहिंस्रौघविध्वंसिबाल्योचितक्रीड हे कृष्ण कृष्णाकुविन्दायितानुग्रह श्रीपते सत्यभामापते शक्रभू-सारथे ।

जय जय सुरराजनीलोपलश्यामलं कोमलं पापतूलानकं मङ्गलै-कायनं सुन्दरं सुन्दरादिन्दिरामन्दिरं भक्तिसंवर्धनं मुक्तिघण्टा-पथं कौस्तुभालंकृतं योगिभिश्चेतसा संततं भावितं तावकं विग्रहं धेहि मन्मानसाम्भोरुहे तुभ्यमाद्याय वेदान्तवेद्याय नित्याय सत्याय बुद्धाय शुद्धाय मुक्ताय कैवल्यरूपाद्वयानन्दमूर्ते नमस्ते नमः ॥

वृष्ट्वा गीतामृतं कामं वेदान्ताम्बुधिसंभृतम् ।
संतापहारिणे भूयात्कृष्णमेघाय मङ्गलम् ॥

॥ इति श्रीलक्ष्मणसूरिविरचितो भारतसंग्रहः समाप्तः ॥

॥ ओं तत्सत् ॥